उच्चतरमाध्यमिकपाठ्यक्रम

# संस्कृतम्

## 309

## 3

राष्ट्रीय मुक्त विद्यालयी िक्षा संस्थान

ए-24-25, ैक्षणिक क्षेत्र, सेक्टर-62, नोएडा-201301 (उत्तर प्रदे ा)

## समन्वयकपक्षतः

प्रिय विद्यार्थिन्!

भवतां सर्वेषां संस्कृतं प्रति अनुरागं दृष्ट्वा अस्माभिः वरिष्ठमाध्यमिकस्तरे संस्कृतपाठ्यक्रमस्य विकासः कृतः। एषः पाठ्यक्रमः न केवलं रोचकः अपितु भवतां जीवनोपयोगी च भवेत् इति दृष्ट्या विविधाः कार्यक्रमाः गतिविधयश्च अत्र योजिताः। मूलरूपेण अत्र त्रीणि पुस्तकानि भविष्यन्ति, प्रतिपुस्तकं पद्यपाठाः पूर्वं दत्ताः, तत्पश्चात् गद्यपाठाः, तदनन्तरं नाट्यांशाः च संकलिताः। प्रतिपुस्तकम् अनुच्छेदलेखनं, पत्रलेखनं संवादलेखनं च लेखनकौशलविकासाय समाहितानि। व्याकरणस्य अभ्यासः प्रायोगिकः एव। यत्र–यत्र व्याकरणबिन्दूनां स्पष्टीकरणस्य आवश्यकता आसीत् तत्र तत्र सः अभ्यासः दत्तः। योग्यताविस्तारे लेखकपरिचयः, ग्रन्थपरिचयस्तु वर्तते एव परन्तु भाषाविकासार्थं रूपाणां मध्ये लिङ्ग–विभक्ति–वचनानुसारं यत्र यत्र परिवर्तनं भवति, तस्य उपरि सूक्ष्मदृष्टिपातः भवेत्। स्थाने–स्थाने सन्धिच्छेदाः, समस्तपदानां विग्रहाः अपि दत्ताः। पद्यपाठेषु अन्वयाः भावार्थाः अर्थस्य स्पष्टीकरणाय समाहिताः।

व्याख्याकृते सम्प्रेषणात्मकशैल्यां प्रश्नोत्तरमाध्यमेन भावविकासः कारितः। प्रश्नानां समक्षम् उत्तराणि दत्तानि येन प्रश्नोत्तरलेखने भवतां सम्यक् अभ्यासः भवेत् प्रश्ननिर्माणे अपि च सारल्यं भवेत्।

पठन–अभ्यासे तावत् सार्थकता नास्ति यावत् अपठितांशान् पठित्वा अवबोधने क्षमतायाः विकासः न भवेत् अनया दृष्ट्या स्थाने–स्थाने अपठितांशाः अपि योजिताः। अत्रापि भेदद्वयं वर्तते गद्यांश–अवबोधनम्, पद्यांश–अवबोधनम् च। पाठानाम् अन्ते महत्त्वपूर्णा त्रिविधा सामग्री योग्यताविस्तारे दत्ता। तत्र 'क' भागे लेखकपरिचयः 'ख' भागे ग्रन्थपरिचयः 'ग' भागे व्याकरणबिन्दूनां सैद्धान्तिकपक्षाणां स्पष्टीकरणं तत्र दत्तम्। भवतां ज्ञानार्थं तेषाम् अध्ययनम् आवश्यकम्। एतत् तु केन्द्रिकपाठ्यक्रमविषये एव उक्तं परन्तु एतेन कार्यक्रमेण सह वैकल्पिकपाठ्यक्रमद्वयमपि अस्ति तयोः एक एव स्वीकरणीयः। तेन भवतां परिचयः संस्कृत्या सह भविष्यति अपि च जीवने नियुक्तिकृते उपयोगितादृष्ट्या प्रयोजनमूलकं पत्रमपि अस्ति। तयोः मध्ये केवलमेकस्य एव चयनं करणीयम्। कानिचित् कार्याणि वार्षिकपरीक्षाकृते न सन्ति परन्तु तानि सम्यक्कक्षासु रतैः शिक्षकैः निरीक्षितानि भविष्यन्ति। तेषां कोटिमूल्यम् अपि भवताम् अंकतालिकायां प्रदर्शितं भविष्यति यथा परियोजनाकार्यम् इत्यादीनि।

उच्चारणशुद्धतायै श्रव्यमुद्रिकाः अपि शीघ्रमेव निर्मास्यन्ते येन भवन्तः स्वगृहे उपविश्य एव सस्वरं गद्यपद्यपाठान् वाचयितुं शक्ताः भवेयुः। श्रमसाध्यं खलु विद्यार्जनम्। विद्यार्जने कदापि सन्तोषः न कर्त्तव्यः। अधिकाधिकं पठितुं ज्ञातुं च प्रयत्नः करणीयः। एतत् प्रथमं पुस्तकम्। अत्र चत्वारः पाठाः पद्यस्य, पुनः चत्वारः च गद्यस्य, पाठद्वयं नाटकस्य, अन्तिम पाठद्वयं लेखनाभ्यासार्थं वर्तते। निरन्तरं स्वाध्यायं कृत्वा स्वज्ञानं वर्धयत। यदि पाठ्यक्रमे कुत्रचित् काठिन्यम् अनुभूतं स्यात् तर्हि सम्पर्ककक्षासु शिक्षकाणां सान्निध्येन अवगन्तव्यम्। भवतां सृजनात्मकप्रस्तावानां सर्वदैव स्वागतं भविष्यति। अनेकाभिः शुभाकांक्षाभिः सह भवतां सम्मुन्नतिं कामये।

## अध्यक्षपक्षतः

प्रियविद्यार्थिन्!

संस्कृतम् अस्माकं देशस्य गौरवम् अस्ति। अस्माकं देशस्य प्रतिष्ठा संस्कृतमेव आश्रिता। अस्माकं ज्ञानं विज्ञानं प्राचीनतमम् वर्तते यत् प्राचीनसंस्कृतसाहित्ये सङ्कलितम्। ऋग्वेदः विश्वस्य संस्कृतौ प्राचीनतमः ग्रन्थः। यदि वयं स्वकीयसंस्कृत्या एव परिचिताः न भवाम तर्हि संसारे सम्मानपूर्वकं स्थातुं न पारयामः।

अत एव द्वादशकक्षायाः पाठ्यक्रमे संस्कृतविषयस्य संयोजनं कृतम्। ये जनाः केवलं संस्कृतज्ञानेन आत्मनः विकासं कर्तुमिच्छन्ति तेऽपि अनेन पाठ्यक्रमेण नूनं लाभान्विताः भविष्यन्ति।

भवन्तः जानन्ति एव इदानीमपि संस्कृतभाषायां प्रायः सप्ततिः पत्रपत्रिकाः प्रकाश्यन्ते। प्रतिदिनमेव साहित्यरचनासरित् अधिकाधिकवेगेन प्रवहति। भवान् अपि एतस्यां स्वयोगदानं कर्तुं सक्षमः भवेत् इत्याशयेन एषः पाठ्यक्रमः विशेषरूपेण आधुनिकसन्दर्भे विविधानाम् उपयोगितानां दृष्ट्या निर्मितः।

ये च विद्वांसः विदुष्यश्च अस्य पाठ्यक्रमस्य निर्माणार्थं पाठ्यसामग्रीविकासार्थम् आत्मनः योगदानं कृतवन्तः तेभ्यः सर्वेभ्यः राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानपक्षतः साधुवादं ज्ञापयामि। एषः पाठ्यक्रमः प्रथमवारमेव प्रकाशितः। अतः यदि भवतां मनसि किमपि अन्यत् ज्ञातुम् इच्छा भवेत् तर्हि अवश्यमेव संस्थानं प्रति स्वप्रतिक्रियां प्रेषयित्वा अस्मिन् क्षेत्रे स्वयोगदानं कुर्वन्तु। वयं भारतीयाः इति गौरवस्य विषयः अस्ति। भवतां जीवनम् अधिकाधिकं सुगन्धितम् उज्ज्वलं समाजकल्याणकारकं लाभप्रदं च भविष्यति इति आशास्महे।

भारतस्य पुनः भाग्योदयार्थं सर्वेभ्यः मत्पक्षतः अनेकाः शुभकामनाः अनेकानि अभिनन्दनानि च।

अध्यक्षः

राष्ट्रीय मुक्तविद्यालयी शिक्षा संस्थानम्

## निदेशकपक्षतः

प्रियविद्यार्थिन्!

राष्ट्रीयमुक्तविद्यालयीशिक्षासंस्थानं प्रतिवर्षं भवतां सर्वेषां हितम् आवश्यकतां चानुभूय प्रस्तावितेषु पाठ्यक्रमेषु वृद्धिं कर्तुं तत्परः भवति। इदानीं यावत् दशमकक्षापर्यन्तं तु संस्कृतपाठ्यक्रमः निर्मितः आसीत् परन्तु द्वादशकक्षायाः कृते संस्कृतभाषायाः पाठ्यक्रमस्य अभावः आसीत्। एतां न्यूनतां दूरीकर्तुम् इदानीं संस्थानपक्षतः संस्कृतभाषायाः नवीनः आधुनिकसन्दर्भानुकूलः पाठ्यक्रमः विकासितः। अस्य पाठ्यक्रमस्य अन्तर्गतं पुस्तकद्वयम् अनिवार्यरूपेण पठनीयम्। पाठाः रुचिपूर्णाः भवेयुः समसामयिकज्ञानेन विज्ञानेन च संयुक्ताः, भारतीयसंस्कृतेः सम्यक् प्रतिपादकाः चारित्रिकविकासे सहायकाः, जीवने आत्मगौरवभावनायाः विकासकाः च भवेयुः इति बिन्दुं मनसि निधाय लिखिताः सम्पादिताश्च सन्ति।

तृतीये पुस्तके द्वौ पाठ्यक्रमौ निर्मितौ स्तः ययोः मध्ये भवन्तः स्वरुच्यनुसारं कस्यचिदेकस्य चयनं कृत्वा पठितुं शक्नुवन्ति। द्वौ पाठ्यक्रमौ स्तः– 1. संस्कृतं चैव संस्कृतिः 2. प्रयोजनमूलकं संस्कृतम्। प्रथमवैकल्पिकपत्रं भारतीयसंस्कृत्याः परिचयं प्रदाय भवतां ज्ञाने वृद्धिं करिष्यति। अपर च पत्रम् आधुनिकयुगे पत्रपत्रिकाणां प्रकाशनार्थं, सम्पादनार्थं विश्लेषणार्थं विभिन्नेषु अपेक्षितपक्षेषु भवतां कौशलविकासं करिष्यति।

कापि भाषा किमपि साहित्यं वा यावत् जीवनेन सह सम्बद्धं न भवति, तथा पत्रकारितायाः क्षेत्रे कौशलं प्राप्य उपयोगितां लक्ष्यीकृत्य अग्रे न सरति तावत् तस्य प्रगतिः न स जायते। भवन्तः एव एतस्याः भागीरथ्याः प्रवाहवर्धकाः सहयोगप्रदायका भाविराष्ट्रनिर्मातारश्च। अतः भवन्तः संस्कृतस्य संस्कृतेश्च ज्ञानेन आत्मानं संवृद्धं कृत्वा देशस्य अग्रदूताः भारतमातुः सत्याः सेवकाः भवेयुः इत्येव मे हार्दिकी मनोकामना।

अस्य पाठ्यक्रमस्य निर्माणे ये ये विद्वांसः विदुष्यश्च आत्मनः अमूल्यं सहयोगं प्रदत्तवन्तः तेभ्यः अहं संस्थानपक्षतः हार्दिकीं कृतज्ञतां ज्ञापयामि।

भवन्तः अपि धन्याः येषां हस्ते एषः पाठ्यक्रमः स्वलक्ष्यपूर्तये गमिष्यति। अस्मिन् पाठ्यक्रमे यदि भवद्भिः किमपि संशोधनं संवर्धनं परिवर्तनं वा अपेक्ष्यते तर्हि तेषां सर्वेषां प्रस्तावानामत्र स्वागतं भविष्यति। अतः निस्संकोचं भवन्तः स्व सम्मतिं प्रेषयन्तु। मत्पक्षतः युष्माकं उज्ज्वलभविष्याय अनेकाः शुभकामनाः।

निदेशकः

राष्ट्रीय मुक्तविद्यालयी शिक्षा संस्थानम्

## सलाहकार समिति

**प्रो. महे ा चंद्र पंत**
अध्यक्ष,
रा० मु० वि० ि० संस्थान
नोयडा

**प्रो० के० आर० चंद्र ोखरन**
अध्यक्ष,
रा० मु० वि० ि० संस्थान
नोयडा

**डा० सुष्मिता मित्रा**
निदे ाक
अध्यक्ष, रा० मु० वि० ि० संस्थान
नोयडा

## पाठ्यक्रम निर्माण समिति

**प्रो० वाचस्पति उपाध्याय**
कुलपतिः
लाल बहादुर ाास्त्री संस्कृत विद्यापीठ,
नई दिल्ली

**प्रो० माणिक गोविंद चतुर्वेदी**
सेवानिवत्त प्रोफेसर
राष्ट्रीय ौक्षिक अनुसंधान एवं प्र ाक्षण परिषद्
नई दिल्ली

**श्रीमती ा ाप्रभा गोयल (सेवानिवत्त)**
रीडर, राज्य ौक्षिक अनुसंधान एवं प्र ाक्षण परिषद्
नई दिल्ली

**डा० सुरे ा पंत**
सेवानिवत्त, वरिष्ठ प्राध्यापक
राजकीय उच्चतर माध्यमिक विद्यालय
नई दिल्ली

**डा० चमू कृष्ण ाास्त्री**
संस्कृत भारती,
नई दिल्ली

**श्री राजीव कुमार मिश्र**
वरिष्ठ ाक्षक
केन्द्रीय विद्यालय सं०–2
दिल्ली छावनी

**डा० सुद ान कौ ाक (सेवानिवत्त)**
रीडर, दौलतराम कॉलेज,
दिल्ली वि वविद्यालय
दिल्ली

**डा० ाुभंकर मिश्र**
सहायक अनुसंधान अधिकारी
केंद्रीय हिंदी निदे ाालय
नई दिल्ली–110054

**संयोजिका**
**डा० रचना भाटिया**
सहायक निदे ाक
राष्ट्रीय मुक्त विद्यालयी ाक्षा संस्थान
नोयडा

# पाठ्यसामग्री निर्माण समिति
## पुस्तक - I

### संपादक मंडल

**श्रीमती ा िप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य ौक्षिक अनुसंधान
एवं प्र ािक्षण परिषद्
नई दिल्ली

**डा० धर्मा**
**(सेवानिवत्त)**
रीडर, लक्ष्मीबाई महाविद्यालय,
दिल्ली वि वविद्यालय,
दिल्ली

**डा० भास्करानंद पांडेय**
**(सेवानिवत्त)**
उप–प्रधानाचार्य, राजकीय सर्वोदय
सह ािक्षा विद्यालय
नई दिल्ली

### पाठ लेखक

**डा० श्रीधर वसिष्ठ**
**(सेवानिवत्त)**
पूर्व कुलपति, श्री लाल बहादुर ाास्त्री
राष्ट्रीय संस्कृत विद्यापीठ
नई दिल्ली

**श्रीमती ा िप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य ौक्षिक अनुसंधान
एवं प्र ािक्षण परिषद्
नई दिल्ली

**श्रीमती संतोष कोहली**
**(सेवानिवत्त)**
उप–प्राचार्या, राजकीय वरिष्ठ
माध्यमिक विद्यालय
दिल्ली

**डा० भास्करानंद पांडेय (सेवानिवत्त)**
उप–प्रधानाचार्य,
सर्वोदय सह ािक्षा विद्यालय
नई दिल्ली

**श्री राजीव कुमार मिश्र**
वरिष्ठ प्रवक्ता
केन्द्रीय विद्यालय सं०–2
दिल्ली छावनी

**डा० उमा कपूर (सेवानिवत्त)**
ािक्षिका, राजकीय उच्चतर माध्यमिक
बालिका विद्यालय
नई दिल्ली

**डा० राजे वर मिश्र**
सहायक, ौक्षिक अनुसंधान एवं
प्र ािक्षण परिषद्
नई दिल्ली

**श्री राजेन्द्र कुमार पांडेय**
इंदिरापुरम्, गाजियाबाद
(उ० प्र०)

**डा० प्रदीप जैन**
ािक्षक, मॉडर्न स्कूल
नई दिल्ली

### रेखा चित्रांकन

**श्री अतुल वर्धन**
स्वतंत्र चित्रकार

**श्री महे ा ार्मा**
राष्ट्रीय मुक्त विद्यालयी ािक्षा संस्थान

लेजर टाइपसैटिंग– ग्राफिक एण्ड डाटा सिस्टम्स, बेर सराय, नई दिल्ली

# पाठ्‌यसामग्री निर्माण समिति
## पुस्तक - II

## संपादक मंडल


**श्रीमती  ा िप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य  ैक्षिक अनुसंधान
एवं प्र िक्षण परिषद्
नई दिल्ली

**डा० धर्मा**
**(सेवानिवत्त)**
रीडर, लक्ष्मीबाई महाविद्यालय,
दिल्ली वि  वविद्यालय,
दिल्ली

**डा० भास्करानंद पांडेय**
**(सेवानिवत्त)**
उप–प्रधानाचार्य, राजकीय सर्वोदय
सह िक्षा विद्यालय
नई दिल्ली


## पाठ लेखक


**डा० श्रीधर वसिष्ठ**
**(सेवानिवत्त)**
पूर्व कुलपति, श्री लाल बहादुर  ाास्त्री
राष्ट्रीय संस्कृत विद्यापीठ
नई दिल्ली

**श्रीमती  ा िप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य  ैक्षिक अनुसंधान
एवं प्र िक्षण परिषद्
नई दिल्ली

**श्रीमती संतोष कोहली**
**(सेवानिवत्त)**
उप–प्राचार्या, राजकीय वरिष्ठ
माध्यमिक विद्यालय
दिल्ली

**डा० भास्करानंद पांडेय (सेवानिवत्त)**
उप–प्रधानाचार्य,
सर्वोदय सह िक्षा विद्यालय
नई दिल्ली

**डा० सुरे ा पंत (सेवानिवत्त)**
वरिष्ठ प्राध्यापक
राजकीय उच्चतर माध्यमिक
विद्यालय, नई दिल्ली

**डा० उमा कपूर (सेवानिवत्त)**
 िक्षिका, राजकीय उच्चतर माध्यमिक
बालिका विद्यालय
नई दिल्ली

**डा०  ांकरलाल  ाास्त्री**
निदे ाक, राजस्थान संस्कृत अनुसंधान संस्थान
 ाहपुरा
जयपुर


## रेखा चित्रांकन


**श्री अतुल वर्धन**
स्वतंत्र चित्रकार

**श्री महे ा  ार्मा**
राष्ट्रीय मुक्त विद्यालयी  िक्षा संस्थान



Laser Typesetting by *Graphic & Data Systems,* Ber Sarai, New Delhi

# पाठ्यसामग्री निर्माण समिति
## पुस्तक - III

## संपादक मंडल


**श्रीमती ािप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य ौक्षिक अनुसंधान
एवं प्र ाक्षिण परिषद्
नई दिल्ली

**डा० धर्मा**
**(सेवानिवत्त)**
रीडर, लक्ष्मीबाई महाविद्यालय,
दिल्ली वि वविद्यालय,
दिल्ली

**डा० भास्करानंद पांडेय**
**(सेवानिवत्त)**
उप–प्रधानाचार्य, राजकीय सर्वोदय
सह ाक्षा विद्यालय
नई दिल्ली


## पाठ लेखक


**डा० श्रीधर वसिष्ठ**
**(सेवानिवत्त)**
पूर्व कुलपति, श्री लाल बहादुर ाास्त्री
राष्ट्रीय संस्कृत विद्यापीठ
नई दिल्ली

**श्रीमती ािप्रभा गोयल**
**(सेवानिवत्त)**
रीडर, राज्य ौक्षिक अनुसंधान
एवं प्र ाक्षिण परिषद्
नई दिल्ली

**डा० धर्मा**
**(सेवानिवत्त)**
रीडर, लक्ष्मीबाई महाविद्यालय,
दिल्ली वि वविद्यालय,
दिल्ली

**डा० भास्करानंद पांडेय (सेवानिवत्त)**
उप–प्राचार्य, सर्वोदय सह ाक्षा
विद्यालय
नई दिल्ली

**डा० चंद्रभूषण झा**
वरष्ठि प्रवक्त, सेंट स्टीफेन्स कालेज
दिल्ली वि वविद्यालय
दिल्ली

**डा० नोदनाथ मिश्र (सेवानिवत्त)**
प्राचार्य,
केंद्रीय विद्यालय
दिल्ली

**डा० दया ांकर तिवारी**
प्रवक्ता, राजधानी कॉलेज
दिल्ली वि वविद्यालय
दिल्ली


## रेखा चित्रांकन


**श्री अतुल वर्धन**
स्वतंत्र चित्रकार

**श्री महे ा ार्मा**
राष्ट्रीय मुक्त विद्यालयी ाक्षा संस्थान



Laser Typesetting by *Graphic & Data Systems,* Ber Sarai, New Delhi

# संस्कृतम्
# उच्चतरमाध्यमिकस्तरः
## प्रथमं स्वाध्यायसोपानम्


| क्रमाङ्कः | विषयसूची | स्वाध्यायसोपानम् | पृष्ठ संख्या |
|---|---|---|---|
| 1. | जीवन-संदेशः | पठनम् (पद्यम्) | 1 |
| 2. | यदि जानासि तद् वद | पठनम् (पद्यम्) | 21 |
| 3. | आरोग्यं परमं सुखम् | पठनम् (पद्यम्) | 38 |
| 4. | वाचां मण्डनं सत्यम् | पठनम् (पद्यम्) | 57 |
| 5. | अतिलोभः न कर्तव्यः | पठनम् (गद्यम्) | 81 |
| 6. | राजते खलु कन्याकुमारी | पठनम् (गद्यम्) | 99 |
| 7. | एतद् उपास्यम् | पठनम् (गद्यम्) | 116 |
| 8. | परार्थे आत्मोत्सर्गः | पठनम् (गद्यम्) | 134 |
| 9. | काले फलति सौभाग्यम् | पठनम् (नाटकम्) | 154 |
| 10. | पतन्ति परपीडकाः | पठनम् (नाटकम्) | 176 |
| 11. | अनुच्छेदलेखनम् | पठनम् (लेखनम्) | 297 |
| 12. | संवादलेखनम् | पठनम् (लेखनम्) | 213 |

## 1

1. जीवन-संदेशः
2. यदि जानासि तद् वद
3. आरोग्यं परमं सुखम्
4. वाचां मण्डनं सत्यम्
5. अतिलोभः न कर्तव्यः
6. राजते खलु कन्याकुमारी
7. एतद् उपास्यम्
8. परार्थे आत्मोत्सर्गः
9. काले फलति सौभाग्यम्
10. पतन्ति परपीडकाः
11. अनुच्छेदलेखनम्
12. संवादलेखनम्

## 2

13. वर्षर्तुवर्णनम्
14. अमृतस्य पन्थाः
15. हिमालयो नाम नगाधिराजः
16. मानो हि महतां धनम्
17. कल्पनाकीर्तिः विजयते
18. पर्यावरणस्य संरक्षणम्
19. क्रोधोऽनर्थकारकः
20. अनन्तः ज्ञानसागरः
21. शल्यचिकित्साजनकः–सुश्रुतः
22. कष्टं न्यासस्य रक्षणम्
23. हृदय परिवर्तनम्
24. पत्रं लिखामः
25. परियोजना&निर्माणम्

## 3

**विकल्पः 'क'**

26. समसामयिकं संस्कृतसाहित्यम्
27. भारतीय ज्ञानविज्ञानपरम्परा
28. संस्कृतम् अन्याः भारतीयाः भाषाः च
29. भारतीयसंस्कृतौ संस्काराः

**विकल्पः 'ख'**

26. संस्कृतस्य प्रयोजनमूलकता
27. जनस×चारमाध्यमः
28. संस्कृतपत्रकारिता
29. पत्रिकाःप्रारूपम्
30. मुद्रणत्रुटिशोधनम्

## 1


1. जीवन-संदेशः
2. यदि जानासि तद् वद
3. आरोग्यं परमं सुखम्
4. वाचां मण्डनं सत्यम्
5. अतिलोभः न कर्तव्यः
6. राजते खलु कन्याकुमारी
7. एतद् उपास्यम्
8. परार्थे आत्मोत्सर्गः
9. काले फलति सौभाग्यम्
10. पतन्ति परपीडकाः
11. अनुच्छेदलेखनम्
12. संवादलेखनम्


## 2


13. वर्षर्तुवर्णनम्
14. अमृतस्य पन्थाः
15. हिमालयो नाम नगाधिराजः
16. मानो हि महतां धनम्
17. कल्पनाकीर्तिः विजयते
18. पर्यावरणस्य संरक्षणम्
19. क्रोधोऽनर्थकारकः
20. अनन्तः ज्ञानसागरः
21. शल्यचिकित्साजनकः—सुश्रुतः
22. कष्टं न्यासस्य रक्षणम्
23. हृदय परिवर्तनम्
24. पत्रं लिखामः
25- i fj ; ks u k& निर्माणम्


## 3

**विकल्प 'क'**


26. समसामयिकं संस्कृतसाहित्यम्
27. भारतीय ज्ञानविज्ञानपरम्परा
28. संस्कृतम् अन्याः भारतीयाः भाषाः च
29. भारतीयसंस्कृतौ संस्काराः


**विकल्प 'ख'**


26. संस्कृतस्य प्रयोजनमूलकता
27. जनस×चारमाध्यमः
28. संस्कृतपत्रकारिता
29. पत्रिकाःप्रारूपम्
30. मुद्रणत्रुटिशोधनम्

**1**

1. जीवन-संदेशः
2. यदि जानासि तद् वद
3. आरोग्यं परमं सुखम्
4. वाचां मण्डनं सत्यम्
5. अतिलोभः न कर्तव्यः
6. राजते खलु कन्याकुमारी
7. एतद् उपास्यम्
8. परार्थे आत्मोत्सर्गः
9. काले फलति सौभाग्यम्
10. पतन्ति परपीडकाः
11. अनुच्छेदलेखनम्
12. संवादलेखनम्

**2**

13. वर्षर्तुवर्णनम्
14. अमृतस्य पन्थाः
15. हिमालयो नाम नगाधिराजः
16. मानो हि महतां धनम्
17. कल्पनाकीर्तिः विजयते
18. पर्यावरणस्य संरक्षणम्
19. क्रोधोऽनर्थकारकः
20. अनन्तः ज्ञानसागरः
21. शल्यचिकित्साजनकः–सुश्रुतः
22. कष्टं न्यासस्य रक्षणम्
23. हृदय परिवर्तनम्
24. पत्रं लिखामः

25- i fj ; ks u k& निर्माणम्

**3**

**विकल्प 'क'**

26. समसामयिकं संस्कृतसाहित्यम्
27. भारतीय ज्ञान&विज्ञान परम्परा
28.
29. संस्कृतं संस्कृतिश्च भारतीयसंस्काराः

**विकल्प 'ख'**

26. प्रयोजनमूलकं संस्कृतम् क्षेत्रेः
27. जनस×चारमाध्यमः
28. संस्कृतपत्रकारिता
29. संस्कृतस्य विविध रूपम्
30. मुद्रणत्रुटिशोधनम्

उच्चतरमाध्यमिकपाठ्यक्रम

# संस्कृतम्

## 2

राष्ट्रीय मुक्त विद्यालयी ि क्षा संस्थान

ए-24-25, ैक्षणिक क्षेत्र, सेक्टर-62, नोएडा-201301 (उत्तर प्रदे ा)

उच्चतरमाध्यमिकपाठ्यक्रम

# संस्कृतम्

## 3


राष्ट्रीय मुक्त विद्यालयी शिक्षा संस्थान

ए-24-25, शैक्षणिक क्षेत्र, सेक्टर-62, नोएडा-201301 (उत्तर प्रदेश)

# संस्कृतम्
# उच्चतरमाध्यमिकस्तरः
## द्वितीय स्वाध्यायसोपानम


| क्रमाङ्कः | विषयसूची | स्वाध्यायसोपानम् | पृष्ठ संख्या |
|---|---|---|---|
| 13. | वर्षर्तुवर्णनम् | पठनम् (पद्यम्) | 1 |
| 14. | अमृतस्य पन्थाः | पठनम् (पद्यम्) | 24 |
| 15. | हिमालयो नाम नगाधिराजः | पठनम् (पद्यम्) | 46 |
| 16. | मानो हि महतां धनम् | पठनम् (पद्यम्) | 70 |
| 17. | कल्पनाकीर्तिः विजयते | पठनम् (गद्यम्) | 100 |
| 18. | पर्यावरणस्य संरक्षणम् | पठनम् (गद्यम्) | 120 |
| 19. | क्रोधोऽनर्थकारकः | पठनम् (गद्यम्) | 141 |
| 20. | अनन्तः ज्ञानसागरः | पठनम् (गद्यम्) | 160 |
| 21. | शल्यचिकित्साजनकः–सुश्रुतः | पठनम् (गद्यम्) | 180 |
| 22. | कष्टं न्यासस्य रक्षणम् | पठनम् (नाटकम्) | 198 |
| 23. | हृदय परिवर्तनम् | पठनम् (नाटकम्) | 220 |
| 24. | पत्रं लिखामः | लेखनम् | 244 |
| 25. | परियोजना&निर्माणम् | लेखनम् | 259 |

# संस्कृतम्
# उच्चतरमाध्यमिकस्तरः
## पुस्तकम् III


| क्रमांङ्क | विषयसूची | पृष्ठ संख्या |
|---|---|---|
| **विकल्प 'क'** | | |
| 26. | समसामयिकं संस्कृतसाहित्यम् | 1 |
| 27. | भारतीय ज्ञान&विज्ञान परम्परा | 11 |
| 28. | | |
| 29. | संस्कृतं संस्कृतिश्च भारतीयसंस्काराः | |
| **विकल्प 'ख'** | | |
| 26. | प्रयोजनमूलकं संस्कृतम् क्षेत्रेः | 1 |
| 27. | जनस×चारमाध्यमः | 11 |
| 28. | संस्कृतपत्रकारिता | 24 |
| 29. | संस्कृतस्य विविध रूपम् | 33 |
| 30. | मुद्रणत्रुटिशोधनम् | 45 |

# 1

# जीवन-संदेशः

मानवः प्राणिषु श्रेष्ठः। मानवेषु अपि ते एव धन्याः ये सदाचारेण जीवनं यापयन्ति। सत् आचारः अथवा सताम् आचारः एव सदाचारः भवति। सदाचरणस्य पालनाय विशेषः व्यवहारः अपेक्षितः भवति। सदाचारस्य नियमाः एव 'नीतिः' इति नाम्ना ज्ञायन्ते। नीतिपूर्वकम् आचरणेन अस्माकं जीवनं सुखमयं भवति। मानवस्य जीवने गुणानां महत्त्वम् अस्ति। अस्माकं भोजनं शुद्धं भवेत्। शुद्धभोजनेन मनः शुद्धं भवति, क्रोधस्य भावना शाम्यति। वयम् सुमधुरां वाणीं वदेम, अतिथेः आदरं कुर्याम, शास्त्राणाम् अध्ययनं कुर्याम, सन्तोषं धारयेम, धनं प्रति लुब्धाः भूत्वा पापं न आचरेम इत्येव अस्माकं वेदादिग्रन्थानाम् उपदेशः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- पाठगतपद्यानां सस्वरं पदच्छेदपूर्वकं च पाठं कर्तुं समर्थः भविष्यति;
- नीतिपद्यानाम् अन्वयं भावार्थं च लेखितुं शक्तः भविष्यति;
- पाठे प्रयुक्तानां सूक्तीनां लेखनं कर्तुं क्षमः भविष्यति;
- पाठे प्रदत्तभावानां समानान्तरपद्यानां चयनं कर्तुं शक्ष्यति;
- सन्धिसंयोगयोः मध्ये विभेदं कर्तुं समर्थः भविष्यति;
- पाठे विशेषणानि अवचित्य विशेष्यपदैः सह योजनं कर्तुं समर्थः भविष्यति;
- अकारान्त–पुल्लिङ्ग–नपुंसकलिङ्गशब्दानां रूपेषु भेदं कर्तुं समर्थः भविष्यति;
- पाठान्तर्गतशब्दानां पर्यायपदानि विलोमपदानि च लेखने समर्थः भविष्यति;
- दीर्घसन्धिपदानां चयनं करिष्यति।



टिप्पणी





## क्रियाकलापः

अधः कानिचित् वाक्यानि लिखितानि सन्ति। तानि प्रदत्तचित्राणाम् अधः लिखत।


(क) अहं समयेन विद्यालयं गच्छामि।

(ख) रात्रौ स्वाध्यायं करोमि।


(ग) प्रातः उत्थाय पितरौ प्रणमामि।

(घ) सायंकाले अशिक्षितान् पाठयामि।

(ङ) अहं प्रातः पंचवादने उत्तिष्ठामि।



1.1 ___________________________



1.2 ___________________________



1.3 ___________________________



1.4 ___________________________



1.5 ___________________________

## 1.1 मूल पाठः

### जीवन–सन्देशः

प्रथमं तावद्, इमान् श्लोकान् ध्यानेन पठामः।

पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।
अपूजितं तु तद्भुक्तमुभयं नाशयेदिदम्।।1।।

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।
जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्।।2।।

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।।3।।

सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम्।।4।।

अधमा धनमिच्छन्ति धनमानं च मध्यमाः।
उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।।5।।

यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः।
तस्य नित्यं क्षरत्येतत् पयो दधि घृतं मधु।।6।।

यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।
स वै सर्वमवाप्नोति वेदान्तोपगतं फलम्।।7।।

**शब्दार्थाः**

पूजितं = सम्मानित, आदरपूर्वक ग्रहण किया गया, अशनं = भोजन नित्यं = सदा, बलम् = ताकत ऊर्जम् = शक्ति को, ऊर्जा को कदर्यं = कंजूस को, अनृतम् = झूठ, तृणानि = तिनके (तिनकों (कुशा) आदि से बना आसन), भूमिः = स्थान, आश्रय, उदकं = जल, सूनृता वाक् = मीठी और सच्ची वाणी, सताम् = सज्जनों के, न उच्छिद्यन्ते = समाप्त नहीं होते, सन्तोषामृततृप्तानां = सन्तोष रूपी अमृत से तृप्त हुए लोगों का, शान्तचेतसाम् = शान्त चित्त वालों का, धनलुब्धानां = धन लोभियों का, इतः च इतः च धावताम् = इधर उधर दौड़ने वालों का, महतां = महान् लोगों का, स्वाध्यायम् = सद्ग्रन्थों का अध्ययन, शुचिः = पवित्र होकर, अधीते = पढ़ता है, अब्दं = वर्ष भर, नित्यं = सदा, क्षरति = देता है, पयः = दूध, दधि = दही, घृत = घी, मधु = शहद, वाङ्मनसी = वाणी और मन, सम्यक् = अच्छी तरह से, गुप्ते = रक्षित, आप्नोति = प्राप्त करता है, वेदान्तोपगतं फलम् = वेदान्त में वर्णित फल, सर्वदा = सदा

## 1.2 बोधप्रश्नाः

1. भवता मूलपाठः पठितः। सम्प्रति उदाहरणम् आधृत्य 'क' स्तम्भस्य वाक्यांशान् 'ख' स्तम्भस्य वाक्यांशैः सह रेखया योजयत।

| | स्तम्भः 'क' | स्तम्भः 'ख' |
|---|---|---|
| उदा0 | (क) तृणानि भूमिरुदकं → | (1) बलमूर्जं च यच्छति। |
| | (ख) पूजितं ह्यशनं नित्यम् | (2) वाक् चतुर्थी च सूनृता। |
| | (ग) एतान्यपि सतां गेहे | (3) विधिना नियतः शुचिः। |

(घ) अपूजितं तु तद् भुक्तम्      (4) नोच्छिद्यन्ते कदाचन।

(ङ) यः स्वाध्यायमधीतेऽब्दं      (5) उभयं नाशयेदिदम्।

2. अधः प्रदत्तेषु प्रत्येकं पदद्वयेन युक्तं उपयुक्तं पदं पाठात् चित्वा तत्समक्षं लिखत।

(क) भूमिः + उदकम् = ........................      (ख) न + उच्छिद्यन्ते = ....................

(ग) हि + अशनम् = ............................      (घ) च + अनृतम् = ..........................

(ङ.) मानः + हि = ...............................      (च) पयः + दधि = ............................

3. रिक्तस्थानानि पूरयत–

(क) एतान्यपि .......................... गेहे नोच्छिद्यन्ते कदाचन।

(ख) अधमाः धनमिच्छन्ति ......................... च मध्यमाः।

(ग) यस्य वाङ्मनसी ............................... सम्यग्गुप्ते च सर्वदा।

(घ) पूजितं ह्यशनं नित्यं ............. ऊर्जं च यच्छति।

---

## 1.3 अधुना अवगच्छामः

### प्रथमः अंशः

**श्लोकः– 1**

पूजितं ह्यशनं नित्यं
बलमूर्जं च यच्छति।
अपूजितं तु तद्भुक्तमुभयं
नाशयेदिदम्।।1।।

**प्रथमं श्लोकं** पुनः पठामः। अयं श्लोकः 'मनुस्मृतिः' इति ग्रन्थात् उद्धृतः।

**पदच्छेदः** पूजितम् हि अशनम् नित्यम् बलम् ऊर्जम् च यच्छति। अपूजितम् तु तद् भुक्तम् उभयम् नाशयेत् इदम्।

**अन्वयः**    पूजितम् हि अशनम् नित्यम् बलम् ऊर्जम् च यच्छति।
तत् अपूजितम् भुक्तम् तु इदम् उभयम् नाशयेत्।


**व्याख्या**

कीदृशं भोजनं हितं भवेत्? अस्मिन् पद्ये पठामः।

**पूजितं ह्यशनं नित्यं बलमूर्जं च यच्छति।**

नित्यं पूजितम् अशनं किं यच्छति? बलम् ऊर्जं च यच्छति।

कथम् यच्छति? यदि वयम् आदरेण, प्रसन्नमनसा रूक्षं शुष्कम् अपि भोजनम् भक्षयेम तद् भोजनम् अस्मभ्यं शक्तिं यच्छति किन्तु यदि अनादरेण स्वादिष्टं भोजनम् अपि भक्षयेम तद् भोजनं वृथा एव जायते।





अपूजितम् अशनं किं कुर्यात्? अपूजितम् अशनं बलम् ऊर्जं च नाशयेत्। अनेन भोजनेन शरीरे विकाराः जायन्ते।

### भोजनम्

आहारशुद्धौ सत्त्वसंशुद्धिः

(आहार की शुद्धि होने पर ही मन पवित्र होता है)

### भावार्थः

सम्मानेन भक्षितं रुक्षं रसहीनम् अपि अन्नं स्फूर्तिं शक्तिं च यच्छति किन्तु अनादरेण खादितं भोजनं शरीरस्य बलं वीर्यं च नाशयति।

### व्याकरणबिन्दवः

अत्र भवन्तः संयोगः कुत्र? सन्धिः च कुत्र? इति ज्ञायताम्

| | | | |
|---|---|---|---|
| ह्यशनम् | = | हि | + अशनम् (सन्धिः) |
| तद्भुक्तमुभयम् | = | तत् | + भुक्तम् (सन्धिः) |
| | | भुक्तम् | + उभयम् (संयोगः) |
| बलमूर्जम् | = | बलम् | + ऊर्जम् (संयोगः) |
| नाशयेदिदम् | = | नाशयेत् | + इदम् (सन्धिः) |

(संयोगे वर्णाः अन्यवर्णैः सह संयुज्यन्ते तत्र कश्चन विकारः न भवति असौ वर्णसंयोगः इति कथ्यते। किन्तु यदि पूर्वपदस्य अन्तिमवर्णः उत्तरपदस्य पूर्ववर्णेन सह मिलति तत्र किंचित् परिवर्तनं च भवति, तदा तत् 'सन्धिः' इति कथ्यते।)

### शाब्दबोधः

विपरीतार्थकः शब्दः

| | |
|---|---|
| पूजितम् | अपूजितम् |
| अशनम् | अनशनम् |
| भुक्तम् | अभुक्तम् |
| यच्छति | नाशयति |

### श्लोकः– 2

अक्रोधेन जयेत् क्रोधमसाधुं
साधुना जयेत्।
जयेत् कदर्यं दानेन
जयेत् सत्येन चानृतम्।।2।।

इदानीम् एव मनुना विरचितम् **द्वितीयं श्लोकम्** अवगच्छामः–

**पदच्छेदः** अक्रोधेन जयेत् क्रोधम् असाधुम् साधुना जयेत्। जयेत् कदर्यम् दानेन, जयेत् सत्येन च अनृतम्।

**अन्वयः** क्रोधम् अक्रोधेन जयेत्, असाधुम् साधुना जयेत्,
कदर्यम् दानेन जयेत्, अनृतम् च सत्येन जयेत्।



### व्याख्या

**क्रोधम् अक्रोधेन जयेत्**

क्रोधं कथं जयेत्? अक्रोधेन क्रोधं जयेत्। सौम्येन, सद्व्यवहारेण क्रोधं जयेत्। यदि कश्चित् भवते क्रोधं दर्शयति तस्मै क्रोधः न कर्तव्यः। शान्तव्यवहारेण तस्य क्रोधः शमयितव्यः।

**कदर्यं दानेन जयेत्**

कदर्यं कथं जयेत्? कदर्यं अर्थात् कृपणं दानेन जयेत्। कृपणः जनः संसारे केवलं संग्रहं करोति, न तु किंचित् कस्मैचित् ददाति। अयं तु जीवने नकारात्मकः भावः। अयम् भावः अपि शत्रुः मानवानाम्। कृपणताभावं दानं दत्त्वा दूरीकुर्यात्।

**अनृतं सत्येन जयेत् च**

अनृतं केन जयेत्? अनृतं सत्येन जयेत्। सत्यम् एव नित्यम्, सत्यस्य एव सदा जयः भवति। अतएव कथ्यते 'सत्यमेव जयते नानृतम्'।

सत्यस्य विषये महाभारते कथितम्– 'नास्ति सत्यात् परं दानं, नास्ति सत्यात् परं तपः।' तैत्तिरीय–उपनिषदि अपि कथितम्– 'सत्यान्न प्रमदितव्यम्।'

### भावार्थः

कोपं शान्तभावनया, दुष्टं सद्भावनया, कृपणं दानेन, असत्यं च सत्येन जयेत् इत्येव नीतिः।

### व्याकरणबिन्दवः

भवन्तः अत्र केषांचन पदानां परिचयम् बोधन्तु।

अक्रोधेन = न क्रोधः अक्रोधः, तेन अक्रोधेन, नञ् तत्पुरुषसमासः
साधुना = साधु शब्दः तृतीयाविभक्तिः, एकवचनम्
जयेत् = जि + विधिलिङ् + प्रथमपुरुषः, एकवचनम्
चानृतम् = च + अनृतम्, अ + आ = आ (दीर्घसन्धिः)


### श्लोकः– 3

तृणानि भूमिरुदकं
वाक् चतुर्थी च सूनृता।
एतान्यपि सतां गेहे
नोच्छिद्यन्ते कदाचन।।3।।

इदानीं **तृतीयं श्लोकं** पठामः जानीमः च सतां पार्श्वे किं भवति?

**पदच्छेदः** तृणानि भूमिः उदकम् वाक् चतुर्थी च सूनृता। एतानि अपि सताम् गेहे न उच्छिद्यन्ते।

**अन्वयः** तृणानि भूमिः उदकम् चतुर्थी च सनृता वाक् एतानि (चत्वारि) अपि सताम् गेहे कदाचन न उच्छिद्यन्ते।





## तृणानि भूमिः उदकं नोच्छिद्यन्ते कदाचन

सतां गेहे कति वस्तूनि न उच्छिद्यन्ते? (समाप्तानि भवन्ति) चत्वारि वस्तूनि।

कानि–कानि तानि? तृणानि, भूमिः, उदकम्, मधुरम् वाक् च।

कानि तृणानि? तृणानि अर्थात् कुशनिर्मितम् आसनम्। सज्जनाः आदरेण कुश–आसनं दत्त्वा अतिथीनां सम्मानं कुर्वन्ति।

पुनः किम्? भूमिः। अतिथीनां कृते सज्जनानां गृहे कदापि स्थानस्य आश्रयस्य वा अभावः न भवति।

पुनः किम्? उदकम्। जलमेव जीवनम्। सज्जनाः जलं दत्त्वा अभ्यागतानां पिपासां शमयित्वा तेषाम् आदरं कुर्वन्ति।

चतुर्थी किम्? सूनृता वाक्। प्रियं सत्यं च वचनम्। सज्जनाः अतिथीनाम् मानं प्रेम्णा उदित्वा (प्रेमवचसा) कुर्वन्ति।

### भावार्थः

सतां गेहेषु धनं भवेत् न वा भवेत् किन्तु तेषां गेहेषु आसनस्य, स्थानस्य, जलस्य, मधुरवाचः च कदापि अभावः न भवति। भारतीय–संस्कृतौ 'अतिथिदेवो भव' इति मन्यते। अतः सज्जनैः अतिथिः देवतावत् पूजनीयः भवति।

### व्याकरणबिन्दवः

अत्र पदानां परिचयः दत्तः वर्तते, वयम् बोधामः।

| | | | |
|---|---|---|---|
| तृणानि | = तृण शब्दः नपुं0, | प्रथमा वि0, | बहुवचनम् |
| वाक् | = वाक् शब्दः स्त्रीलिंग | प्रथमा वि0, | एकवचनम |
| सताम् | = सत् शब्दः | षष्ठी वि0, | बहुवचनम् |
| गेहेषु | = गेह शब्दः | सप्तमी वि0, | बहुवचनम् |
| एतानि | = एतत् शब्दः नपुं0 | प्रथमा वि0, | बहुवचनम् |
| नोच्छिद्यन्ते | = न + उच्छिद्यन्ते (अ + उ = ओ) (गुणसन्धिः) | | |
| कदाचन | = अव्ययपदम् | | |

### सन्धिः

वर्णानां परस्परमेलनेन ये विकाराः भवन्ति ते सन्धिः इति उच्यन्ते। सन्धिकरणाय प्रथमशब्दस्य अन्तिमः वर्णः द्वितीयशब्दस्य प्रथमेन वर्णेन सह मेल्यते। अतः द्वयोः वर्णयोः योगः एव सन्धिः।

**सन्धीनां त्रयः भेदाः–**

1. स्वरसन्धिः  च + अनृतम् = चानृतम्
2. व्यंजनसन्धिः  प्रसीदेत् + च = प्रसीदेच्च
3. विसर्गसन्धिः  भूमिः + उदकम् = भूमिरुदकम्

**स्वरसन्धेः भेदाः**

1. दीर्घसन्धिः 2. गुणसन्धिः 3. वृद्धिसन्धिः 4. यण्सन्धिः 5. अयादिसन्धिः

**अत्र वयं दीर्घसन्धिविषये पठामः**

(i) दीर्घसन्धिः – अकः सवर्णे दीर्घः

अ/आ + अ / आ = आ

च + अनृतम् = चानृतम्

विवेक + आनन्दः = विवेकानन्द :

(ii) इ/ई + ई / ई = ई

रजनी + ईशः = रजनीशः।

हरि + इच्छा = हरीच्छा

(iii) उ/ ऊ + उ / ऊ = ऊ

विष्णु + उदयः = विष्णूदय :

मधु + उर्मिः = मधूर्मिः

(iv) ऋ/ऋ + ऋ / ऋ = ॠ

होतृ + ऋकार = होतॄकारः

पितृ + ऋणम् = पितॄणम्

**शाब्दबोधः**

**विपरीतार्थकशब्दाः**

सुनृता  अनृता

सताम्  दुर्जनानाम्

**पर्यायवाचिनः शब्दाः**

भूमिः = पृथ्वी

वाक् = वाणी

गेहे = गृहे

सताम् = सज्जनानाम्

## सारः

आदरभाव से खाया गया भोजन शक्तिवर्धक होता है। क्रोध को शान्तभाव से, दुष्ट को सद्भाव से, कंजूस को दान से तथा असत्य को सत्य से जीतना चाहिए। सज्जनों के

## जीवन-संदेशः

घरों में अतिथि–सत्कार के लिए कुशा का आसन, आश्रय देने के लिए भूमि, पिलाने के लिए जल तथा सम्मान देने के लिए प्रिय और सच्ची वाणी की कमी नहीं होती।

## पाठगतप्रश्नाः 1.1

1. एकपदेन उत्तरत
   (क) क्रोधं केन जयेत्? ....................................................
   (ख) असाधुं केन जयेत्? ....................................................
   (ग) पूजितम् अशनं किम् यच्छति? ....................................................
   (घ) कीदृशम् अशनं बलम् ऊर्जं च नाशयति? ....................................................
2. पाठात् चित्वा अधोलिखितानां शब्दानां पर्यायवाचिपदानि दीयन्ताम्–
   (क) सज्जनानाम् ....................................... (घ) भोजनम् ...........................................
   (ख) समाप्यन्ते ....................................... (ङ) कृपणम् ...........................................
   (ग) वाणी ....................................... (च) कोपम् ...........................................
3. रिक्तस्थानेषु क्रियापदानि योजयत–
   (क) अशनं नित्यं ........................................ ।
   (ख) पूजितम् अशनं बलमूर्जं च ........................................ ।
   (ग) अपूजितम् अशनम् उभयं ........................................ ।
   (घ) अक्रोधेन क्रोधं ........................................ ।
   (ङ) एतानि सतां गेहे न ........................................ ।

## द्वितीयः अंशः

**श्लोकः– 4**

सन्तोषामृततृप्तानां यत्
सुखं शान्तचेतसाम्।
कुतस्तद्धनलुब्धानामितश्चेतश्च
धावताम्।।4।।

अधुनां **चतुर्थं श्लोकं** पठामः।

समाजे वयं पश्यामः यत् जनाः सदैव धनं प्राप्तुम् इच्छन्ति। किन्तु वास्तविकं सुखं शान्तिं च धनेन न प्राप्यते। सन्तोषम् एव परमं सुखम् भवति।

**पदच्छेदः** सन्तोषामृततृप्तानाम् यत् सुखम् शान्तचेतसाम् कुतः पदधनलुब्धानाम् इतः च इतः च धावताम्।

**अन्वयः** सन्तोषामृततृप्तानाम् शान्तचेतसाम् यत् सुखम् (भवति)
तत् (सुखं) इतः च इतः च धावताम् धनसुब्धानां कुतः?

व्याख्या–

<u>**सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।**</u>

सुखं कः प्राप्नोति? सः एव सुखं प्राप्नोति यस्य चित्तं शान्तम् भवति, यः च सन्तोषरूपिणा अमृतेन तृप्तः भवति। इच्छानां कदापि अन्तः न भवति। चंचलेन मनसा जनः सदा अशान्तः भवति। अतः सन्तोषः एव मनुष्यस्य परमं निधानम् कथितम्।

<u>**कुतस्तद् धनलुब्धानाम् इतश्च इतश्च धावताम्।**</u>

सुखं कः न लभते? धनलुब्ध इतः ततः धावन् जनः सुखं न लभते। धने सुखं नास्ति सुखं तु सन्तोषी जनः एव प्राप्नोति।

कथितम् एव ''सन्तोष एव पुरुषस्य परमनिधानम्।'' ''संतोषः परमं सुखम्।''

**भावार्थः**

सन्तोषरूपिणा अमृतेन ये तृप्ताः ते एव सुखं प्राप्नुवन्ति। इतः इतः धावतां धनलुब्धानां कृते तु सुखं नास्ति।

**व्याकरणबिन्दवः**

अत्र वयं सन्धियुक्तपदानां समस्तपदानां च बोधं कुर्मः।

| | |
|---|---|
| सन्तोषामृततृप्तानाम् | = सन्तोष + अमृततृप्तानाम् (अ + अ = आ – दीर्घसन्धिः) |
| कुतस्तद्धनलुब्धानाम् | = कुतः + तत् + धनलुब्धानाम्, विसर्गसन्धिः, व्यंजनसन्धिः |
| इतश्चेतश्च | = इतः + च + इतः + च, विसर्गसन्धिः, गुणसन्धिः, विसर्गसन्धिः |
| धनलुब्धानाम् | = धनेन लुब्धानाम् (तृतीया तत्पुरुषः) |
| शान्तचेतसाम् | = शान्तं चेतः येषां ते शान्तचेतसः; तेषाम् (बहुव्रीहिः) |
| सन्तोषामृततृप्तानाम् | = सन्तोषः एव अमृतम्, तेन तृप्ताः ये, तेषाम् (बहुव्रीहिः) |
| यत् | = यत् शब्दः नपुंसकलिंगं, प्रथमा विभक्तिः एकवचनम् |

**श्लोकः– 5**

**अधमा धनमिच्छन्ति**
**धनमानं च मध्यमाः।**
**उत्तमाः मानमिच्छन्ति**
**मानो हि महतां धनम्।।5।।**

भवन्तः किं जानन्ति यत् धन मानं वा के इच्छन्ति? एतदर्थं **पंचमं श्लोकं** पठामः।

**पदच्छेदः** अधमाः धनम् इच्छन्ति, धनमानम् च मध्यमाः। उत्तमाः मानम् इच्छन्ति मानः हि महताम् धनम्।

**अन्वयः** अधमाः धनम् इच्छन्ति, मध्यमाः धनम् मानम् च इच्छन्ति, उत्तमाः मानम् इच्छन्ति। महताम् मानः हि धनम् (भवति)

### व्याख्या

**अधमाः धनमिच्छन्ति धनमानं च मध्यमाः।**

के धनम् इच्छन्ति? अधमाः।

कथम्? अधमाः येन केन प्रकारेण केवलं धनं वा छन्ति। तेषां मते जीवनमूल्यानां किमपि महत्त्वं न वर्तते। ते तु केवलं धनम् इच्छन्ति।

मध्यमाः किम् वा छन्ति? मध्यमाः धनं च मानं च उभे वा छन्ति। ते धनं तु वा छन्ति किन्तु उचितेन प्रकारेण परिश्रमेण एव।

**उत्तमाः मानमिच्छन्ति मानो हि महतां धनम्।**

महताम् धनं किम्? महतां धनं तु केवलं सम्मानः भवति। धनं तु नश्वरं भवति। धनम् आगच्छति गच्छति च किन्तु जीवनमूल्यानि, सद्गुणाः, सद्भावनाः च शाश्वताः गुणाः सन्ति। उत्तमाः जनाः तु केवलं मानं वा छन्ति।

### भावार्थः

अधमाः केवलं धनम् इच्छन्ति, मध्यमाः धनं मानं च उभे वा छन्ति किन्तु उत्तमजनानां कृते तु मानम् एव धनम् वर्तते। अतः तेषां कृते मानम् एव अमूल्यं धनम् अस्ति।

### व्याकरणबिन्दवः

भवद्भिः अत्र विसर्गसन्धेः उदाहरणम्, पदपरिचयः च ज्ञायताम्

मानो हि = मानः + हि (विसर्गसन्धिः), अत्र विसर्गस्थाने 'उ' भवतिः ततः 'ओ' गुणः

महताम् = महत् शब्दः षष्ठी विभक्तिः बहुवचनम्

इच्छन्ति = 'इष्' धातुः + लट् लकारः प्र. पु. बहुवचनम्

### श्लोकः– 6

अधुना **षष्ठं श्लोकं** पुनः पठामः बोधामः च स्वाध्यायः कथं कर्तव्य।

**यः स्वाध्यायमधीतेऽब्दं**
**विधिना नियतः शुचिः।**
**तस्य नित्यं क्षरत्येष**
**पयो दधि घृतं मधु।।6।।**

**पदच्छेदः**– यः स्वाध्यायात् अधीते अब्दम् विधिना नियतः शुचिः। तस्य नित्यम् क्षरति एषः पयः दधिघृतम् मधु।

**अन्वयः**– यः नियतः शुचिः विधिना अब्दम् स्वाध्यायम् अधीते तस्य एव कृते एषः स्वाध्यायः नित्यम् पयः, दधि घृतम्, मधु (च) क्षरति।

**व्याख्या**–

भवतः विचारे स्वाध्यायं कथं कुर्यात्? स्वाध्यायं पवित्रं भूत्वा नियमपूर्वकम् वर्षपर्यन्तम् स्थिरः भूत्वा कुर्यात्।

अत्र एषः कस्मै प्रयुक्तः? एषः इति पदं स्वाध्याय इति कृते प्रयुक्तम्।

तस्मै किं किं क्षरति? यः स्वाध्यायं करोति तस्मै स्वाध्यायः दुग्धं दधि, घृतं मधु च सदा क्षरति अर्थात् ददाति। तस्य गृहे स्वास्थ्यवर्धकानां पदार्थानाम् कदापि अभावः न जायते।

स्वाध्यायविषये अन्यत्र अपि वर्णितम्

1. विद्यया स्फीयते ज्ञानं ज्ञानात् तत्त्वनिदर्शनम्
   दृष्टतत्त्वो विनीतात्मा सर्वार्थस्य च भाजनम्।
2. स्वाध्यायात् मा प्रमदः। (तैत्तिरीय–उपनिषद्)

**भावार्थः**

यः नियमपूर्वकं पवित्रं भूत्वा सद्ग्रन्थानाम् अध्ययनं करोति तस्य कृते स्वास्थ्यवर्धकानां पदार्थानां सदा उपलब्धिः जायते।

**व्याकरणबिन्दवः**

अत्र वयं पद्यगतपदानां सन्धिविच्छेदं कुर्मः

| | | | |
|---|---|---|---|
| अधीतेऽब्दम् | = अधीते + अब्दम् | ए + अ = एऽ | (पूर्वरूपसन्धिः) |
| क्षरत्येषः | = क्षरति + एषः | इ + ए = य् + ए = | ये (यणसन्धिः) |
| पयो दधि | = पयः + दधि | यः + द = य+उ+द= | (विसर्जनीयस्थाने उत्वम्) |

**शाब्दबोधः**

समानार्थकशब्दाः

अधीते = पठति

शुचिः = पवित्रः

अब्दं = वर्षम्

**श्लोकः– 7**

इदानीं वाचः मनसः च शुद्धतायाः विषये **सप्तमं श्लोकं** पठामः।

**यस्य वाड्.मनसी शुद्धे**
**सम्यग्गुप्ते च सर्वदा।**
**स वै सर्वमवाप्नोति**
**वेदान्तोपगतं फलम्।।7।।**

**पदच्छेदः** यस्यवाङ्मनसी शुद्धे, सम्यक् गुप्ते च सर्वदा। स वै सर्वम् अवाप्नोति वेदान्तोपगतम् फलम्।

**अन्वयः**– यस्य वाङ्मनसी शुद्धे सर्वदा च सम्यक् गुप्ते स वै सर्वम् वेदान्तोपगतम् फलम् अवाप्नोति।

**<u>यस्य वाड्.मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।</u>**

वाङ्मनसी कथं भवेताम्? वाङ्मनसी शुद्धे सम्यक् गुप्ते च भवेताम्।

वाङ्मनसी शुद्धे इत्यस्य कः अभिप्रायः? वाक् तपः तु सर्वोत्तमं तपः कथ्यते। जनः सदा प्रियं सत्यं वदेत् मितभाषी च भवेत्। तस्य मनः च शुद्धं भवेत्।

सम्यक् गुप्ते इत्यस्य कः अभिप्रायः? वाक् मनः च सुनियन्त्रितं कुर्यात्।

शुद्धवाङ्मनोयुक्तः जनः किम् आप्नोति? सः धर्म–अर्थ–काम–मोक्षरूपं सर्वं फलम् आप्नोति।

### भावार्थः

यस्य वाक् मनः च शुद्धे नियन्त्रिते च, सः वेदान्तशास्त्रे वर्णितं फलम् आप्नोति।

### व्याकरणबिन्दवः

अत्र पदानां सन्धिच्छेदं द्वन्द्वसमासस्यैकम् उदाहरणं च पश्यामः।

| | | |
|---|---|---|
| वाङ्मनसी = वाक् च मनः च = वाङ्मनसी | | (द्वन्द्वसमासः) |
| सम्यग्गुप्ते = सम्यक् + गुप्ते | क् + ग् = ग्ग् | (व्यंजनसन्धिः) |
| वेदान्तोपगतम् = वेद + अन्त + उपगतम् | | (दीर्घसन्धिः, गुणसन्धिः) |

### शाब्दबोधः

विपरीतार्थकाः शब्दाः

शुद्धम् = अशुद्धम्

सर्वदा = यदा कदा

गुप्तम् = अगुप्तम्

आप्नोति = ददाति

### सारः

सन्तोषी व्यक्ति सुख पाता है धनलोभी नहीं। निम्न श्रेणी के लोग केवल धन चाहते हैं, मध्यम धन एवं मान दोनों की कामना करते हैं किन्तु महान् लोगों का धन तो मान ही है। सद्ग्रन्थों का सतत अध्ययन करने वालों के लिए तो सभी स्वास्थ्य वर्धक पदार्थ सहज ही उपलब्ध रहते हैं। शुद्ध मन और वाणी वाले को वेदान्तशास्त्र में वर्णित फल मिलता है।

## पाठगतप्रश्नाः 1.2

1. विपरीतार्थान् मेलयत–

| | |
|---|---|
| (क) नित्यम् | (i) उत्तमाः |
| (ख) अधमाः | (ii) यच्छति |
| (ग) तृप्तानाम् | (iii) सताम् |
| (घ) दुष्टानाम् | (iv) यदा–कदा |
| (ङ) आप्नोति | (v) प्रकटे |
| (च) गुप्ते | (vi) लुब्धानाम् |

2. रिक्तस्थानेषु कर्मपदानि पाठात् चित्वा योजयत
   (क) यः ............................................. अधीते।
   (ख) सः वै ............................................ अवाप्नोति।
   (ग) सन्तोषामृततृप्ताः शान्तचेतसः ....................................... आप्नुवन्ति।
   (घ) अधमाः ............................................. इच्छन्ति।
   (ङ) उत्तमाः .................................. इच्छन्ति।
   (च) वाचा मनसा च शुद्धः नरः वेदान्तोपगतं .................................. आप्नोति।

3. निम्नलिखितेषु कथनेषु शुद्धं कथनं (✓) इति चिह्नेन अशुद्धं च (×) इति चिह्नेन चिह्नितं कुरुत–
   (क) अधमाः मानम् इच्छन्ति।
   (ख) कुत्सितमनसा युक्तः जनः वेदान्तोपगतं फलम् अवाप्नोति।
   (ग) मानो हि महतां धनम्।
   (ङ) शान्तचेताः जनः सुखम् आप्नोति।
   (घ) उत्तमाः धनं मानं च इच्छन्ति।
   (च) उत्तमाः मानम् इच्छन्ति।

## 1.4 किम् अधिगतम्

1. भोजनस्य सदा सम्मानः कर्तव्यः।
2. पूजितम् अशनं बलम् ऊर्जं च यच्छति।
3. सज्जनाः अतिथीनाम् आदरं कुर्वन्ति।
4. सत्येन असत्यम् जयेत्।
5. स्वाध्यायः कर्तव्यः।
6. वाङ्मनोभ्यां शुद्धः जनः सर्वम् आप्नोति।
7. सन्तोषी जनः सुखम् अवाप्नोति।
8. मानो हि महताम् धनम्।

9. सन्धि –संयोगयोः मध्ये विभेदः भवति।

10. अकारान्तपुल्लिंग–अकारान्त नपुंसकलिंगशब्दानां रूपेषु भेदः भवति।

11. दीर्घसन्धिः स्वरसन्धेः भेदः अस्ति।

## 1.5 योग्यताविस्तारः

### (क) सन्दर्भग्रन्थपरिचयः

1. **मनुस्मृतिः** मनुना निर्मितं मानवसमाजस्य प्रथमं संविधानम्। धर्मशास्त्रेषु प्राचीनतमः अयं ग्रन्थः। मनुस्मृतौ द्वादश (12) अध्यायाः, 2685 श्लोकाः च वर्तन्ते। प्रस्तुतपाठे श्लोकसंख्या 1, 2, 7, 8 मनुस्मृत्याः संकलिताः।
2. **विदुरनीतिः** महाभारतस्य उद्योगपर्वणि विदुरनीतिः वर्णिता। अस्मिन् ग्रन्थे मन्त्री विदुरः धृतराष्ट्राय नीतेः उपदेशं यच्छति। अस्मिन् ग्रन्थे अष्ट (8) अध्यायाः सन्ति। (संकलितश्लोकसंख्या – 3, 4)
3. **चाणक्यनीतिः** चाणक्यः चन्द्रगुप्तस्य महामन्त्री आसीत्। तेन प्रणीतः ग्रन्थः चाणक्यनीतिः अतीव महत्त्वपूर्णः, सम्पूर्णमानवजातेः लाभाय च वर्तते। अस्मिन् ग्रन्थे 17 अध्यायाः 340 श्लोकाः च सन्ति। अयं ग्रन्थः ज्ञानसागरः एव। (संकलितश्लोकसंख्या – 5, 6)

### (ख) भावविस्तारः

1. पूजितं ह्यशनम्– अन्नं सदा सम्माननीयम्। 'अन्नं वै ब्रह्म' इति उक्तम्। अन्नस्य उत्पादने, निष्पादने, प्रदाने च सर्वथा शुद्धिः भवेत्। श्रीकृष्णः दुर्योधनस्य व्यंजनानि विहाय विदुरस्य शाकम् अखादत्। यथा अन्नं तथा मनः। उक्तं च 'आहारशुद्धौ सत्त्वशुद्धिः'। दत्तम् अन्नं सदा सत्कृत्य एव भोक्तव्यम्।
2. सन्तोषामृततृप्तानां यत्सुखं– 'सन्तोषः' ईदृशः धनम् अस्ति येन जनः परमं सुखं लभेत्। सन्तोषः परमं सुखम्। धनस्य तृष्णा विशाला चेत् तर्हि कुतः सुखम्। उक्तं च भर्तृहरिणा–

   स तु भवति दरिद्रः यस्य तृष्णा विशाला।
   मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।
3. स्वाध्यायम्–स्वाध्यायस्य महत्त्वं पुरातनकालादेव प्रसिद्धम्। आचार्यः शिष्यम् उपदिशति स्म स्वाध्यायान्मा प्रमदः। 'तपःस्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्' इति। स्वाध्यायम् अस्माकं जीवनस्य प्रथमम् अङ्गम् आसीत्। स्वाध्यायेन एव ज्ञानवृद्धिः भवति।



### (ग) भाषा विस्तारः

संस्कृते त्रीणि लिंगानि सन्ति

(1) पुल्लिंगम् (2) स्त्रीलिंगम् (3) नपुंसकलिंगम्।

अत्र पाठे प्रयुक्तानाम् अकारान्तपुल्लिंगशब्दानाम्, अकारान्तनपुंसकलिंगशब्दानां रूपाणि दीयन्ते।

**शब्दसूची**

**अकारान्तपुंल्लिङ्गशब्दाः**

ऊर्जः – शक्ति

अक्रोधः – शान्ति

क्रोधः – गुस्सा

कदर्यः – कंजूस

सन्तोषः – सन्तोष

तृप्तः – तृप्त

धनलुब्धः – धन का लोभी

अधमः – नीच

मध्यमः – मध्यम

उत्तमः – उत्तम

मानः – सम्मान

स्वाध्यायः – वेदादि सद्ग्रन्थों का अध्ययन

**अकारान्तनपुंसकलिङ्गशब्दाः**

अशनम् – भोजनम्

बलम् – ताकत

दानम् – दान

सत्यम् – सत्य

अनृतम् – झूठ

धृतम् – घी

फलम् – फल

धनम् – धन

गेहम् – घर

**अकारान्तपुंल्लिङ्गशब्दाः (देववत्)**

**'देव' शब्दः**

| | **एकवचनम्** | **द्विवनचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम वि. | देवः | देवौ | देवाः |
| द्वितीया वि. | देवम् | देवौ | देवान् |

**बालक शब्दः**

| | **एकवचनम्** | **द्विवनचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम वि. | बालकः | बालकौ | बालकाः |
| द्वितीया वि. | बालकम् | बालकौ | बालकान् |

## (विभिन्नानाम् अकारान्तपुल्लिंगशब्दानां रूपाणि)

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा विभक्तिः | क्रोधः | क्रोधौ | अधमाः |
| | (एक क्रोध ने) | (दो क्रोध / क्रोधों ने) | (बहुत से अधम) |
| द्वितीया विभक्तिः | अधमम् | मध्यमौ | मध्यमान् |
| | (एक नीच को) | (दो मध्यमों को) | (सभी मध्यमों को) |
| तृतीया विभक्तिः | ऊर्जेन | ऊर्जाभ्याम् | अक्रोधैः |
| | (शक्ति के द्वारा) | (दो शक्तियों के द्वारा) | (शान्तियों के द्वारा) |
| चतुर्थी विभक्तिः | अक्रोधाय | कदर्याभ्याम् | कदर्येभ्यः |
| | (शान्ति के लिए) | (दो कंजूसों के लिए) | (सब कंजूसों के लिए) |
| पंचमी विभक्तिः | सन्तोषात् | सन्तोषाभ्याम् | तृप्तेभ्यः |
| | (सन्तोष से) | (दो सन्तोषों से) | (सभी तृप्त मनुष्यों से) |
| षष्ठी विभक्तिः | तृप्तस्य | उत्तमयोः | उत्तमानाम् |
| | (तृप्त मनुष्य का) | (दो उत्तम मनुष्यों का) | (सभी उत्तम मनुष्यों का) |
| सप्तमी विभक्तिः | माने | धनमानयोः | स्वाध्यायेषु |
| | (सम्मान में) | (धन और मान में) | (वेदादि ग्रन्थों में) |
| सम्बोधनम् | हे धनलुब्ध | हे धनलुब्धौ | हे उत्तमाः |
| | (हे धन के लोभी) | (हे धन के लोभी दो पुरुषो) | (हे उत्तम व्यक्तियो) |

## अकारान्तनपुंसकलिङ्गशब्दानाम् रूपाणि (फलवत्)

### फल शब्द

| | एकवचनम् | द्विवनचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा वि.** | फलम् | फले | फलानि |
| **द्वितीया वि.** | फलम् | फले | फलानि |

### अशन शब्द

| | एकवचनम् | द्विवनचनम् | बहुवचनम् |
|---|---|---|---|
| **प्रथमा वि.** | अशनम् | अशने | अशनानि |
| **द्वितीया वि.** | अशनम् | अशने | अशनानि |


**विशेषः**— एवमेव दान–घृत पुष्पादिशब्दानां रूपाणि भवन्ति।

## 1.6 पाठान्तप्रश्नाः

1. पूर्णवाक्येन उत्तरत
   (क) उत्तमाः किम् इच्छन्ति?
   (ख) सन्तोषी जनः किं प्राप्नोति?
   (ग) धनमानं के इच्छन्ति?
   (घ) यः विधिना अब्दपर्यन्तं स्वाध्यायं करोति तस्य कृते किं किं क्षरति?
   (ङ) असाधुं कथं जयेत्?
   (च) दानेन कम् जयेत्?
2. अधोलिखितयोः वाक्यांशयोः उचितं भावार्थं चिनुत–
   (क) पूजितं ह्यशनम्–
      (i) धूपदीपादिभिः पूजितम् भोजनम्
      (ii) सम्मानितं भोजनम्
      (iii) सुस्वादु भोजनम्
   (ख) सन्तोषामृततृप्तानाम्–
      (i) सन्तोषेण अमृतेन च तृप्तानाम्
      (ii) अमृतपानेन सन्तुष्टानाम्
      (iii) सन्तोषरूपिणा अमृतेन तृप्तानाम्
3. अधः प्रदत्तपङ्क्तीनाम् आशयं स्पष्टीकुरुत–
   (क) एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन।
   (ख) सन्तोषामृततृप्तानां यत् सुखं शान्तचेतसाम्।
   (ग) मानो हि महतां धनम्।
   (घ) यस्य वाङ्मनसी शुद्धे सम्यग्गुप्ते च सर्वदा।
4. 'जीवनसन्देशः' पाठमाधृत्य कानिचित् प च जीवनमूल्यानि प चवाक्येषु लिखत।
5. अधोलिखिते उदाहरणे अनुसृत्य कोष्ठके सन्धिः अस्ति अथवा संयोगः इति चिह्नीकुरुत–

   *यथा–(i) नोच्छिद्यन्ते, न + उच्छिद्यन्ते न् + अ + उ = नो (सन्धिः)*
   *(ii) सतामेतानि, सताम् + एतानि म् + ए = मे (संयोगः)*

   (i) ह्यशनम् = हि + अशनम् इ + अ = य (सन्धिः / संयोगः)
   (ii) नाशयेदिदम् = नाशयेत् + इदम् त् + इ = दि (सन्धिः / संयोगः)





(iii) बलमूर्जम् = बलम् + ऊर्जम् म् + ऊ = मू (सन्धिः / संयोगः)

(iv) पूजयेदशनम् = पूजयेत् + अशनम् त् + अ = द (सन्धिः / संयोगः)

(v) मानमिच्छन्ति = मानम् + इच्छन्ति म् + इ = मि (सन्धिः / संयोगः)

(vi) धनमिच्छन्ति = धनम् + इच्छन्ति म् + इ = मि (सन्धिः / संयोगः)

6. अधः अकारान्तशब्दाः प्रदत्ताः सन्ति। तेषु पुल्लिंङ्ग–नपुसंकलिङ्गशब्दान् पृथक्कृत्य लिखत–

क्रोध, बल, दान, सन्तोष, ऊर्ज, धन, गेह, उत्तम

7. अधोलिखितपदानां संन्धिविच्छेदं कृत्वा सन्धिनाम अपि लिखत–

चानृतम्, नोच्छिद्यन्ते, ह्यशनम्, वेदान्तोपगतम्

8. पद–परिचयः देयः–

(क) महताम्, (ख) तृणानि, (ग) इच्छन्ति

## 1.7 उत्तराणि

### 1.3 बोधप्रश्नानाम् उत्तराणि

1. (क) 2, (ख) 1, (ग) 4, (घ) 5, (ङ) 3

2. (क) भूमिरुदकं (ख) नोच्छिद्यन्ते (ग) ह्यशनम्
(घ) चानृतम् (ङ) मानो हि (च) पयो दधि

3. क. सतां, ख. धनमानं ग. शुद्धे घ. बलम्

### पाठगतप्रश्नानाम् उत्तराणि

**1.1** 1. (क) अक्रोधेन (ख) साधुना (ग) बलमूर्जम्
(घ) अपूजितम्

2. (क) सताम् (ख) उच्छिद्यन्ते (ग) वाक्
(घ) अशनम् (ङ) कदर्यम् (च) क्रोधम्

3. (क) पूजयेत् (ख) यच्छति (ग) नाशयेत्
(घ) जयेत् (ङ) उच्छिद्यन्ते

**1.2** 1. (क) 4 (ख) 1 (ग) 6 (घ) 3 (ङ) 2 (च) 5

2. (क) स्वाध्यायम् (ख) सर्वम् (ग) सुखम्
(घ) धनम् (ङ.) मानम् (च) फलम्

3. (क) ×　　(ख) ×　　(ग) ✓
(घ) ×　　(ङ.) ✓　　(च) ✓

**1.6 पाठान्तप्रश्नानाम् उत्तराणि**

1. (क) उत्तमाः मानम् इच्छन्ति।
   (ख) सन्तोषी जनः सुखं शान्तिं च प्राप्नोति।
   (ग) मध्यमाः धनमानं इच्छन्ति।
   (घ) यः विधिना अब्दपर्यन्तं स्वाध्यायं करोति तस्य गृहे पयः, दधि, घृतं मधु च क्षरन्ति।
   (ङ) असाधुं साधुना जयेत्।
   (च) दानेन कदर्यं जयेत्।
2. क–(ii),　　ख–(iii)
3. तत्रैव पद्यानां व्याख्याप्रसङ्गे पठित्वा लेखनीयानि।
4. स्वयमेव पाठानुसारं प च वाक्यानि रचयत।
5. (i) सन्धिः　　(ii) सन्धिः　　(iii) संयोगः
   (iv) सन्धिः　　(v) संयोगः　　(vi) संयोगः
6. पुं. क्रोध, सन्तोष, ऊर्ज, उत्तम
   नपुं. बल, दान, धन, गेह
7. च + अनृतम् (दीर्घ)
   न + उच्छिद्यन्ते (गुण)
   हि + अशनम् (यण्)
   वेद + अन्त + उपगतम् (दीर्घ–गुण)
8. (क) महत्, पुं. ष. वि. ब. व.
   (ख) तृण, नपुं. प्र. द्वि. ब. व
   (ग) इष्, धातु, लङ्, लट् प्र. पु. ब. व.

# 2

# यदि जानासि तद् वद

अस्ति काचित् मधुरस्मृतिः बाल्यावस्थायाः, यदा शयनकाले भवतः पितामही/मातामही कथाः कथयति स्म, प्रश्नान् प्रहेलिकाः च पृच्छति स्म? नूनम् कथाभिः प्रश्नैः, प्रहेलिकाभिः च अस्माकं ज्ञानं वर्धते, बुद्धिः तीव्रा भवति, मनोरंजनम् अपि जायते। इमाः प्रहेलिकाः विश्वस्य सर्वासु भाषासु येन केन अपि रूपेण उपलभ्यन्ते। संस्कृतभाषायाः साहित्यम् अतिसमृद्धं वर्तते। संस्कृतसाहित्ये अनेकाः प्रहेलिकाः संकलिताः सन्ति। अस्मिन् पाठे वयं काश्चन प्रहेलिकाः प्रक्ष्यामः उत्तरं ज्ञातुं च प्रयत्नं कुर्मः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्–

- प्रहेलिकाः बोद्धुं समर्थः भविष्यति;
- प्रहेलिकानां गूढार्थं ज्ञात्वा उत्तराणि दातुं क्षमः भविष्यति
- श्लिष्टपदानाम् अर्थबाहुल्यं स्पष्टीकर्तुं योग्यः भविष्यति;
- किम्, यत्, तत्, एतत्, युष्मद्, अस्मद् सर्वनामशब्दानां रूपाणि चेष्यति;
- विभिन्नसंज्ञापदानां पर्यायवाचिनः लेखितुं प्रभविष्यति;
- इन् प्रत्ययान्तपदानां, त्रिषु लिंगेषु रूपभेदं परिचेष्यति;
- कर्तृपदैः सह क्रियापदानि मेलयितुं शक्तः भविष्यति।
- आकारान्तस्त्रीलिङ्गः ईकारान्तस्त्रीलिङ्गपदानां प्रयोगं करिष्यति।

## क्रियाकलापः

| | | |
|---|---|---|
| द्वे | | षट् |
| | पञ्च | एकम् |
| चत्वारि | त्रीणि | |

उपर्युक्ततालिकायां त्रिषु कोष्ठकेषु रिक्तस्थानानि सन्ति। तत्र प्रत्येकं कोष्ठकेषु एतादृशी संख्या लेखनीया येन एतेषाम् अंकानां योगः उपरिष्टात् अधः (↓) अधस्तात् उपरि (↑), वामतः दक्षिणम् (→), दक्षिणतः वामम् (←) तिर्यक्रूपेण (×) सर्वत्र 15 पञ्चदश भवेत्।

## 2.1 मूलपाठः

### यदि जानासि तद् वद

शोभनः अयं बुद्धिविलासः। अस्मिन् पाठे वयम् बौद्धिकविलासाय प्रहेलिकाः पठिष्यामः


कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्,
किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायनम्।।1।।

युधिष्ठिरः कस्य पुत्रो, गंगा वहति कीदृशी
हंसस्य शोभा का वास्ति, धर्मस्य त्वरिता गतिः ।।2।।

वृक्षाग्रे फलं दृष्टं, फलाग्रे वृक्ष एव च,
अकारादिसकारान्तं, जानाति स पण्डितः ।।3।।

अपूर्वोऽयं मया दृष्टः, कान्तः कमललोचने,
शोऽन्तरं यो विजानाति स विद्वान्नात्र संशयः।।4।।

शब्दार्थाः
कस्मात् = किससे
हन्ति = मारता है,
करिणां = हाथियों के,
कातरः = कायर,
त्वरिता = तेज़,
वृक्षाग्रे = वृक्ष के आगे
फलाग्रे = फल के आगे
अकारादि = 'अ' से प्रारम्भ
सकारान्तम् = 'स' अन्त में है जिसके
अपूर्वः = 'अ' शुरू में
कान्तः = 'का' अन्त में
शोऽन्तरं = 'शो' बीच में,





नित्यं रथेन गच्छामि, अश्वा वहन्ति मे रथम्,
सम्राडस्मि नरो नास्मि, नासुरोऽस्मि निशाचरः ।।5।।

सदारिमध्यापि न वैरियुक्ता,
नितान्तरक्ताऽपि सितैव नित्यम्,
यथोक्तवादिन्यपि नैव दूती,
का नाम कान्तेति निवेदयाशु।।6।।

अनेकसुशिरं वाद्यं कान्तं च ऋषिसंज्ञितम्,
चक्रिणा च सदाराध्यं, यो जानाति, स पण्डितः।।7।।

न तस्यादिर्न तस्यान्तो मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति, यदि जानासि, तद्वद।।8।।

सम्राट् = विशेष चमकदार
असुरः = प्राणदाता
निशाचरः = राक्षस
रिमध्या = 'रि' बीच में
नितान्तरक्ता = अति अनुरक्त
रक्ता = अनुरक्ता
सिता = सफेद
यथोक्तवादिनी = जैसा कहा गया वैसा ही बोलने वाली,
कान्ता = 'क' है अन्त में जिसके
आशु = शीघ्र
अनेकसुशिरं = अनेक सुन्दर शिखरों वाला
वाद्यम् = 'व' है शुरू में, जिसके
कान्त = 'क' है अन्त में, जिसके
आराध्यम् = पूजने योग्य
'न' तस्यादिः = न उसके आदि में,
तस्यान्ते = न उसके अन्त में
मध्ये यः = मध्य में य,
तव = तुम्हारे
मम = मेरे

## 2.2 बोधप्रश्नाः

1. पाठं पठित्वा सम्बद्धान् पद्यांशान् मेलयत—

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| यथा (अ) कस्तूरी जायते कस्मात् | (i) अश्वाः वहन्ति मे रथम्। |
| (आ) अनेकसुशिरं वाद्यम् | (ii) मध्ये यस्तस्य तिष्ठति। |
| (इ) नित्यं रथेन गच्छामि | (iii) को हन्ति करिणां कुलम् |
| (ई) न तस्यादिर्न तस्यान्तः | (iv) कान्तः कमललोचने, |
| (उ) वृक्षाग्रे फलं दृष्टम् | (v) कान्तं च ऋषिसंज्ञितम् |
| (ऊ) अपूर्वोऽयं मया दृष्टः | (vi) फलाग्रे वृक्ष एव च |

2. क्रियापदैः रिक्तस्थानानि पूरयत

(क) किं ––––––कातरो युद्धे?

(ख) गंगा ––––– कीदृशी?

(ग) का नाम कान्तेति ––– आशु।



टिप्पणी



(घ) यो———— स पण्डितः।

(ङ) सम्राट् ———— नरः न ——।

(च) मध्ये यः तस्य ————।

3. उपयुक्तम् उत्तरम् चिह्नीकुरुत–

| प्रश्नाः | उत्तराणि |
|---|---|
| यथा – कस्तूरी कस्मात् जायते? | सिंहात्/मृगात् |
| (क) हंसस्य शोभा का? | गतिः/मतिः |
| (ख) युधिष्ठिरः कस्य पुत्रः? | सूर्यस्य/धर्मस्य |
| (ग) करिणां कुलं कः हन्ति? | सिंहः/व्याघ्रः |
| (घ) कातरः युद्धे किं कुर्यात्? | युद्धं/पलायनम् |
| (ङ) गंगा कीदृशी वहति? | मन्दा/त्वरिता |

## 2.3 अधुना अवगच्छामः

### प्रथमः अंशः

**श्लोक–1**

कस्तूरी जायते कस्मात्,
को हन्ति करिणां कुलम्,
किं कुर्यात् कातरो युद्धे,
मृगात् सिंहः पलायनम्।।1।।

**प्रथमं श्लोकं** पुनः पठामः। प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति।

**पदच्छेदः** कस्तूरी जायते कस्मात्, कः हन्ति करिणाम् कुलम्।
किं कुर्यात् कातरः युद्धे, मृगात् सिंहः पलायनम्।।

**अन्वयः**– कस्तूरी कस्मात् जायते? मृगात्। कः करिणाम् कुलम् हन्ति? सिंहः। कातरः युद्धे किम् कुर्यात्? पलायनम्।


**व्याख्या**

(i) अस्याम् प्रहेलिकायां त्रयः प्रश्नाः सन्ति। कस्तूरी कस्मात् उत्पन्ना भवति? इति प्रथमः प्रश्नः। अस्य उत्तरम् अन्तिमे चरणे अस्ति–मृगात्, हरिणात् अर्थात् कस्तूरी हरिणात् जायते।

(ii) कः करिणां कुलं हन्ति? = इति द्वितीयः प्रश्नः अत्र हन्ति इति क्रियापदम्

| | |
|---|---|
| कः हन्ति? | सिंहः |
| कं हन्ति? | करिणाम् कुलम् |

(iii) कातरः युद्धे किं कुर्यात्? इति तृतीयः प्रश्नः। पलायनम्, धावनम् कुर्यात्।



टिप्पणी

यः भीरुः अस्ति, युद्धं कर्तुं भीतः भवति सः तु युद्धक्षेत्रात् पलायनम् करोति। अर्थात् भीरुः जनः कदापि युद्धं कर्तुम् उद्यतः न भवति।

अन्तिमे पादे किम् वैचित्र्यम्? 'मृगात् सिंहः पलायनम् (कुर्यात्)' अर्थात् सिंहः हरिणं दृष्ट्वा धावति इत्यर्थः अत्र प्रतीयते। परन्तु वस्तुतः एतानि पदानि त्रयाणां प्रश्नानाम् उत्तराणि सन्ति।

**श्लोक–2**

युधिष्ठिरः कस्य पुत्रो,
गंगा वहति कीदृशी;
हंसस्य शोभा का वास्ति,
धर्मस्य त्वरिता गतिः ।।2।।

अधुना **द्वितीयं श्लोकं** पुनः पठामः। प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति इति बोधामः।

**पदच्छेदः** युधिष्ठिरः कस्य पुत्रः, गंगा वहति कीदृशी।
हंसस्य शोभा का वा अस्ति, धर्मस्य त्वरिता गतिः।।


**अन्वयः** युधिष्ठिरः वै कस्य पुत्रः–धर्मस्य, गंगा कीदृशी वहति– त्वरिता, वा हंसस्य शोभा का अस्ति = गतिः।।

**व्याख्या**– अत्रापि त्रयः प्रश्नाः, तेषाम् उत्तराणि अन्तिमे चरणे दत्तानि। एवं प्रतीयते यत् हंसस्य शोभा का इति प्रश्नस्य उत्तरम् अस्ति– धर्मस्य त्वरिता गतिः परन्तु एवं नास्ति। एतानि त्रीणि पदानि त्रयाणां प्रश्नानाम् उत्तराणि एव। अर्थात्

(i) धर्मराजस्य पुत्रः युधिष्ठिरः,
(ii) गंगा तीव्रगत्या वहति,
(iii) हंसस्य शोभा तस्य गतिः एव अस्ति, यतः हंसस्य गतिः प्रसिद्धा वर्तते।

अत्र एकः अन्यः अपि भावः प्रतीयते– धर्मस्य त्वरिता गतिः, अर्थात् धर्मपरायणजनस्य शीघ्रं कल्याणं भवति। वस्तुतः एतानि त्रीणि पदानि पृष्टानां प्रश्नानाम् उत्तराणि एव सन्ति।

**श्लोक–3**



वृक्षाग्रे फलं दृष्टं,
फलाग्रे वृक्ष एव च,
अकारादिसकारान्तं,
जानाति स पण्डितः ।।3।।

अधुना **तृतीयां** प्रहेलिकां पठामः।

**पदच्छेदः** वृक्षाग्रे फलम् दृष्टम्, फलाग्रे वृक्षः एव च।
अकारादिसकारान्तम्, जानाति सः पण्डितः।

**अन्वयः** वृक्षाग्रे फलम् दृष्टम्, फलाग्रे वृक्षः एव च। अकारादिसकारान्तम्, (यः) जानाति सः पण्डितः।।

**व्याख्या**

एतत् किं फलं यस्य नाम्नः आदौ अकारः, अन्ते सकारः भवति? तत् फलं वृक्षे लगति। तस्य फलस्य अग्रे पुनः वृक्षवत् पत्राणि भवन्ति। एतत् तु 'अनानास' इति फलम् एव।




टिप्पणी

अपूर्वोऽयं मया दृष्टः
कान्तः कमललोचने।
शोऽन्तरं यो विजानाति
स विद्वान्नात्र संशयः।।4।।

**श्लोक–4**

सम्प्रति प्रहेलिकायां **चतुर्थं पद्यं** पठामः।

**पदच्छेदः** अपूर्वः अयम् मया दृष्टः कान्तः कमललोचने।
शो अन्तरम् यः विजानाति सः विद्वान् न अत्र संशयः।।



**अन्वयः** (हे) कमललोचने मया अयम् अपूर्वः कान्तः दृष्टः। यः शोऽन्तरम् (इमं) विजानाति स विद्वान् (अस्ति) अत्र संशयः न (अस्ति)।

**व्याख्या–** कमललोचने– कमलम् इव लोचने यस्याः सा (बहुव्रीहिःसमासः) सम्बोधने एकवचने रूपम् अर्थात् हे कमलनेत्रे।

अपूर्वः – अकारः पूर्वे यस्य सः/ अद्भुतः

कान्तः– ककारः अन्ते यस्य सः/ प्रियः, सुन्दरः

अन्तरम् किम्? मध्यम्

शोऽन्तरम् – शो मध्ये यस्य सः शोऽन्तरः तम्, संशयः– संदेहः

हे कमललोचने–सुलोचने! मया अयं वृक्षः दृष्टः यस्य आदौ अकारः वर्तते अन्ते ककारः वर्तते मध्ये च 'शो' इति वर्तते। जानासि किम्, सः कः वृक्षः? सः 'अशोकः' इति वृक्षः यः एवं जानाति स विद्वान् कथ्यते। अस्मिन् विषये संदेहः नास्ति।

अत्र अपूर्वः कान्तः इत्येतौ शब्दौ अद्भुतः प्रियः इत्येताभ्याम् अर्थाभ्यां तु भ्रमम् उत्पादयतः। अतः एतौ अर्थौ अत्र न विचारणीयौ स्तः। अस्याः प्रहेलिकायाः उत्तरम् अशोकः इति नाम वृक्षः।

**भावार्थः**

अशोकः वृक्षः अद्भुतः, सुन्दरः च भवति। अस्याः प्रहेलिकायाः उत्तरम् 'अशोकः' इति यः जानति स विद्वान् अस्ति; अस्मिन् विषये संदेहः नास्ति।

## सारः

प्रथम अंश में चार पहेलियाँ हैं। इन्हीं पहेलियों में उत्तर भी समाविष्ट हैं जैसे कस्तूरी किससे पैदा होती है? हरिण से। हाथियों के कुल को कौन मार सकता है? सिंह। कायर युद्ध में पलायन करता है। इसी प्रकार दूसरी पहेली में बताया गया है कि युधिष्ठिर धर्म के पुत्र हैं, गंगा तीव्र गति से बहती है, हंस की शोभा चाल से है। तीसरी पहेली अनानास का वर्णन करती है। वृक्ष के आगे फल है और फल के आगे फिर वृक्ष ही है। उस शब्द का 'अ' से प्रारम्भ होता है और 'स' से अन्त। इसी प्रकार चौथी पहेली 'अशोक' शब्द को लेकर बनाई गई है। इसके प्रारम्भ में 'अ' है, 'शो' मध्यम में है तथा 'क' अन्त में है। पदों के दो–दो अर्थों से चमत्कार पैदा हुआ है।

## व्याकरणबिन्दवः

किम् प्रश्नवाचकं सर्वनामपदम्। अस्य रूपाणि त्रिषु लिङ्गेषु चलन्ति, पुल्लिङ्गे, स्त्रीलिङ्गे, नपुंसकलिङ्गे च कानिचित् सर्वनामशब्दानां रूपाणि जानीमः।

| | 'किम्' पुंल्लिङ्गम् | | | 'किम्' स्त्रीलिङ्गम् | | | 'किम्' नपुंसकलिङ्गम् | | |
|---|---|---|---|---|---|---|---|---|---|
| **विभक्तिः** | **एक व.** | **द्वि.व.** | **बहु व.** | **एक व.** | **द्वि.व.** | **बहु व.** | **एक व.** | **द्वि.व.** | **बहु व.** |
| **प्रथमा** | कः | कौ | के | का | के | काः | किम् | के | कानि |
| **द्वितीया** | कम् | कौ | कान् | काम् | के | काः | किम् | के | कानि |
| **तृतीया** | केन | काभ्याम् | कैः | कया | काभ्याम् | काभिः | शेषरूपाणि पुल्लिङ्गवत् | | |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्यः | कस्यै | काभ्याम् | काभ्यः | | | |
| **पंचमी** | कस्मात् | काभ्याम् | केभ्यः | कस्याः | काभ्याम् | काभ्यः | | | |
| **षष्ठी** | कस्य | कयोः | केषाम् | कस्याः | कयोः | कासाम् | | | |
| **सप्तमी** | कस्मिन् | कयोः | केषु | कस्याम् | कयोः | कासु | | | |

एवम् एव यत्, तत्, एतत् सर्वनामशब्दानाम् रूपाणि चलन्ति।

| | | **पुल्लिङ्गे** | | | **स्त्रीलिङ्गे** | | |
|---|---|---|---|---|---|---|---|
| सर्वनाम | विभक्तिः | एक व0 | द्वि व0 | बहु व0 | एक व0 | द्वि व0 | बहु व0 |
| यत् | प्रथमा | यः | यौ | ये | या | ये | याः |
| तत् | प्रथमा | सः | तौ | ते | सा | ते | ताः |
| एतत् | प्रथमा | एषः | एतौ | एते | एषा | एते | एताः |
| यत् | द्वितीया | यम् | यौ | यान् | याम् | ये | याः |
| तत् | द्वितीया | तम् | तौ | तान् | ताम् | ते | ताः |
| एतत् | द्वितीया | एतम् | एतौ | एतान् | एताम् | एते | एताः |
| यत् | तृतीया | येन | याभ्याम् | यैः | यया | याभ्याम् | याभिः |
| तत् | तृतीया | तेन | ताभ्याम् | तैः | तया | ताभ्याम् | ताभिः |
| एतत् | तृतीया | एतेन | एताभ्याम् | एतैः | एतया | एताभ्याम् | एताभिः |
| यत् | चतुर्थी | यस्मै | याभ्याम् | येभ्यः | यस्यै | याभ्याम् | याभ्यः |
| तत् | चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः | तस्यै | ताभ्याम् | ताभ्यः |
| एतत् | चतुर्थी | एतस्मै | एतभ्याम् | एतेभ्यः | एतस्यै | एताभ्याम् | एताभ्यः |
| यत् | पंचमी | यस्मात् | याभ्याम् | येभ्यः | यस्याः | याभ्याम् | याभ्यः |
| तत् | पंचमी | तस्मात् | ताभ्याम् | तेभ्यः | तस्याः | ताभ्याम् | ताभ्यः |
| एतत् | पंचमी | एतस्मात् | एताभ्याम् | एतेभ्यः | एतस्याः | एताभ्याम् | एताभ्यः |







| | | | | | | | |
|---|---|---|---|---|---|---|---|
| यत् | षष्ठी | यस्य | ययोः | येषाम् | यस्याः | ययोः | यासाम् |
| तत् | षष्ठी | तस्य | तयोः | तेषाम् | तस्याः | तयोः | तासाम् |
| एतत् | षष्ठी | एतस्य | एतयोः | एतेषाम् | एतस्याः | एतयोः | एतासाम् |
| यत् | सप्तमी | यस्मिन् | ययोः | येषु | यस्याम् | ययोः | यासु |
| तत् | सप्तमी | तस्मिन् | तयोः | तेषु | तस्याम् | तयोः | तासु |
| एतत् | सप्तमी | एतस्मिन् | एतयोः | एतेषु | एतस्याम् | एतयोः | एतासु |

**नपुंसकलिङ्गे**


| | विभक्तिः | एक व0 | द्वि व0 | बहु व0 |
|---|---|---|---|---|
| यत् | प्रथमा | यत् | ये | यानि |
| तत् | प्रथमा | तत् | ते | तानि |
| एतत् | प्रथमा | एतत् | एते | एतानि |
| यत् | द्वितीया | यत् | ये | यानि |
| तत् | द्वितीया | तत् | ते | तानि |
| एतत् | द्वितीया | एतत् | एते | एतानि |

शेष रूपाणि पुल्लिंङ्गवत्

| | अस्मद् शब्दः | | | युष्मद् शब्दः | | |
|---|---|---|---|---|---|---|
| विभक्तिः | एक व. | द्वि व. | बहु व, | एक व. | द्वि व. | बहु व, |
| प्रथमा | अहम् | आवाम् | वयम् | त्वम् | युवाम् | यूयम् |
| द्वितीया | माम् | आवाम् | अस्मान् | त्वाम् | युवाम् | युष्मान् |
| तृतीया | मया | आवाभ्याम् | अस्माभिः | त्वया | युवाभ्याम् | युष्माभिः |
| चतुर्थी | मह्यम् (में) | आवाभ्याम् | अस्मभ्यम् | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पंचमी | मत् | आवाभ्याम् | अस्मत् | त्वत् | युवाभ्याम् | युष्मत् |
| षष्ठी | मम (में) | आवयोः | अस्माकम् | तव | युवयोः | युष्माकम् |
| सप्तमी | मयि | आवयोः | अस्मासु | त्वयि | युवयोः | युष्मासु |

## पाठगतप्रश्नाः 2.1

1. एकपदेन उत्तरत
   (क) कस्तूरी कस्मात् जायते? _____________
   (ख) युधिष्ठिरः कस्य पुत्रः _____________
   (ग) अनानासशब्दे आदौ कः वर्णः? _____________





(घ) 'अशोकः' इति पदे अन्ते कः वर्ण भवति? ——————————

(ङ) कस्य फलस्य अग्रे पर्णानि भवन्ति? ——————————

2. विग्रहान् योजयित्वा समस्तपदं रचयत

(क) फलस्य अग्रे = ——————————

(ख) वृक्षस्य अग्रे = ——————————

(ग) 'अ' पूर्वे यस्य सः = ——————————

(घ) शो मध्ये यस्य सः = ——————————

(ङ) युधि स्थिरः = ——————————

(च) 'क' अन्ते यस्य सः = ——————————

3. अन्वयं पूरयत

(क) हे कमललोचने! मया अयम् (i)———— कान्तः (ii)———— यः (iii)———— विजानाति, सः (iv)—————— अस्ति, अत्र (v)—————— न (अस्ति)

(ख) वृक्षाग्रे (i)—————— दृष्टम् (ii)———————— वृक्षः एव च। अकारादि सकारान्तम् (iii)——————— जानाति (iv)—————— पण्डितः ।।

---

## द्वितीयः अंशः

### श्लोक–5

नित्यं रथेन गच्छामि,
अश्वाः वहन्ति मे रथम्।
सम्राडस्मि नरो नास्मि,
नासुरोऽस्मि निशाचरः।।5।।

इदानीं **प×चमं श्लोकं** पुनः पठामः बोधामः च।

**पदच्छेदः** नित्यम् रथेन गच्छामि, अश्वाः वहन्ति मे रथम्।
सम्राट् अस्मि नरः न अस्मि न असुरः अस्मि निशाचरः।।

**अन्वयः** नित्यम् रथेन गच्छामि, अश्वाः मे रथम् वहन्ति। सम्राट् अस्मि नरः न अस्मि असुरः अस्मि निशाचरः न।।

**व्याख्याः** अत्र कश्चित् कथयति अहं राजावत् रथेन गच्छामि, अश्वाः मम रथं कर्षन्ति। यद्यपि सम्राट्, सम्यक् शोभायमानः अस्मि परन्तु अहं नरः न, अहम् असुरः अस्मि परन्तु निशाचरः न।

एषः रथः आकाशे गच्छति। सप्तवर्णीयाः किरणाः अस्य रथं चालयन्ति।


सम्राट् (i) सम्यक् राजते इति सम्राट्– (ii) नृपः

असुरः (i) प्राणदाता (ii) राक्षसः



टिप्पणी

निशाचरः (i) निशायां चरति इति (ii) राक्षसः




अस्याः प्रहेलिकायाः उत्तरम् अस्ति सूर्यः। सः नृपवत् आकाशे रथेन संचरति। सप्त–अश्वाः अस्य रथं नयन्ति। अयम् अत्यधिकं भासते। अतः सम्राट् वर्तते। सः असून् प्राणान् ददाति इति वयं सर्वे जानीमः यत् सूर्यः एव जगतः उत्पादकः। असुरस्य अन्यः अर्थः अस्ति राक्षसः– निशाचरः। एषः प्राणदाता अस्ति न तु राक्षसः। अयं तु रात्रौ न चरति अपितु दिवा चरति।

**श्लोक–6**

अस्याः प्रहेलिकायाः अधुना **षष्ठं श्लोकं** पुनः पठामः।

**सदारिमध्यापि न वैरियुक्ता**
**नितान्तरक्तापि सितैव नित्यम्।**
**यथोक्तवादिन्यपि नैव दूती**
**का नाम कान्तेति**
**निवेदयाशु।।6।।**

**पदच्छेदः**–सदा अरिमध्या अपि न वैरियुक्ता नितान्तरक्ता अपि सिता एव नित्यम्।
यथा उक्तवादिनी अपि न एव दूती का नाम कान्ता इति निवेदय आशु।।



**अन्वयः** – सदारिमध्यापि वैरियुक्ता न, नितान्तरक्तापि नित्यम् सितैव। यथोक्तवादिनी अपि दूती न एव। का नाम कान्ता इति आशु निवेदय।

**व्याख्या–**

नितान्तरक्तापि– नितान्तं रक्ता, अत्र रक्ता रक्तवर्णयुता, अथवा अनुरक्ता इत्यर्थद्वयं प्रतिभासते।

रक्तवर्णयुता सिता (श्वेतवर्णा) कथं स्यात् अतः अत्र अनुरक्ता अपि सिता इति अयम् अर्थः ग्रहीतव्यः।


यथोक्तवादिन्यपि– यथा + उक्तवादिनी + अपि

कान्ता– का अन्ते यस्याः सा।

**भावार्थः**– प्रहेलिकायाः आपातपठनेन सर्वत्र विरोधाभासः प्रतिभाति। सदा अरिमध्या अपि वैरियुक्ता न अस्ति नितान्तं रक्ता अपि नित्यं सिता। यथोक्तवादिनी अपि दूती न अस्ति। ध्यानपूर्वकं पठनेन भिन्न. अर्थः भासते। सारिका पदस्य मध्ये 'रि' अस्ति। अन्ते का अस्ति। दूती इव यत् शृणोति तत् वदति। अतः उत्तरम् अस्ति सारिका।

**श्लोक–7**

सम्प्रति, **सप्तमं श्लोकं** पुनः पठामः। अत्रापि प्रहेलिकायाम् एव प्रश्नानाम् उत्तराणि सन्ति।



टिप्पणी

**पदच्छेदः** अनेकसुशिरम् वाद्यम् कान्तम् च ऋषिसंज्ञितम्।
चक्रिणा सदा आराध्यम् यः जानाति सः पण्डितः।।


**अन्वयः** अनेकसुशिरम् वाद्यम् कान्तम् ऋषिसंज्ञितम् चक्रिणा च सदा आराध्यम् यः जानाति स पण्डितः।

अनेकसुशिरं वाद्यं
कान्तं च ऋषिसंज्ञितम्।
चक्रिणा सदाराध्यं यो
जानाति स पण्डितः।।7।।

**व्याख्या**

अनेकसुशिरं— शोभनं शिरः सुशिरः (कर्मधारयसमासः) अनेकानि सुशिरांसि यस्मिन् तत् द्वितीयाविभक्तिः एकवचनम्

वाद्यम्— (1) वकारः आदौ यस्य तत्,
(2) वादनसाधनम्



कान्तम्— ककारः अन्ते यस्य तत्, सुन्दरम्

ऋषिसंज्ञितम्— ऋषेः संज्ञया— नाम्ना युक्तम्।

चक्रिणा— सर्पेण/विष्णुना

सदाराध्यम्— सदा आराध्यं सेवनीयम्। अत्र वाद्यं, कान्तं चक्रिणा इत्येषां शब्दानां वादनसाधनम् सुन्दरं विष्णुना इत्येतैः पदैः अर्थे भ्रमः भवति। अतः एते अर्थाः अत्र न विचारणीयाः। यस्य आदौ वकारः अस्ति यस्य अन्ते च ककारः अस्ति असौ शब्दः स्यात् व........क। एतस्मिन् अनेकानि छिद्राणि भवेयुः, ऋषिनामवत् तस्य नाम स्यात्, सर्पः च तत् इच्छेत्। तत् किं स्यात्? अहो! एतत् तु वल्मीकम्।

**भावार्थः**— वल्मीके अनेकानि छिद्राणि भवन्ति। ऋषेः वाल्मीकस्य नाम्ना सदृशं तस्य नाम। वल्मीके सर्पः निवसति। अतः प्रहेलिकायाः उत्तरं वल्मीकम् इति बुद्धिमान् जानाति।

**श्लोक–8**

अधुना **अष्टमं श्लोकं** पुनः पठामः।

**पदच्छेदः** न तस्य आदिः न तस्य अन्तः मध्ये यः तस्य तिष्ठति।
तव अपि अस्ति मम अपि अस्ति यदि जानासि तद् वद्।।

न तस्यादिर्न तस्यान्तो
मध्ये यस्तस्य तिष्ठति।
तवाप्यस्ति ममाप्यस्ति
यदि जानासि तद् वद।।8।।

**अन्वयः** न तस्यादिः (अस्ति), न तस्य अन्तः (अस्ति), तस्य मध्ये यः तिष्ठति। तव अपि अस्ति यदि जानासि, तद् वद।



**व्याख्या**— प्रहेलिकायाः पठनकाले कश्चिद् भ्रमः जायते। न तस्यादिः न तस्यान्तः इत्थं प्रतिभाति यत् उत्तरे यद् वस्तु अस्ति तत् अनादि अनन्तं च वर्तते। ध्यानेन पठनानन्तरं

ज्ञायते यद् वस्तुतः उत्तरं स्यात् तस्य आदौ न इति वर्णः वर्तते, तस्य अन्ते न इति वर्णः वर्तते।

न तस्यादिः – न तस्य आदिः, तस्य आदिवर्णः 'न' अस्ति।

न तस्यान्तः– न तस्य अन्तः, तस्य अन्तवर्णः न अस्ति इत्थं स्थितिः इयम् अस्ति न.........न

यस्तस्य– यः तस्य। तस्य पदस्य मध्ये यः तिष्ठति। अतः स्थितिः इयं संजाता–न य न

तवाप्यस्ति– तव+ अपि+ अस्ति

ममाप्यस्ति– मम+ अपि+ अस्ति इयं सूचना अस्ति उत्तरं ज्ञातुम्।


''नयन'' सर्वेषां भवति। अतः प्रहेलिकायाः उत्तरम् अस्ति 'नयन' इति

**भावार्थः** प्रहेलिकायाः भ्रमोत्पादकानि पदानि न विचारणीयानि। 'आदौ न' 'मध्ये य' 'अन्ते न'। 'नयन' इति प्रहेलिकायाः उत्तरम्। नयने सर्वेषां भवतः।

## व्याकरण–बिन्दवः

### (i) स्त्रीलिंगपदानां रूपाणि (आकारान्तानि), ईकादान्तानि च

| | गंगा | | | कस्तूरी | | |
|---|---|---|---|---|---|---|
| **विभक्तिः** | **ए.व.** | **द्व.व.** | **बहु.व.** | **ए.व.** | **द्वि.व.** | **वहु.व.** |
| प्रथमा | गंगा | गंगे | गंगाः | कस्तूरी | कस्तूर्यौ | कस्तूर्यः |
| द्वितीया | गंगाम् | गंगे | गंगाः | कस्तूरीम् | ,,,,, | कस्तूरीः |
| तृतीया | गंगया | गंगाभ्याम् | गंगाभिः | कस्तूर्या | कस्तूरीभ्याम् | कस्तूरीभिः |
| चतुर्थी | गंगायै | ,, | गंगाभ्यः | कस्तूर्यै | ,, | कस्तूरीभ्यः |
| पंचमी | गंगायाः | ,, | ,, | कस्तूर्याः | ,, | कस्तूरीभ्यः |
| षष्ठी | ,, | ,, | गंगानाम् | ,, | कस्तूर्योः | कस्तूरीणाम् |
| सप्तमी | गंगायाम् | गंगयोः | गंगासु | कस्तूर्याम् | ,, | कस्तूरीषु |
| सम्वोधनम् | हे गंगे | हे गंगे | हे गंगाः | हे कस्तूरि | हे कस्तूर्यौ | हे कस्तूर्यः |
| एवमेव रमा, लता, कला आदीनां शब्दानां रूपाणि भविष्यन्ति। | | | | एवमेव नारी, नदी, देवी आदीनां शब्दानां रूपाणि भविष्यन्ति | | |





'इन्' प्रत्ययान्तशब्दाः

| | करिन् | | | चक्रिन् | | |
|---|---|---|---|---|---|---|
| विभक्ति | ए.व. | द्व.व. | बहुव. | ए.व. | द्वि.व. | बहु.व. |
| प्रथमा | करी | करिणौ | करिणः | चक्री | चक्रिणौ | चक्रिणः |
| द्वितीया | करिणम् | ,, | ,, | चक्रिणम् | ,, | ,, |
| तृतीया | करिणा | करिभ्याम् | करिभिः | चक्रिण | चक्रिभ्याम् | चक्रिभिः |
| चतुर्थी | करिणे | ,, | करिभ्यः | चक्रिणे | ,, | चक्रिभ्यः |
| प×चमी | करिणः | ,, | ,, | चक्रिणः | ,, | ,, |
| षष्ठी | ,, | करिणोः | करिणाम् | चक्रिणः | चक्रिणोः | चक्रिणाम् |
| सप्तमी | करिणि | ,, | करिषु | चक्रिणि | ,, | चक्रिषु |
| सम्बोधन् | हे करिन् | हे करिणौ | हे करिणः | हे चक्रिन् | हे चक्रिणौ | हे चक्रिणः |

## सारः

इस अंश में भी चार पहेलियाँ हैं। पांचवीं पहेली का आधार सूर्य है जो राजा नहीं पर रथ से यात्रा करता है, घोड़े (किरणें) उसके रथ को खींचते हैं, वह सम्राट् है पर मनुष्य नहीं, प्राण दाता है पर निशाचर नहीं। छठी पहेली का उत्तर है सारिका। इसके मध्य में 'रि' है, अरिमध्य नहीं है, अनुरक्ता होते हुए भी श्वेत वर्णा है, जैसे का तैसा वर्णन करते हुए भी दूती नहीं है, सुन्दर है 'का' वर्ण अन्त में है। प्रत्येक शब्द के दो दो अर्थ हैं। सातवीं पहेली का उत्तर वल्मीक है, वल्मीक में अनेक छिद्र होते हैं और इसमें सांप का निवास होता है। अतः बुद्धिमान् ही इसको पहचान सकता है। अन्तिम पहेली का उत्तर नयन है जिसके प्रारम्भ और अन्त में 'न' है और मध्यम में 'य' है। यह सभी के पास विद्यमान है। ऐसी ही पहेलियों का संकलन करके आप अपने ज्ञान का विस्तार कर सकते हैं

## पाठगतप्रश्नाः 2.2

1. सन्धिं कृत्वा लिखत

(क) सम्राट् + अस्मि = ——————————

(ख) न + असुरः + अस्मि = ——————————

(ग) सदा + अरि = ——————————

(घ) सिता + एव = ——————————

(ङ) वादिनी + अपि = ______________

(च) कान्ता + इति = ______________

(छ) सदा + आराध्यम् = ______________

2. अर्थद्वयं लिखत

(क) सदारिमध्या = (i) ______________
(ii) ______________

(ख) चक्रिणा = (i) ______________
(ii) ______________

(ग) न तस्यादिः = (i) ______________
(ii) ______________

(घ) न तस्यान्तः = (i) ______________
(ii) ______________

(ङ) असुरः = (i) ______________
(ii) ______________

(च) वाद्यम् = (i) ______________
(ii) ______________

3. तां प्रहेलिकां लिखत यस्याः उत्तरं सूर्यः अस्ति

__________________________________________

4. द्वितीयांशस्य प्रहेलिकानाम् उत्तराणि लिखत।

---

## 2.4 किम् अधिगतम्

- प्रहेलिकाभिः ज्ञानमपि वर्धते, मनोरंजनम् अपि भवति।
- शब्दानाम् अर्थद्वयेन चमत्कारः उत्पद्यते।
- प्रथमप्रहेलिकायाः तात्पर्यम् अस्ति– कस्तूरी मृगात् जायते। सिंहः करिणां कुलं हन्ति। कातरः युद्धे पलायनं कुर्यात् इति।
- द्वितीयप्रहेलिकायाः तात्पर्यम् अस्ति – युधिष्ठिरः धर्मस्य पुत्रः, गंगा त्वरिता वहति, हंसस्य शोभा गतिः अस्ति।
- तृतीयप्रहेलिकायाः उत्तरमस्ति– 'अनानास' इति। यतः अनानासवृक्षस्य उपरि फलम् भवति, पुनः तस्य उपरि वृक्षः (पत्राणि) भवति।

- चतुर्थप्रहेलिकायाः उत्तरमस्ति 'अशोकः'। यतः यस्य (शब्दस्य) पूर्वे 'अकारः' वर्तते, मध्ये 'शो' वर्णः अन्ते च 'क' वर्णः विद्यते।
- पंचमप्रहेलिकायाः उत्तरमस्ति 'सूर्यः'। यः नित्यं रथेन गच्छति। तस्य किरणाः एव अश्वाः। देदीप्यमानः सम्राट् अस्ति। सः संसारस्य कृते असुरः प्राणदायकः अपि अस्ति।
- षष्ठप्रहेलिकायाः उत्तरमस्ति 'सारिका'। यतः सा दूती इव वदति। अयमेव शब्दः यस्य मध्ये 'रि' वर्णः भवति, अन्ते च 'का' वर्णः भवति।
- सप्तम प्रहेलिकायाः उत्तरमस्ति 'वल्मीकम्' इति। यतः यस्य शब्दस्य आदौ 'व' अस्ति अन्ते च ककारः अस्ति। एतस्मिन् अनेकानि छिद्राणि भवन्ति, सर्पः च तत् इच्छेत्। तस्य नाम ऋषिनामवत् एव।
- अष्टम प्रहेलिकायाः उत्तरमस्ति– 'नयन' इति। यस्य आदौ 'न' वर्णः, अन्तेऽपि 'न' वर्णः, मध्ये च 'य' वर्णः भवति, यत् च सर्वेषाम् अङ्गं भवति। अस्य अर्थः 'नेत्रम्' इति।
- किम् यत् तत्, एतत् इत्येतेषां सर्वनामशब्दानां त्रिषु लिंगेषु रूपाणि भवन्ति। अस्मद्, युष्मद् सर्वनामशब्दयोः रूपाणि पुल्लिङ्गे स्त्रीलिङ्गे च समानानि भवन्ति।

## 2.5 योग्यताविस्तारः

### (क) ग्रंथपरिचयः

एताः प्रहेलिकाः अधिकांशतः सुभाषितरत्नभाण्डागारतः संकलिताः। सुभाषितत्नभाण्डागारे विविधानां पद्यानां सूक्तीनां च संग्रहः अस्ति।

प्रहेलिकाः तर्कशक्तिं मननक्षमतां च वर्धयन्ति।

### (ख) भावविस्तारः

**काश्चन अन्याः प्रहेलिकाः**

(क) मुखे हस्तद्वयं धत्ते, सर्वथा जागरूका सा।
प्रतिक्षणं वदन्तीव, प्राणाः पिंजिताः सदा।। (घटिका)

(ख) आदिस्वरेण ब्रह्माऽहं तापयामि निरन्तरम्।
नाहं भीमस्य जामाता,कोऽस्मि शीघ्रं ब्रवीतु मे।। (अनलः)

(ग) आदौ भा शोभते नित्यम्, रतम् पश्चाद् विराजते।
देवतानां प्रियं धाम, तवाप्यस्ति ममापि च ।। (भारतम्)

(घ) अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः।। (पत्रम्)

## 2.6 पाठान्तप्रश्नाः

1. प्रथमान्तं पदं रेखांकितं कुरुत–

| | |
|---|---|
| यथा कः करिणां कुलं हन्ति? | कः |
| (क) हंसस्य शोभा का अस्ति? | ........................................ |
| (ख) वृक्षाग्रे फलं दृष्टम्। | ........................................ |
| (ग) अपूर्वः अयम् मया दृष्टः। | ........................................ |
| (घ) त्वम् आशु निवेदय। | ........................................ |
| (ङ) यः तस्य मध्ये तिष्ठति। | ........................................ |
| (च) अश्वाः मे रथं वहन्ति। | ........................................ |

2. पाठे सम्बोधनपदं किम्?
3. अधोलिखितेषु पदेषु क्रियापदानि पृथक् कृत्वा लिखत–
   करिणाम्, हन्ति, जानाति, कान्तेति, वैरियुक्ता, दूती, वद, निवेदय, कान्तः, पण्डितः।
4. स्त्रीलिङ्गपदानि रेखांकितानि कुरुत–
   कस्तूरी, वृक्षः, वैरियुक्ता, वाक्यम्, चक्रिणा, निशाचरः, गंगा, कीदृशी, कान्ता, चक्रिणा।
5. एतत् पदम् अव्ययम् नास्ति–
   ताः, एव, च, अत्र, न, नाम, इति, आशु, आदिः,अपि, नित्यम्, कीदृशी, का।

## 2.7 उत्तराणि

**2.2 बोधप्रश्नाः**

1 (iii), (v), (i), (ii), (vi), (iv),

2. (क) कुर्यात्, (ख) वहति, (ग) निवेदय, (घ) जानाति,
   (ङ) अस्मि, अस्मि, (च) तिष्ठति।

3. (क) गतिः, (ख) धर्मस्य (ग) सिंहः (घ) पलायनम् (ङ) त्वरिता

**पाठगतप्रश्नाः**

**2.1** 1. (क) मृगात्, (ख) धर्मस्य, (ग) अ वर्णः, (घ) कः, (ङ) अनानासफलस्य,

2. (क) फलाग्रे, (ख) वृक्षाग्रे, (ग) अपूर्वः (घ) शोमध्यः (ङ) युधिष्ठिरः (च) कान्तः

3. (क) (i) अपूर्वः (ii) दृष्टः (iii) शोऽन्तरं, (iv) विद्वान् (v) संशयः
(ख) (i) फलम्, (ii) फलाग्रे (iii) यः, (iv) सः

**2.2** 1. (क) सम्राडस्मि, (ख) नासुरोऽस्मि, (ग) सदारि (घ) सितैव
(ङ) वादिन्यपि (च) कान्तेति, (छ) सदाराध्यम्।

2. (क) (i) सदा अरिमध्या, सदा शत्रूणां मध्ये स्थिता
(ii) सदा 'रि' मध्या, यस्य पदस्य मध्ये 'रि' वर्णः विद्यते

(ख) (i) विष्णुना, (ii) सर्पेण

(ग) (i) तस्य आदिवर्णः 'न' (ii) तस्य प्रारम्भः नास्ति।

(घ) (i) तस्य अन्ते 'न' वर्णः (ii) तस्य अन्तः नास्ति।

(ङ) (i) यः सुरः नास्ति, राक्षसः।। (ii) यः असून् प्राणान् ददाति।

(च) (i) वादयते यत् वाद्ययन्त्रम् (ii) 'व' आद्यम्, 'व' प्रथमाक्षरः यस्य तम्।

3. नित्यं रथेन गच्छामि, अश्वाः वहन्ति मे रथम्।
सम्राडस्मि, नरो नास्मि, नासुरोऽस्मि निशाचरः।।

4. (1) मृगात्, सिंहः, पलायनम्, (2) धर्मस्य, त्वरिता, गतिः
(3) अनानासफलम्, (4) अशोकः,
(5) सूर्यः (6) सारिका
(7) वल्मीकम्, (8) नयनम्,

**2.6 पाठान्तप्रश्नाः**

1. (क) शोभा, का (ख) फलम्, दृष्टम् (ग) अपूर्वः, अयम्, दृष्टः
(घ) त्वम्, (ङ) यः, (च) अश्वाः

2. कमललोचने

3. क्रियापदानि– हन्ति, जानाति, वद, निवेदय,

4. कस्तूरी, वैरियुक्ता, गंगा, कीदृशी, कान्ता

5. ताः, आदिः, कीदृशी, का

# 3

# आरोग्यं परमं सुखम्

भवतां गृहे अनेकानि वस्तूनि दृश्यन्ते यथा गैसचुल्लः, सीवनयन्त्रं, तालकं नलम् इति। एतेषां सम्यक् चालनाय तैलप्रदानम् अनिवार्यं भवति। एतेषां सन्धिस्थलेषु यदि तैलं न दीयते तदा एतानि सम्यक् कार्यं न कुर्वन्ति कुण्ठितानि च भवन्ति। अस्माकं शरीरम् अपि एकं यन्त्रम् इव। कालिदासेन सत्यमुक्तम्– ''शरीरमाद्यं खलु धर्मसाधनम्।'' शरीरस्य इन्द्रियाणि– नासिका, कर्णः, त्वक्, नेत्रे, हस्तौ पादौ च सुदृढानि भवेयुः तदर्थं तैलमर्दनम् आवश्यकम्। नूनं तैलमर्दनेन स्वास्थ्यं वर्धते। स्वास्थ्यम् एव परमं प्रथमं सुखम्। आयुर्वेदे तैलमर्दनस्य महत्त्वं सुस्पष्टं वर्तते। चरकः आर्युवेदस्य सर्वश्रेष्ठः विद्वान् अभवत्। प्रस्तुतः पाठः चरकसंहितायाः एव संकलितः।

## उद्देश्यानि







इमं पाठं पठित्वा भवान्

- तैलाभ्यङ्गस्य लाभान् लेखितुं समर्थः भविष्यति;
- तैलमर्दनस्य उपचर्यया अपसारितानां रोगानां नामानि लेखिष्यति;
- वाक्येषु कर्तृपदैः सम्बद्धक्रियापदानां चयनं कर्तुं शक्ष्यति;
- मतुप्प्रत्ययान्तशब्दानां प्रयोगं कर्तुं शक्ष्यति;
- स्व, नित्यं, न, एव, च, उच्चैः इति अव्ययपदानां वाक्येषु प्रयोगं करिष्यति;
- यण्–गुण–पूर्वरूपसन्धियुक्तानां पदानां चयनं करिष्यति।

## क्रियाकलापः

अधः केषाचित् वस्तूनां चित्राणि तेषां नामानि च दत्तानि सन्ति। तेषु यत्कृते तैलम् आवश्यकं तत्समक्षम् 'आम्', यत्कृते च तैलम् अनावश्यकम् तत्समक्षं 'नैव' लिखत।

यथा–

| | आम् / नैव | | आम् / नैव |
|---|---|---|---|
|  3.1 शकटः | ...................... |  3.2 दण्डदीपः | ...................... |
|  3.2 द्विचक्रिका | ...................... |  3.4 तालकः | ...................... |
|  3.5 रथः | ...................... |  3.6 संगणकम् | ...................... |
|  3.7 नौका | ...................... |  3.8 कारयानम् | ...................... |
|  3.9 नलम् | ...................... |  3.10 सीवनयन्त्रम् | ...................... |

## 3.1 मूलपाठः

### आरोग्यं परमं सुखम्

अत्र भवद्भिः ज्ञातं यत्– एतेषु कानिचित् यन्त्राणि तैलं विना कार्यं न कुर्वन्ति एवमेव शरीरम् अपि तैलं विना सम्यक् कार्यं न करोति। इदानीं वयम् 'आयुर्वेदे तैलमर्दनस्य महत्त्वं ज्ञातुं मूलपाठं पठामः।

नित्यं स्नेहार्द्रशिरसः शिरः शूलं न जायते।
न खालित्यं न पालित्यं न केशाः प्रपतन्ति च।।1।।

बलं शिरः कपालानां विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च कृष्णाः केशाः भवन्ति च।।2।।

न चास्यं कण्ठशोषः स्यान्नौष्ठयोः स्फुटनाद्भयम्।
न च दन्ताः क्षयं यान्ति दृढमूलाः भवन्ति च।।3।।

इन्द्रियाणि प्रसीदन्ति सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यान्मूर्ध्नि तैलनिषेवणात्।।4।।

सुस्पर्शोपचिताङ्गश्च बलवान् प्रियदर्शनः।
भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजरः एव च।।5।

जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः।
दृष्टिः प्रसादं लभते मरुतश्चोपशाम्यति।।6।।

**शब्दार्थाः**
नित्यं = प्रतिदिन
स्नेहार्द्रशिरसः = सिर में तेल डालने से
शिरःशूलं = सिरदर्द
खालित्यं = गंजापन
पालित्यं = बालों का सफेद होना
प्रपतन्ति = गिरते हैं
शिरः कपालानां = सिर की हड्डियों की, अभिवर्धते = बढ़ता है
दृढमूलाः = मजबूत जड़ों वाले
कृष्णा = काले, कण्ठशोषः = गला सूखना
ओष्ठयोः = होठों के
स्फुटनाद्भयम् = फटने का डर
न क्षयं यान्ति = नष्ट नहीं होते
प्रसीदन्ति = प्रसन्न होती हैं
सुत्वक् = कान्तियुक्त त्वचा
निद्रालाभः = अच्छी नींद आना
मूर्ध्नि = सिर में
सुस्पर्शोपचिताङ्गः = शरीर सुस्पर्शी (नरम, मुलायम) हो जाता है।
अभ्यङ्गः = तेलमालिश
अल्पजरः = बुढ़ापा धीरे धीरे आता है
सौकुमार्यम् = कोमलता
प्रसादं लभते = तेज हो जाती है
मरुतः = वायु से होने वाला विकार
उपशाम्यति = शान्त हो जाता है

## 3.2 बोधप्रश्नाः

1. उपयुक्तम् उत्तरं (√) चिह्नीकुरुत–

(क) शिरसि तैलमर्दनेन केशाः न भवन्ति–

(i) कृष्णाः (ii) दीर्घाः
(iii) श्वेताः (iv) दृढमूलाः

(ख) नरः अल्पजरः केन भवति–

(i) औषधीनां प्रभावेन (ii) निद्रालाभेन
(iii) स्नानेन (iv) तैलाभ्यङ्गेन

(ग) एतेषां श्लोकानां लेखकः कः?

(i) कालिदासः (ii) चरकः

(iii) भासः (iv) सुश्रुतः

2. 'क' स्तम्भस्य श्लोकांशानां 'ख' स्तम्भस्य श्लोकांशैः सह मेलनं कुरुत–

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (क) नित्यं स्नेहार्द्रशिरसः | (i) क्षयं यान्ति। |
| (ख) न च दन्ताः | (ii) मूर्ध्नि तैलनिषेवणात्। |
| (ग) निद्रालाभः सुखं च स्यात् | (iii) शिरः शूलं न जायते। |
| घ) दृष्टिः प्रसादं लभते | (iv) न केशाः प्रपतन्ति च। |
| (ङ) न खालित्यं न पालित्यं | (v) मरुतश्चोपशाम्यति। |

3. पाठं पठित्वा रिक्तस्थानानि पूरयत–

(क) .............. शिरः कपालानां विशेषेणाभिवर्धते।

(ख) सुस्पर्शोपचिताङ्गश्च ................................ प्रियदर्शनः।

(ग) दृढमूलाश्च दीर्घाश्च .................................. केशाः भवन्ति च।

(घ) नित्यं स्नेहार्द्रशिरसः ............................... न जायते।

(ङ) जायते सौकुमार्यं च बलं ....................................... च पादयोः।

## 3.3 अधुना अवगच्छामः

### प्रथमः अंशः

भवद्भिः दृष्टमेव यत् माता स्वशिशोः शिरः प्रभृति पादपर्यन्तम् नित्यं तैलं मर्दयति। किमर्थम्? शरीरस्य पुष्टार्थम्। आम्, सत्यमेव। मल्लाः अपि नित्यं तैलं मर्दयन्ति। अतः तैलमर्दनेन अस्माकं शरीरस्य अंगानि कथं स्वास्थ्ययुक्तानि भवन्ति इति अत्र वयम् बोधामः।

**श्लोकः– 1**

अस्तु **प्रथमं श्लोकं** पठामः।



3.11

नित्यं स्नेहार्द्रशिरसः
शिरः शूलं न जायते।
न खालित्यं न पालित्यं
न केशाः प्रपतन्ति च।।1।।



टिप्पणी

**पदच्छेदः** नित्यम् स्नेहार्द्रशिरसः शिरः शूलम् न जायते।
न खालित्यम् न पालित्यम्, न केशाः प्रपतन्ति च।

**अन्वयः** यः नित्यं शिरसि तैलमर्दनम् करोति तस्य स्नेहार्द्रशिरसः शिरः शूलम् न जायते। तस्य न खालित्यम् न पालित्यम्, न च तस्य केशाः प्रपतन्ति।
इदानीं श्लोकम् अवगच्छामः।



3.12

**व्याख्या–**

शिरः शूलम् इति किम्? शिरसि पीडा।

कस्य शिरःशूलं न जायते? स्नेहेन तैलेन आर्द्रं शिरः यस्य तस्य। अर्थात् यस्य शिरः नित्यं तैलेन मर्दितं भवति, तस्य शिरःपीड़ा न जायते।

तैलार्द्रतया च पुनः किं किं न भवति?

(क) खालित्यं, केशराहित्यम् (गंजापन इति) शिरः केशरहितं न भवति।

(ख) पालित्यम्, केशानां श्वेतवर्णे परिवर्तनम् अर्थात् केशाः श्वेताः न भवन्ति।

(ग) केशानां पतनं च न भवति।

**भावः**

यः मनुष्यः शिरसि तैलाभिसेचनं नित्यं करोति तस्य शिरसि पीडा न भवति। तस्य केशानां वर्णः कृष्णः एव वर्तते, श्वेतः न जायते। तस्य केशानां पतनमपि न जायते। अतः अस्माभिः नित्यं शिरसि तैलाभ्यङ्गः करणीयः।

**बलं शिरः कपालानां
विशेषेणाभिवर्धते।
दृढमूलाश्च दीर्घाश्च
कृष्णाः केशाः भवन्ति च।।2।।**

**श्लोकः– 2**

अधुना **द्वितीयं श्लोकं** पठामः


**पदच्छेदः** बलम् शिरः कपालानाम् विशेषेण अभिवर्धते।
दृढमूलाः च दीर्घाः च कृष्णाः केशाः भवन्ति।।

**अन्वयः** शिरसि तैलमर्दनेन शिरःकपालानाम् विशेषेण बलम् अभिवर्धते। केशाः दृढमूलाः दीर्घाः कृष्णाः च भवन्ति।

**व्याख्या–**

शिरःकपालाः के? शिरसः अस्थीनि।

शिरसि तैलाभ्यङ्गेन किं वर्धते? शिरसः अस्थ्नां शक्तिः नूनं तैलाभ्यङ्गेन वर्धते।





के दृढमूलाः भवन्ति? केशाः। केशानां मूलानि तैलेन दृढानि भवन्ति।

एवं हि तैलाभ्यङ्गेन केशाः कीदृशाः भवन्ति? दीर्घाः कृष्णाः श्यामवर्णाः दृढमूलाश्च भवन्ति।

**भावः**

शिरसि तैलप्रयोगेण शिरसः अस्थ्नां शक्तिः वर्धते अर्थात् मस्तिष्कः अधिकः क्रियाशीलः भवति। केशानां मूलानि सुदृढानि भवन्ति। तेन केशाः दीर्घाः श्यामवर्णाः च जायन्ते। अतः शिरसि तैलप्रयोगः अवश्यमेव कर्तव्यः। सुन्दरैः केशैः मानवः चिरं शोभते।

**श्लोकः– 3**

अधुना **तृतीयं पद्यं** पठामः। बोधामः च अन्यैः लाभाः के भवन्ति तैलाभ्यङ्गेन।

न चास्यं कण्ठशोषः
स्यान्नौष्ठयोः स्फुटनाद्भयम्।
न च दन्ताः क्षयं यान्ति
दृढमूलाः भवन्ति च।।3।।

**पदच्छेदः** न च अस्य कण्ठशोषः स्यात् न ओष्ठयोः स्फुटनात् भयम्।
न च दन्ताः क्षयम् यान्ति। दृढमूलाः भवन्ति च।।

**अन्यवः** अस्य (नरस्य) न च कण्ठशोषः स्यात् न ओष्ठयोः स्फुटनात् भयम्। (अस्य) दन्ताः च क्षयम् न यान्ति दृढमूलाः च भवन्ति।

नरस्य कण्ठः केन न शुष्यति? तैलाभ्यङ्गेन।

तैलाभ्यङ्गेन कस्मात् भयं नास्ति? ओष्ठयोः स्फुटनात्।

तैलमर्दनेन के क्षयं (नाशं) न यान्ति (गच्छन्ति)? दन्ताः।

अर्थात! – दन्तेषु ओष्ठयोः कण्ठे च तैलमर्दनं करणीयम्।

**भावः**

मुखे तैलमर्दनेन कण्ठः न परिशुष्यति। ओष्ठयोः स्फुटनात् भीतिः न भवति। तैलप्रयोगेण च दन्तानां मूलानि दृढानि भवन्ति। ते च बाल्यकाले एव न विनश्यन्ति। अतः मुखे दन्तेषु च सर्षपतैलाभ्याङ्गः नित्यमेव करणीयः। दन्तैः मानवस्य न केवलं शोभा भवति अपि तु भोजने तु तेषामुपयोगः प्रशंसनीयः एव।

## व्याकरणबिन्दवः

वयम् अत्र पदानां सन्धिविच्छेदं, विग्रहं, क्रियापद–परिचयं च बोधामः।

**सन्धिविच्छेदाः**

स्नेहार्द्रः = स्नेह + आर्द्रः = अ + आ = आ दीर्घसन्धिः

चास्य = च + अस्य = अ + अ = आ दीर्घसन्धिः

| | | | |
|---|---|---|---|
| विशेषणाभिवर्धते | = विशेषण + अभिवर्धते | = अ + अ = आ | |
| नौष्ठयोः | = न + ओष्ठयोः | = अ + ओ = औ | |
| खालित्यं न | = खालित्यम् + न | = म् + (व्यंजनम्) = | अनुस्वारः (–̇–) |
| क्षयं यान्ति | = क्षयम् + यान्ति | = म् + व्यंजनम् = | अनुस्वारः |
| दृढमूलाश्च | = दृढमूलाः + च | = ः + च = श्च (ः – श्) | |
| दीर्घश्च | = दीर्घः + च | | |
| स्फुटनाद्भयम् | = स्फुटनात् + भयम् | = त् + भ = द्भ (त् → द्) | |
| स्याच्च | = स्यात् + च | = त् + च = च्च (त् → च्) | |

(चवर्गयोगे तवर्गः तु चवर्गः जायते)

**समासाः**

| समस्तपदानि | विग्रहः | समासनाम |
|---|---|---|
| शिरः शूलम् | शिरसि शूलम् | सप्तमीतत्पुरुषः |
| शिरः कपालानाम् | शिरसः कपालानाम् | षष्ठीतत्पुरुषः |
| कण्ठशोषः | कण्ठस्य शोषः | षष्ठीतत्पुरुषः |
| स्नेहार्द्रशिरसः | स्नेहेन आर्द्रं शिरः यस्य सः तस्य | बहुव्रीहिः |
| दृढमूलाः | दृढं मूलं येषां ते | बहुव्रीहिः |

**क्रियापदानिः**

| पदम् | धातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| जायते | जन् | लट् | प्रथमः | एकवचनम् |
| अभिवर्धते | अभि + वृध् | लट् | प्रथमः | एकवचनम् |
| प्रपतन्ति | प्र + पत् | लट् | प्रथमः | बहुवचनम् |
| भवन्ति | भू | लट् | प्रथमः | बहुवचनम् |
| यान्ति | या | लट् | प्रथमः | बहुवचनम् |
| स्यात् | अस् | विधिलिङ् | प्रथमः | एकवचनम् |

**सारः**

नित्यं तैलमर्दनेन शिरोवेदना न जायते। केशाः कृष्णाः भवन्ति। केशानां मूलानि दृढानि भवन्ति। तैलमर्दनेन कण्ठः न शुष्यति, ओष्ठयोः स्फुटनाद् भयं दूरीभवति, दन्ताः च दृढमूलाः भवन्ति।

नित्य सिर पर तेल लगाने से सिरदर्द नहीं होता और न ही बाल सफेद होते हैं। सिर की हड्डियों की शक्ति बढ़ती है। बालों की जड़ें मजबूत होती हैं। इसी तरह मुँह में तेल का कुल्ला करने से व्यक्ति का गला नहीं सूखता, होंठ नहीं फटते और दांत नहीं टूटते।

## पाठगतप्रश्नाः 3.1

1. अधोलिखितपदानां सन्धिविच्छेदं कृत्वा लिखत–

   (क) स्नेहार्द्रः = ..................... + .........................

   (ख) क्षयं यान्ति = ..................... + .........................

   (ग) दीर्घश्च = ..................... + .........................


   (घ) स्याच्च = ..................... + .........................

   (ङ) स्फुटनाद्भयम् = ..................... + .........................

2. अधोलिखितानां क्रियापदानाम् अर्थैः सह मेलनं क्रियताम्

| **क्रियापदानि** | **अर्थाः** |
|---|---|
| (क) जायते | (i) वृद्धिम् आप्नोति |
| (ख) अभिवर्धते | (ii) पतन्ति |
| (ग) प्रपतन्ति | (iii) गच्छन्ति |
| (घ) यान्ति | (iv) भूयात् |
| (ङ) स्यात् | (v) उत्पद्यते |

3. रेखाचित्रे स्नेहार्द्रशिरसः अष्टगुणान् अधः पुनः रिक्तस्थलेषु पद्ये प्रदत्त क्रमेण लिखत–



(i) ................................................ (v) ................................................
(ii) ................................................ (vi) ................................................
(iii) ................................................ (vii) ................................................
(iv) ................................................ (viii) ................................................

4. रेखाङ्कितानि पदानि आधृत्य उदाहरणानुसारं प्रश्ननिर्माणं कुरुत–

उदाहरणम्– केशाः न प्रपतन्ति

प्रश्नः– के न प्रपतन्ति?

(क) शिरसः कपालानां बलं तैलमर्दनेन अभिवर्धते।

(ख) केशाः दीर्घाः भवन्ति।

(ग) दन्ताः क्षयं न यान्ति।

(घ) स्नेहार्द्रस्य शिरसः शूलं न जायते।

## द्वितीयः अंशः

इन्द्रियाणि प्रसीदन्ति
सुत्वग्भवति चाननम्।
निद्रालाभः सुखं च स्यान
मूर्ध्नि तैलनिषेवणात्।।4।।


इदानीम् पुनः तैलाभ्यङ्गस्य अन्येषां लाभानां विषये द्वितीयम् अंशं बोधामः।

**श्लोकः– 4**

**पदच्छेदः** इन्द्रियाणि प्रसीदन्ति सुत्वक् भवति च आननम्।
निद्रालाभः सुखम् च स्यात् मूर्ध्नि तैलनिषेवणात्।

**अन्वयः** मूर्ध्नि तैलनिषेवणात् इन्द्रियाणि प्रसीदन्ति आननम् च सुत्वक् भवति सुखम् निद्रालाभः च स्यात्।

**व्याख्या–**


3.13

अस्तु, अस्य पद्यस्य भावार्थं विस्तरेण बोधामः। किं भवन्तः जानन्ति–


तैलनिषेवणात् इन्द्रियाणि कीदृशानि भवन्ति? तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि सक्रियाणि दृढानि च भवन्ति।

आननं कीदृशं भवति? आननस्य त्वक् कोमलं कान्तियुक्तं च भवति।

शिरसि तैलमर्दनेन अन्य कः लाभः? निद्रायाः प्राप्तिः भवति। सुखम् अर्थात् सरलतया शीघ्रतया एव निद्रा आयाति।

**भावः**

शिरसि तैलाभ्यङ्गेन इन्द्रियाणि प्रसन्नानि सक्रियाणि च भवन्ति। आननस्य कान्तिः वर्धते। कृत्रिम–उपकरणानां च आवश्यकता एव न भवति। सुखपूर्वकं निद्रा भवति।





अधुना वयं **प चमं श्लोकं** पठामः तैलमर्दनस्य अन्यान् लाभान् च बोधामः।

**श्लोकः— 5**

**पदच्छेदः** सुस्पर्शोपचिताङ्गः (सुस्पर्श + उपचित + अङ्गः) च बलवान् प्रियदर्शनः।
भवति अभ्यङ्गनित्यत्वात् नरः अल्पजरः एव च।

**अन्वयः** अभ्यङ्गनित्यत्वात् नरः सुस्पर्शोपचिताङ्गः बलवान् प्रियदर्शनः अल्पजरः एव च भवति।

**सुस्पर्शोपचिताङ्गश्च बलवान् प्रियदर्शनः।**
**भवत्यभ्यङ्गनित्यत्वान्नरोऽल्पजरः एव च।।5।**

'सुस्पर्शोपचिताङ्गः' पदस्य कोऽर्थः? (सुस्पर्श + उपचिताङ्गः) सुखेन स्पृश्यानि = कोमलानि उपचितानि = दृढानि अङ्गानि यस्य सः।

सुस्पर्शोपचिताङ्गः कः भवति? यः नित्यं तैलाभ्यङ्गं करोति। नित्यं तैलमर्दनेन अङ्गानि कोमलानि भवन्ति। त्वक् च सुस्पर्शयोग्या भवति। सः नरः बलवान् कान्तिमान् च भवति।

'प्रियदर्शनः' पदस्य कोऽर्थः? 'प्रियं दर्शनं यस्य सः' अर्थात् सुन्दरः

'अल्पजरः' पदस्य कोऽभिप्रायः? अल्पा जरा यस्य सः अर्थात् अल्पवृद्धः = अर्थात् यः नरः नित्यं तैलमर्दनं करोति। सः सुन्दरः। दर्शनीयः भवति, सः शीघ्रं वृद्धः न भवति, चिरं युवा भवति इति।

**भावः**

यः नरः प्रतिदिनं तैलाभ्यङ्गं करोति तस्य शरीरं कोमलं पुष्टं च भवति। सः बलवान् सुन्दरशरीरः च जायते। सः विलम्बेन एव वृद्धः भवति।

अधुना एकम् अन्यं श्लोकं पठामः यस्मिन् पादयोः तैलमर्दनस्य लाभाः वर्णिताः।

**श्लोकः— 6**

**पदच्छेदः** जायते सौकुमार्यम् च बलम् स्थैर्यम् च पादयोः।
दृष्टिः प्रसादम् लभते मरुतः च उपशाम्यति।

**जायते सौकुमार्यं न बलं स्थैर्यं च पादयोः।**
**दृष्टिः प्रसादं लभते मरुतश्चोपशाम्यति।।6।।**

**अन्वयः** पादयोः (तैलाभ्यङ्गात्) सौकुमार्यम् बलम् स्थैर्यम् च जायते। दृष्टिः प्रसादम् लभते मरुतः च उपशाम्यति।

**व्याख्या—**

पादयोः तैलाभ्यङ्गात् किं भवति? पादयोः सौकुमार्यं कोमलता भवति। बलं शक्तिः स्थैर्यं स्थिरता च भवति। यथा वृक्षमूले जलसेचनेन समग्रः वृक्षः पत्रशाखादिभिः सह ऊर्जां लभते तथैव पादमूले तैलप्रयोगेन सर्वे स्नायवः पोषणं प्राप्नुवन्ति।

अन्यः को लाभः? पादयोः तैलनिषेवणात् दृष्टिः अपि निर्मला प्रसन्ना भवति। वायुजनित–रोगाः अपि उपशाम्यन्ति शान्ताः भवन्ति।

**भावः**

पादयोः तैलमर्दनेन पादौ कोमलौ बलयुक्तौ दृढौ च भवतः। नेत्रज्योतिः वर्धते। वातविकाराणां च उपशमः (नाशः) जायते। अतः तैलमर्दनं तु नित्यं कुर्यात्।

## व्याकरणबिन्दवः

अत्र वयं पाठगतविविधव्याकरणबिन्दून् (सन्धिविच्छेदसमासमतुप्प्रत्ययादीन्) बोधामः।

**सन्धिच्छेदः**

| | |
|---|---|
| चाननम् = च + आननम् = अ + आ = आ | दीर्घसन्धिः |
| सुस्पर्शोपचिताङ्गः = सुस्पर्श + उपचिताङ्गः = अ + उ = ओ | गुणसंन्धिः |
| भवत्यभ्यङ्गः = भवति + अभ्यङ्गः = इ + अ = य् | यणसन्धिः |
| सुत्वग्भवति = सुत्वक् + भवति = क् + भ = ग्भ | जश्त्वम् |
| स्यान्मूर्ध्नि = स्यात् + मूर्ध्नि = त् + म = न्म | त् – म् |
| नित्यत्वान्नरः = नित्यत्वात् + नरः = त् + न = न्न | त् – न् |
| नरोऽल्पजरः = नरः + अल्पजरः = अः + अ = ो ऽ | पूर्वरूपम् |
| मरुतश्च = मरुतः + च = ः + च = श्च | विसर्गसन्धिः |

1. **यण्सन्धिः–** यण् = य् व् र् ल् एते चत्वारः वर्णाः यण् कथ्यन्ते।


| पूर्व वर्ण | | उत्तर वर्ण | यण् | उदाहरणम् |
|---|---|---|---|---|
| 1. इ/ई | + | असमानस्वरः | = य् | (i) प्रति + एकम् = प्रत्येकम् |
| | | | | (ii) भवति + अभ्यङ्गनित्यत्वात्= भवत्यभ्यङ्गनित्यत्वात् |
| | | | | (iii) यदि + अपि = यद्यपि |
| 2. उ/ऊ | + | असमानस्वरः | = व् | (i) सु + आगतम् = स्वागतम् |
| | | | | (ii) मधु + अरिः = मध्वरिः |
| 3. ऋ/ॠ | + | असमानस्वरः | = र् | (i) पितृ + आज्ञा = पित्राज्ञा |
| | | | | (ii) धातृ + अंशः = धात्रंशः |
| 4. ऌ | + | असमानस्वरः | = ल् | ऌ + आकृतिः = लाकृतिः |

2. **गुणसन्धिः–** अ (अर् अल्) ए, ओ

अ/आ + इ/ई = 'ए' भवति।

उदाहरणः– (i) देव + इन्द्रः = देवेन्द्रः

(ii) महा + ईशः = महेशः





अ/आ + उ/ऊ = ओ

उदाहरणः– (i) सूर्य + उदयः = सूर्योदयः

(ii) महा + ऊर्मिः = महोर्मिः

अ/आ + ऋ/ॠ = अर्

उदाहरणः– (i) देव + ऋषिः = देवर्षिः

(ii) महा + ऋषिः = महर्षिः

अ/आ + ऌ = अल्

उदाहरणः– तव + ऌकारः = तवल्कारः

**3. पूर्वरूपसन्धिः–**

यदि पदान्ते ए/ओ वर्णः भवेत् पश्चात् 'अ' ह्रस्व अकारः भवेत् तर्हि पूर्व–परयोः स्थाने ए + ऊ = 'ए', ओ + ऊ = ओ इति पूर्वरूपः एकादेशः भवति। अकारस्थाने च 'ऽ' चिह्नम् प्रयुज्यते।

उदाहरणः अन्ते + अपि = अन्तेऽपि

प्रभो + अत्र = प्रभोऽत्र

**समस्तपदानां विग्रहः**

| समस्तपदानि | विग्रहः | समासनाम |
|---|---|---|
| निद्रालाभः | निद्रायाः लाभः | षष्ठीतत्पुरुषः |
| तैलनिषेवणात् | तैलस्य निषेवणात् | षष्ठीतत्पुरुषः |
| प्रियदर्शनः | प्रियं दर्शनं यस्य सः | बहुव्रीहिः |
| अल्पजरः | अल्पा जरा यस्य सः | बहुव्रीहिः |
| सुस्पर्शोपचिताङ्गः | सुस्पर्शानि उपचितानि अङ्गानि यस्य सः | बहुव्रीहिः |

**प्रत्ययप्रयोगः**

| | | | |
|---|---|---|---|
| बलवान् | बल + मतुप् प्रत्ययः | पु0 प्रथमाविभक्ति : | एकवचनम् |

**मतुप् प्रत्ययः**

हिन्दीभाषायां 'वाला' इति अर्थे मतुप् प्रत्ययः प्रयुज्यते। 'मतुप्' इति प्रत्ययस्य 'मत्' इति शेषः भवति। यदि शब्दस्य अन्ते अ/आ भवति तर्हि मत् इति स्थाने 'वत्' भवति–

बल + मतुप् = बलवत्। बलवत् पदस्य रूपाणि पुल्लिङ्गे स्त्रीलिङ्गे नपुंसकलिङ्गे च द्रव्टव्यानि–

| | | पु. | स्त्री. | नपुं. |
|---|---|---|---|---|
| बल + मतुप् = बलवत् | | बलवान् | बलवती | बलवत् |
| धन + मतुप् = धनवत् | | धनवान् | धनवती | धनवत् |
| श्री + मतुप् = श्रीमत् | | श्रीमान् | श्रीमती | श्रीमत् |
| हनु + मतुप् = हनुमत् | | हनुमान् | हनुमती | हनुमत् |

**क्रियापदानि**

| | | | | |
|---|---|---|---|---|
| प्रसीदन्ति | प्र + सद् = प्रसीद् धातुः | लट्लकारः | प्रथमपुरुषः | बहुवचनम् |
| स्यात् | अस् धातुः | विधिलिङ् | प्रथमपुरुषः | एकवचनम् |
| उपशाम्यति | उप + शम् | लट्लकारः | प्रथमपुरुषः | एकवचनम् |
| जायते | जन् (आत्मनेपद) | लट्लकारः | प्रथमपुरुषः | एकवचनम् |
| लभते | लभ् (आत्मनेपद) | लट्लकारः | प्रथमपुरुषः | एकवचनम् |

**सारः**

शिरसि तैलनिषेवणात् इन्द्रियाणि प्रसन्नानि भवन्ति। निद्रा सरलतया आयाति। नित्यम् अभ्यङ्गात् नरः बलवान् प्रियदर्शनः च भवति। पादयोः तैलमर्दनेन पादौ दृढौ भवतः, दृष्टिः तीव्रा जायते, वायुजनितः रोगः च न भवति।

सिर पर नित्य तेल की मालिश करने से इन्द्रियाँ प्रसन्न होती हैं। चैन की नींद आती है। प्रतिदिन तेलमालिश से मनुष्य बलवान् और सुन्दर होता है। पैरों में तेल मलने से टांगें मजबूत होती हैं। नेत्रज्योति बढ़ती है तथा वायुजनित रोग नहीं होते।

## पाठगतप्रश्नाः 3.2

1. अधोलिखितेषु अन्वयेषु रिक्तस्थानपूर्तिः क्रियताम्–

(क) अभ्यङ्गनित्यत्वात् (i) .......................... सुस्पर्शोपचिताङ्गः (ii) .................... प्रियदर्शनः (iii) ................ एव (iv) ........................ भवति।

(ख) पादयोः (तैलाभ्यङ्गात्) (i) .......................... बलम् (ii) .................. च जायते। (iii) ...................... प्रसादं लभते (iv) ......................... च उपशाम्यति।

2. उपयुक्तम् उत्तरं चित्वा रिक्तस्थानेषु लिखत–

(क) ................. प्रसादं लभते। (भक्तिः/मुक्तिः/दृष्टिः)

(ख) पादयोः तैलाभ्यङ्गात् ........................... उपशाम्यति। (बलम्/मरुतः/स्थैर्यम्)

(ग) मूर्ध्नितैलनिषेवणात् ........................ स्यात्। (निद्रालाभः/विद्यालाभः/धनलाभः)

(घ) अभ्यङ्गनित्यत्वात् नरः ...................... स्यात्। (कृशकायः/स्थूलः/बलवान्)

3. समस्तपदानि रचयत–

(क) निद्रायाः लाभः ........................................

(ख) प्रियं दर्शनं यस्य सः ........................................

(ग) अल्पा जरा यस्य सः ........................................

(घ) तैलस्य निषेवणात् ........................................

## 3.4 किम् अधिगतम्

- तैलाभ्यङ्गेन शरीराङ्गानि दृढानि भवन्ति। अतः तैलमर्दनं नित्यं कर्तव्यम्।
- शिरसि तैलनिषेवणात् शिरः शूलम् न जायते। केशाः च दृढमूलाः भवन्ति।
- पादयोः तैलमर्दनेन सौकुमार्यं, बलं स्थैर्यं च जायते।
- तैलाभ्यङ्गेन ओष्ठयोः स्फुटनं न भवति दन्ताश्च दृढमूलाः भवन्ति।
- 'मतुप्' (मत्) तद्धितप्रत्ययः अस्ति। 'अस्ति अस्य' इति विग्रहे 'मतुप्' भवति।

## 3.5 योग्यताविस्तारः

**(क) कविपरिचयः**

**चरकः** आयुर्वेस्य प्राचीनविद्वत्सु चरकः अन्यतमः अस्ति। सः राज्ञः कनिष्कस्य शासने राजवैद्यरूपेण उषितवान्। मूलतः तु अयं गान्धारवासी आसीत्। अस्य कालः ईसापूर्वं प्रथमशताब्दी इति मन्यते। चरकस्य यशः भारतात् बहिः अपि प्रसृतम्। कविराजचरकस्य विषये सत्यमुक्तम् – 'चरकस्तु चिकित्सते।'

**ग्रन्थपरिचयः**

**चरकसंहिता** चरकस्य आयुर्वेदीयः ग्रन्थः अस्ति। अयं सर्वप्रथमः सर्वश्रेष्ठः च कायचिकित्सायाः ग्रन्थः वर्तते। सहस्रवर्षेभ्यः आयुर्विज्ञानस्य मूलं स्रोतः चरकसंहिता एव

अस्ति। अयं ग्रन्थः अष्टभागेषु त्रिंशत्सु अध्यायेषु च विभक्तः। ग्रन्थे गद्यस्य पद्यस्य च उभयोः प्रयोगः कृतः। आयुर्वेदक्षेत्रे तु अयं ग्रन्थः ईदृशः लोकप्रियः जातः यत् अष्टभ्यां शताब्द्याम् एव अस्य अनुवादः अरबीभाषायां जातः। फारसीभाषायाम् अपि अनुवादः उपलभ्यते। पाठेऽस्मिन् प्रस्तुतः अंशः सूत्रस्थानस्य पंचम–अध्यायात् संकलितः।

**भावविस्तारः**

**तैलमर्दनम्–** न कर्णरोगाः वातोत्थाः नमन्याहनुसंग्रहः।
नोच्चैः श्रुतिर्न बाधिर्यं स्यान्नित्यं कर्णतर्पणात्।।

**पादाभ्यङ्गः–** खरत्वं स्तब्धता रौक्ष्यं श्रमः सुप्तिश्च पादयोः।
सद्य एवोपशाम्यन्ति पादाभ्यङ्गनिषेवणात्।।
न च स्याद् गृध्रसीवातः पादयोः स्फुटनं न च।
न शिरास्नायुसंकोचः पादाभ्यङ्गेन पादयोः।

**(ख) भाषा विस्तारः**

**धातुरूपाणि**

**√लभ्–लट् लकारः (आत्मनेपदे)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | लभते | लभेते | लभन्ते |
| मध्यमः पुरुषः | लभसे | लभेथे | लभध्वे |
| उत्तमः पुरुषः | लभे | लभावहे | लभामहे |

**अस् = लट् लकारः (परस्मैपदे)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अस्ति | स्तः | सन्ति |
| मध्यमः पुरुषः | असि | स्थः | स्थ |
| उत्तमः पुरुषः | अस्मि | स्वः | स्मः |

**अस् = विधिलिङ् लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | स्यात् | स्याताम् | स्युः |
| मध्यमः पुरुषः | स्याः | स्यातम् | स्यात |
| उत्तमः पुरुषः | स्याम् | स्याव | स्याम |

### अस् = लृट् लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | भविष्यति | भविष्यतः | भविष्यन्ति |
| मध्यमः पुरुषः | भविष्यसि | भविष्यथः | भविष्यथ |
| उत्तमः पुरुषः | भविष्यामि | भविष्यावः | भविष्यामः |

### अस् = लोट् लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | अस्तु | स्ताम् | सन्तु |
| मध्यमः पुरुषः | एधि | स्तम् | स्त |
| उत्तमः पुरुषः | असानि | असाव | असाम |

### अस् = लङ् लकारः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | आसीत् | आस्ताम् | आसन् |
| मध्यमः पुरुषः | आसीः | आस्तम् | आस्त |
| उत्तमः पुरुषः | आसम् | आस्व | आस्म |

**शब्दानां रूपाणि**

**हलन्तनपुंसकलिङ्गम् (सकारान्त)**

| मूलशब्दः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| शिरस् | प्रथमा | शिरः | शिरसी | शिरांसि |
| मनस् | द्वितीया | मनः | मनसी | मनांसि |
| नभस् | तृतीया | नभसा | नभोभ्याम् | नभोभिः |
| तपस् | चतुर्थी | तपसे | तपोभ्याम् | तपोभ्यः |
| यशस् | पंचमी | यशसः | यशोभ्याम् | यशोभ्यः |
| तेजस् | षष्ठी | तेजसः | तेजसोः | तेजसाम् |
| शिरस् | सप्तमी | शिरसि | शिरसोः | शिरस्सु |
| शिरस् | सम्बोधन | हे शिरः! | हे शिरसी! | हे शिरांसि! |

### नकारान्तपुल्लिंगशब्दानां रूपाणि

| मूलशब्दः | विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|---|
| मूर्धन् | प्रथमा | मूर्धा | मूर्धानौ | मूर्धानः |
| मूर्धन् | द्वितीया | मूर्धानम् | मूर्धानौ | मूर्ध्नः |
| महिमन् | तृतीया | महिम्ना | महिमभ्याम् | महिमभिः |
| लधिमन् | चतुर्थी | लघिम्ने | लघिमभ्याम् | लघिमभ्यः |
| गरिमन् | पंचमी | गरिम्नः | गरिमभ्याम् | गरिमभ्यः |
| अश्वत्थामन् | षष्ठी | अश्वत्थाम्नः | अश्वत्थाम्नोः | अश्वत्थाम्नाम् |
| मूर्धन् | सप्तमी | मूर्ध्नि | मूर्ध्नोः | मूर्धसु |
| मूर्धन् | सम्बोधन | हे मूर्धन्! | हे मूर्धानौ! | हे मूर्धानः! |

अनुरूपशब्दाः महिमन्, लधिमन्, गरिमन्, अश्वत्थामन्।

## 3.6 पाठान्तप्रश्नाः

1. क्रियापदानि चिनुत–

   (क) तैलप्रयोगेन पादयोः बलं जायते। ......................................

   (ख) दृष्टिः प्रसादं लभते। ..................................

   (ग) भवति अभ्यङ्गनित्यत्वात् नरः अल्पजरः। .............................

   (घ) मूर्ध्नि तैलनिषेवणात् निद्रालाभः स्यात्। ................................

   (ङ) मरुतश्चोपशाम्यति। ............................

2. म जूषायां दत्तानां शब्दानां सहायतया तैलाभ्यङ्गस्य लाभान् षड्वाक्येषु वर्णयत–

   | शिरसि, केशाः, मूर्ध्नि, इन्द्रियाणि, सुत्वक्, आननम्, नरः, बलवान्, पादयोः, स्थैर्यं, दृष्टिः, प्रसादम्, शिरःशूलं, प्रसीदन्ति, जायते, अभ्यङ्गेन, निद्रा, कृष्णाः, भवन्ति। |
   |---|

3. अधोलिखितेषु रिक्तस्थानेषु कोष्ठकात् चित्वा अव्ययपदानि लिखत–

   (न, च, नित्यं, एव, उच्चैः)

   (क) वृद्ध ......................... श्रृणोति।

   (ख) .................... तैलाभ्यङ्गात् नरः अल्पजरः भवति।

   (ग) शिरसि तैलनिषेवणात् केशाः कृष्णाः दीर्घाः ...................... भवन्ति।

   (घ) ईश्वरः .................... अस्माकं माता, पिता, बन्धुः सखा च अस्ति।

4. सन्धिं/सन्धिच्छेदं वा कुरुत–
   (क) भवति + अभ्यङ्गः ............................
   (ख) दृढमूलाः + च .........................
   (ग) च + उपशाम्यति ...............................
   (घ) .............. + ..................... स्नेहार्द्रः
   (ङ) .............. + ..................... चास्य
   (च) .............. + ..................... नरोऽल्पजरः
5. समस्तपदानां विग्रहं कृत्वा समासनाम अपि लिखत–
   (क) स्नेहाद्रशिरसः (ख) प्रियदर्शनः (ग) सुस्पर्शोपचिताङ्गः (घ) कण्ठशोषः
6. प्रदत्त–प्रकृति–प्रत्यययोगेन वाक्यपूर्तिं कुरुत–
   (क) (बल + मतुप्) ................. नरः शोभते।
   (ख) सा नारी (रूप + मतुप्) ............... अस्ति।
   (ग) (दान + मतुप्) ................. लक्ष्मीः धन्या।
   (घ) अत्र अयं (श्री + मतुप्) .................. कः आगतः?

## 3.7 उत्तराणि

**बोधप्रश्नाः**

1. (क) iii, (ख) iv, (ग) ii,
2. (क) iii, (ख) i, (ग) ii, (घ) v, (ङ) iv
3. (क) बलं, (ख) बलवान्, (ग) कृष्णा, (घ) शिरःशूलं, (ङ) स्थैर्यं।

**पाठगतप्रश्नाः**

**3.1**
1. (क) स्नेह + आर्द्रः, (ख) क्षयम् + यान्ति, (ग) दीर्घः + च,
   (घ) स्यात् + च (ङ) स्फुटनात् + भयम्
2. (क) v, (ख) i, (ग) ii, (घ) iii, (ङ) iv,
3. (i) शिरः शूलं न जायते
   (ii) खालित्यं न भवति।
   (iii) पालित्यं न भवति।
   (iv) केशाः न प्रपतन्ति
   (v) शिरः कपालानां बलं बर्धते।
   (vi) केशाः दृढमूलाः भवन्ति।
   (vii) केशाः दीर्घाः भवन्ति।
   (viii) केशाः कृष्णाः भवन्ति।
4. (क) शिरसः कपालानां बलं केन अभिवर्धते?
   (ख) केशाः कीदृशाः भवन्ति?

(ग) के क्षयं न यान्ति?

(घ) स्नेहार्द्रस्य शिरसः किं न जायते?

**3.2** 1. (क) i. नरः, ii. बलवान्, iii. अल्पजरः iv. च

(ख) i. सौकुमार्यं, ii. स्थैर्यं, iii. दृष्टिः iv. मरुतः

2. (क) दृष्टिः, (ख) मरुतः, (ग) निद्रालाभः, (घ) बलवान्

3. (क) निद्रालाभः, (ख) प्रियदर्शनः, (ग) अल्पजरः (घ) तैलनिषेवणात्

**3.6 पाठान्तप्रश्नाः**

1. (क) जायते, (ख) लभते, (ग) भवति, (घ) स्यात्, (ङ) उपशाम्यति
2. (i) शिरसि तैलाभ्यङ्गेन शिरःशूलं न जायते।

   (ii) केशाः दृढमूलाः, दीर्घाः कृष्णाः च भवन्ति।

   (iii). मूर्ध्नि तैलनिषेवणात् इन्द्रियाणि प्रसीदन्ति, आननं सुत्वक् भवति निद्रा च सरलतया आगच्छति।

   (iv) नित्यम् अभ्यङ्गेन नरः बलवान् भवति।

   (v) अभ्यङ्गेन पादयोः बलं वर्धते।

   ( vi). अनेन दृष्टिः प्रसादं लभते।
3. (क) उच्चैः, (ख) नित्यं, (ग) च, (घ) एव
4. (क) भवत्यभ्यङ्गः (ख) दृढमूलाश्च (ग) चोपशाम्यति (घ) स्नेह + आर्द्रः

   (ङ) च + अस्य (च) नरः + अल्पजरः।
5. (क) स्नेहेन आर्द्रं शिरः यस्य सः (बहुव्रीहिः)

   (ख) प्रियं दर्शनं यस्य सः (बहुव्रीहिः)

   (ग) सुखेन स्पृश्यानि उपचितानि अङ्गानि यस्य सः (बहुव्रीहिः)

   (घ) कण्ठस्य शोषः (षष्ठी त.)
6. (क) बलवान् (ख) रूपवती (ग) दानवती (घ) श्रीमान्

# 4

# वाचां मण्डनं सत्यम्

भवान् जानाति एव यत् संसारे ज्ञानस्य प्राप्तिः प्रश्नमाध्यमेनैव भवति। यदा कोऽपि प्रश्नः मनसि समायाति तदा वयं तस्य प्रश्नस्य उत्तरं ज्ञातुमिच्छामः। यदा उत्तरं प्राप्यते तदा तस्य उपरि चिन्तनं भवति। "वादे वादे जायते तत्त्वबोधः" इत्यपि कथ्यते। यथा यथा वयं चिन्तनं कुर्मः तथा तथा अस्माकं ज्ञाने वृद्धिः भवति। उपनिषत्सु अपि प्रश्नमाध्यमेन ज्ञानं प्रदत्तम् अस्ति। भगवता आदिशंकराचार्येण अपि, स्वकीये ग्रन्थे 'प्रश्नोत्तरमालिकायाम्' अस्मभ्यं सुन्दरं ज्ञानं दत्तम्। तस्मात् ग्रन्थात् एव केचन प्रश्नाः तेषाम् उत्तराणि च अस्मिन् पाठे संकलितानि।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- जीवने अपेक्षितानां मूल्यानां वर्णनं कर्तुं समर्थः भविष्यति;
- सज्जनानां गुणान् लेखितुं क्षमः भविष्यति;
- उत्तराणि अधिकृत्य सम्बद्धप्रश्नान् लेखितुं शक्तः भविष्यति;
- 'मोऽनुस्वारः' इति नियमस्य उदाहरणानि चेष्यति;
- विशेषणपदानां विलोमपदानि लेखितुं सक्षमः भविष्यति;
- वाक्येषु प्रयुक्तानि तत्पुरुष, कर्मधारय–बहुव्रीहिसमस्तपदानि चेष्यतिं;
- जशत्व–श्चुत्वसन्धिं कर्तुं शक्ष्यति;
- विसर्गस्थाने उत्वं, रत्वं, सत्वं च कर्तुं शक्ष्यति;
- त्व–तल् भाववाचकप्रत्यययोः प्रयोगं करिष्यति;
- स्पृह् धातुयोगे चतुर्थी–उपपदविभक्तेः प्रयोगं करिष्यति।










## क्रियाकलापः

भवन्तः जानन्ति एव यत् ईश्वरः तस्य एव सहायकः यः उद्यमशीलः भवति। एवमेव सदा सज्जनानां सङ्गतिः करणीया। गुरुजनः सदा सम्माननीयः। ईदृशाः विषयाः एव अत्र प्रश्नोत्तररूपेण प्रदत्ताः सन्ति। तेषां सम्यक् मेलनं कुर्वन्तु–

**यथा**

| क (प्रश्नाः) | ख (उत्तराणि) |
|---|---|
| (क) अस्माभिः प्रातः कदा उत्थातव्यम्? | (i) गुरुजनानाम् |
| (ख) कस्मै भोजनं दातव्यम्? | (ii) ब्राह्ममुहूर्ते |
| (ग) विद्यालयं कदा गन्तव्यम्? | (iii) संस्कृतिः |
| (घ) कैः सह संगतिः करणीया? | (iv) यथासमयम् |
| (ङ) ईश्वरः कस्य सहायकः? | (v) सज्जनैः |
| (च) केषां सम्मानः करणीयः? | (vi) उद्यमशीलस्य |
| (छ) स्वर्गादपि गरीयसी का? | (vii) वृक्षाणाम् |
| (ज) भारतस्य प्रतिष्ठा का? | (viii) बुभुक्षिताय |
| (झ) केषां संरक्षणं करणीयम्? | (ix) माता |



## 4.1 मूलपाठः

### वाचां मण्डनं सत्यम्

सम्प्रति पाठं पठामः

पातुं कर्णाञ्जलिभिः किममृतमिह युज्यते सदुपदेशः
किं गुरुताया मूलं यदेतदप्रार्थनं नाम।।1।।

किं मरणं मूर्खत्वं कि चानर्घं यदवसरे दत्तम्।
आमरणात्किं शल्यं प्रच्छन्नं यत्कृतं पापम् ।।2।।

दानं प्रियवाक्यसहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं दुर्लभमेतच्चतुर्भद्रम् ।।3।।

किं शोच्यं कार्पण्यं सति विभवे किं प्रशस्तमौदार्यम्।
कः पूज्यो विद्वद्भिः स्वभावतः सर्वदा विनीतो यः।।4।।

**शब्दार्थाः**

पातुम् = पीने के लिए
कर्णाञ्जलिभिः =
कर्णरूपी अञ्जलियों से,
इह = इस संसार में,
युज्यते = उचित है, ठीक है
सदुपदेशः = सज्जनों का उपदेश,
गुरुतायाः = बड़प्पन का,
अप्रार्थनम् = न मांगना,
अनर्घम् = अमूल्य,
आमरणात् = मरणपर्यन्त,
प्रच्छन्नम् = गुप्त रूप से,
शल्यम = काँटा,
पुंसा = मनुष्य के द्वारा,
अगर्वम्=गर्वरहित,
चतुर् = चार

कः कुलकमलदिनेशः सति गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्प्रियहितवचनस्य धर्मनिरतस्य।।5।।

कस्मै स्पृहयति कमला त्वनलसचित्ताय नीतिवृत्ताय।
त्यजति च कं सहसा द्विजगुरुसुरनिन्दाकरं च सालस्यम्।।6।।

कि सम्पाद्यं मनुजैर्विद्या वित्तं बलं यशः पुण्यम्।
किं सर्वगुणविनाशी लोभः शत्रुश्च कः कामः।।7।।

को वर्धते विनीतः को वा क्षीयेत यो दृप्तः।
को न प्रत्येतव्यो ब्रूते यश्चानृतं शश्वत् ।।8।।

किं दानमनाकाक्षं किं मित्रं यो निवारयति पापम्।
कोऽलङ्कारः शीलं किं वाचां मण्डनं सत्यम्।।9।।

भद्रम् = कल्याणकारी
सति विभवे = ऐश्वर्य होने पर
गुणविभवे सति = गुणों की सम्पत्ति होने पर भी,
स्पृहयति = इच्छा करती है,
नीतिवृत्ताय = सदाचारी के लिए,
सम्पाद्यम् = करना चाहिए,
मनुजैः = मनुष्यों के द्वारा,
वर्धते = उन्नति करता है,
हीयेत = घटे, क्षीण होवे,
दृप्तः = अभिमानी,
प्रत्येतव्यः = विश्वास के योग्य,
शश्वत् = सदैव,
अनाकांक्षं = बदले में कुछ इच्छा किये बिना
निवारयति = दूर करता है,
वाचाम् = वाणियों की,
मण्डनम् = शोभा

## 4.2 बोधप्रश्नाः

भवद्भिः मूलपाठः पठितः। अत्र पाठम् आधृत्य बोधप्रश्नाः दत्ताः सन्ति।

1. पाठात् चित्वा प्रश्नान् उत्तरत–

| | |
|---|---|
| **यथा** किं मरणम्? | मूर्खत्वम् |
| (क) किं शोच्यम्? | ---------- |
| (ख) कः कुलकमलदिनेशः? | ---------- |
| (ग) किं सम्पाद्यं मनुजैः? | ---------- |
| (घ) कः वर्धते? | ---------- |
| (ङ) कः सर्वगुणविनाशी? | ---------- |

2. श्लोकांशान् रेखया योजयत

| | |
|---|---|
| (क) कः पूज्यो विद्वद्भिः? | (i) ब्रूते यश्चानृतं शश्वत् |
| (ख) कस्मै स्पृहयति कमला | (ii) दुर्लभमेतच्चतुर्भद्रम्। |
| (ग) को न प्रत्येतव्यो | (iii) ज्ञानमगर्वं क्षमान्वितं शौर्यम्। |

| | |
|---|---|
| (घ) दानं प्रियवाक्यसहितं | (iv) प्रियहितवचनस्य धर्मनिरतस्य। |
| (ङ) कस्य वशे जगदेतत् | (v) स्वभावतः सर्वदा विनीतो यः। |
| (च) वित्तं त्यागसमेतम् | (vi) किं वाचां मण्डनं सत्यम्। |
| (छ) किं मरणं मूर्खत्वम् | (vii) किं चानर्धं यदवसरे दत्तम् |
| (ज) कोऽलंकारः शीलम् | (viii) त्वनलसचिताय नीतिवृत्ताय |

3. विलोमपदानि मेलयत (विपरीतार्थकः शब्दः एव विलोमशब्दः कथ्यते)

| **यथा सुखम्** | **दुःखम्** |
|---|---|
| (क) विनीतः | (i) औदार्यम् |
| (ख) कार्पण्यम् | (ii) पापम् |
| (ग) पुण्यम् | (iii) त्यागः |
| (घ) अप्रार्थनम् | (iv) शत्रुः |
| (ङ) मित्रम् | (v) दृप्तः |
| (च) लोभः | (vi) प्रार्थनम् |

## 4.3 अधुना अवगच्छामः

### प्रथमः अंशः

**श्लोकः– 1**

पातुं कर्णाञ्जलिभिः
किममृतमिह युज्यते सदुपदेशः
किं गुरुताया मूलं
यदेतदप्रार्थनं नाम।।1।।

**पदच्छेदः** पातुम् कर्णाञ्जलिभिः किम् अमृतम् इह युज्यते सदुपदेशः किम् गुरुतायाः मूलम् यत् एतत् अप्रार्थनम् नाम।

**अन्वयः** इह कर्णाञ्जलिभिः पातुम् किम् अमृतम् युज्यते? सदुपदेशः। गुरुतायाः मूलम् किम्? यत् एतत् अप्रार्थनम् नाम।

भवन्तः मातापित्रोः गुरोः च मुखात् यदा कदा सदुपदेशं श्रुतवन्तः। अत्रापि विविध जीवनमूल्यानां संकेतः कृतः। अस्मिन् पद्ये प्रश्नद्वयम् वर्तते। एवं हि प्रथमः प्रश्नः कः? अंजलिसदृशैः कर्णैः अस्मिन् संसारे किम् अमृतं पातुं युज्यते?

तस्य किम् उत्तरम्? सदुपदेशः, सताम् सज्जनानाम् उपदेशः। यतः सज्जनानाम् उपदेशः जीवनाय कल्याणकारी भवति।

द्वितीयः प्रश्नः कः? गुरुतायाः मूलं किम्?

'गुरुता' पदस्य कः अर्थः? उच्चता, महत्ता, व्यक्तेः गौरवम् इति।

किम् उत्तरम् दत्तम्? तत् अप्रार्थनम् नाम।

अप्रार्थनम् इति किम्? न प्रार्थना, न याचना, कम् अपि का अपि याचना न करणीया।

**भावार्थः**– अस्माकं कर्णाः सन्ति। ते कर्णाः अञ्जलिवत् सन्ति। यथा वयम् अञ्जलिभिः जलं पिबामः तथैव कर्णैः सज्जनानाम् उपदेशाः श्रोतव्याः। एवमेव यदा कश्चिद् याचनां करोति, तदा तस्य महत्त्वं क्षीयते। अतएव हीनः भूत्वा याचना न करणीया।

**श्लोकः– 2**

इदानीं **द्वितीयं श्लोकं** बोधामः।

किं मरणं मूर्खत्वं
किं चानर्घं यदवसरे दत्तम्।
आमरणात् किं शल्यं
प्रच्छन्नं यत्कृतं पापम्।।2।।

**पदच्छेदः**– किम् मरणम् मूर्खत्वम् किम् च अनर्घम् यत् अवसरे दत्तम्। आमरणात् किम् शल्यम् प्रच्छन्नम् यत् कृतम् पापम्।

**अन्वयः**– मरणम् किम्? मूर्खत्वम्। किम् च अनर्घम्, यत् अवसरे दत्तम्। आमरणात् किम् शल्यम्, यत् प्रच्छन्नम् कृतम् पापम्।

अस्मिन् पद्यांशे त्रयः प्रश्नाः सन्ति। मरणं किम्? मूर्खत्वम् एव मरणम्, मृत्युतुल्यम्। अज्ञानं मनुष्याय मृत्युवत् वर्तते।

अमूल्यं किम्? यत् किमपि अवसरे दत्तम् अर्थात् यत् किमपि यथासमयम् आवश्यकतानुसारं दीयते तदेव अमूल्यम्। यदा कृषिः शुष्का जाता तदा वृष्टेः कः लाभः?

'आमरणात् शल्यं किम्?' अर्थात् मृत्युपर्यन्तं किं रूपं शल्यम् (कण्टकम्) वेदनाप्रदं भवति? एतस्य उत्तरम् अस्ति "यत् पापं प्रच्छन्नं कृतम्" अर्थात् यत् पापं गुप्तरूपेण कृतं तत् पापं मृत्युपर्यन्तं वेदनां जनयति।

**भावार्थः**– यस्य समीपे ज्ञानं नास्ति, यः मूर्खः अस्ति तस्य जीवनं व्यर्थं भवति, सः संसारे किमपि कर्तुं न शक्नोति। अमूल्यं वस्तु तदेव भवति यत् समयेन दीयते। यदि कश्चिद् पिपासार्तः तस्मै जलप्रदानस्य महत्त्वं वर्तते परन्तु यस्य पिपासा शान्ता जाता तस्मै जलप्रदानेन को लाभः। एवमेव मृत्युपर्यन्तं कष्टकरं किं भवति, यत् किमपि पापं गुप्तरूपेण कृतम्। यदि कश्चित् अन्यस्य हत्यां करोति केनापि दृष्टमपि न स्यात् तत्पापं तस्य कृते शल्यवत्, कण्टकवत् वेदनां जनयति।

**श्लोकः– 3**

इदानीं **तृतीयं श्लोकं** बोधामः

दानं प्रियवाक्यसहितं
ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागसमेतं
दुर्लभमेतच्चतुर्भद्रम्।।3।।

**पदच्छेदः**– दानम् प्रियवाक्यसहितम् ज्ञानम् अगर्वम् क्षमान्वितम् शौर्यम्। वित्तम् त्यागसमेतम् दुर्लभम् एतत् चतुर्भद्रम्।

**अन्वयः**– एतत् चतुर्भद्रं दुर्लभम्– प्रियवाक्यसहितम् दानम्, अगर्वम् ज्ञानम्, क्षमान्वितम् शौर्यम्, त्यागसमेतम् वित्तम्।

भवन्तः अपि जानन्ति यत् 'दानम्, ज्ञानम्, शौर्यम् धनं च' एते चत्वारः विशिष्टाः गुणाः सर्वत्र दुर्लभाः। प्रथमः गुणः कः? दानम्। कीदृशम् दानम्? प्रियवाक्यसहितं, प्रेम्णा दत्तं दानम्, श्रद्धया दत्तं दानम्। द्वितीयः गुणः कः? ज्ञानम्। कीदृशं ज्ञानम्? अगर्वम्, गर्वरहितम्। तृतीयः दुर्लभः गुणः कः? शौर्यम्। कीदृशं शौर्यम्? क्षमायुक्तम्। चतुर्थः गुणः कः? धनम्, यत् दानयुक्तं स्यात्।

**भावार्थः** मानवेषु एते चत्वारः गुणाः दुर्लभाः सन्ति। जनाः दानं कुर्वन्ति किन्तु अंहकारपूर्वकम् आत्मानं 'दानी' इति मत्वा दानं कुर्वन्ति। अतः प्रथमः गुणः अस्ति प्रियवाक्यैः मधुरवाक्यैः दानम्। द्वितीयः गुणः वर्तते नम्रतायुक्तं ज्ञानम्। प्रायः येषां समीपे किंचिन्मात्रं ज्ञानं भवति ते आत्मानं सर्वज्ञाः इति मन्यन्ते अतः अभिमानरहितं ज्ञानं द्वितीयः गुणः अस्ति। तृतीयः गुणः अस्ति क्षमासहिता वीरता। प्रायः ये वीराः भवन्ति ते क्रूराः अत्याचारिणः भवन्ति परन्तु वीरता क्षमया युक्ता भवेत्। 'क्षमा शक्तस्य भूषणम्' इत्यपि उच्यते। ये जनाः धनिनः भवन्ति ते दानं न कुर्वन्ति परन्तु धनस्य उपयोगः तु दाने एव अस्ति।

## व्याकरणबिन्दवः

भवन्तः व्य×जनसन्धेः विषये पूर्वकक्षासु पठितवन्तः एव। अत्र पुनः जशत्व–श्चुत्व सन्धेः उदाहरणानि पश्यामः।

**व्यंजनसन्धेः उदाहरणानि**

**जश्त्वसन्धिः** – तृतीयाक्षरस्य नियमः स्वरपरे वर्गस्य प्रथमाक्षरस्य स्थाने तृतीयः वर्णः भवति। (झलां जशोऽन्ते)

| | | | |
|---|---|---|---|
| यथा–सत्+उपदेशः | = सदुपदेशः | त् + उ | = दु |
| यत्+एतत् | = यदेतत् | त् + ए | = दे |
| यदेतत्+अप्रार्थनम् | = यदेतदप्रार्थनम् | त् + अ | = द |
| यत् + अवसरे | = यदवसरे | त् + अ | = द |
| एतत्+चतुर्भद्रम् | = एतच्चतुर्भद्रम् | त्+च | = च्च |

**श्चुत्वसन्धिः** – चकारयोगे त् वर्णस्य च् वर्णः भवति। (स्तोः श्चुनाश्चुः)

यथा– तत् + चित्रम् = तच्चित्रम्

**समस्तपदानां विग्रहाः**

**कर्मधारयः**– विशेषण–विशेष्यपदयोः समासः। उपमान–उपमेयपदयोः समासः।

यथा– सत्यम् वाक्यम् = सत्यवाक्यम्

बालः मृगः = बालमृगः

### उपमान–उपमेयपदे

घन इव श्यामः = घनश्यामः

पुरुषः सिंहः इव = पुरुषसिंहः

अत्र उपमाने एव– घनः, सिंहः च, उपमेयौ च श्यामः, पुरुषः इति।

| | | |
|---|---|---|
| कर्णः अंजलिः इव | = कर्णाञ्जलिः ताभिः | कर्मधारयः |
| प्रियं वाक्यम् | = प्रियवाक्यम् | कर्मधारयः |
| न प्रार्थनम् इति | = अप्रार्थनम् | नञ्तत्पुरुषः |
| न अर्घम् इति | = अनर्घम् | नञ्तत्पुरुषः |
| सताम् उपदेशः इति | = सदुपदेशः | षष्ठीतत्पुरुषः |
| प्रियवाक्येन सहितम् | = प्रियवाक्यसहितम् | तृतीयातत्पुरुषः |
| सत्येन अन्वितम् | = सत्यान्वितम् | तृतीयातत्पुरुषः |
| क्षमया अन्वितम् | = क्षमान्वितम् | तृतीयातत्पुरुषः |
| त्यागेन समेतम् | = त्यागसमेतम् | तृतीयातत्पुरुषः |

तत्पुरुषः – उत्तरपदप्रधानः भवति। द्वितीयाविभक्तितः सप्तमीविभक्तिपर्यन्तं भवति।

| | | | |
|---|---|---|---|
| यथा– | ग्रामम् गतः | = ग्रामगतः | (द्वि. त.) |
| | मुनिना रचितम् | = मुनिरचितम् | (तृ. त.) |
| | पाकाय शाला | = पाकशाला | (च. त.) |
| | सिंहात् भयम् | = सिंहभयम् | (पं. त.) |
| | रामस्य चरितम् | = रामचरितम् | (ष. त.) |
| | क्रीडायां निपुणः | = क्रीडानिपुणः | (स.त.) |

**नञ् तत्पुरुषः** – नञ् (न) पदेन सह समासः 'नञतत्परुषः' कथ्यते।

| | | |
|---|---|---|
| यथा– | न धर्मः | = अधर्मः |
| | न उत्तीर्णः | = अनुत्तीर्णः |

**तद्धितप्रत्ययप्रयोगः**– त्व, तल् प्रत्ययौ भाववाचकप्रत्ययौ। 'त्व' प्रत्ययान्तशब्दः सदा नपुंसकलिङ्गः, तल् प्रत्ययान्तशब्दः स्त्रीलिङ्गः भवति।

| | | |
|---|---|---|
| यथा–गुरुता | गुरु+तल्, गुरुत्वम् | (गुरु + त्व) |
| लघुता | लघु+तल्, लघुता | (लघु + त्व) |

**कृत्प्रतयय–प्रयोगः**–

| | | | |
|---|---|---|---|
| पातुम् | पा+तुमुन् | पातुम् | अव्ययम् |
| दत्तम् | दा+क्त | नपुं. प्र. ए. व. | |
| कृतम् | कृ+क्त | नपुं. प्र. ए. व. | |

| | | |
|---|---|---|
| प्रच्छन्नम् | प्र+छद्+क्त | नपुं. प्र. ए. व. |
| जितम् | जि+क्त | नपुं. प्र. एक व. |

**विभक्तिप्रयोगः**

**द्वितीयान्तपदानि**

| | | | |
|---|---|---|---|
| कम् | 'किम्' | द्वितीया | एकवचनम् |
| अधमम् | 'अधम' | द्वितीया | एकवचनम् |
| पापम् | 'पाप' | द्वितीया | एकवचनम् |

**तृतीयान्तपदानि**

| **शब्दः** | **मूलशब्दः** | **विभक्तिः** | **वचनम्** |
|---|---|---|---|
| कर्णाञ्जलिभिः | कर्णांजलि | तृतीया | बहुवचनम् |
| पुंसा | पुंस् | तृतीया | एकवचनम् |
| **षष्ठ्यन्तपदानि** | | | |
| गुरुतायाः | गुरुता | षष्ठी | एकवचनम् |
| **सप्तम्यन्तपदानि** | | | |
| अवसरे | अवसर | सप्तमी | एकवचनम् |

## भावार्थः

कानों से हमें सज्जनों के उपदेश सुनने चाहिए, किसी से मांगने में अपनी प्रतिष्ठा की हानि होती है। ज्ञान ही जीवन है। मूर्खता मृत्यु के समान है। अमूल्य वस्तु वही है जो समय पर दी जाए। यदि हम छिप कर कोई पाप करते हैं तो वह पाप मृत्युपर्यन्त दुःखदायी होता हैं। संसार में चार गुण बहुत ही दुर्लभ हैं 'प्रिय वचनों सहित दान, अभिमान रहित ज्ञान, क्षमा से युक्त वीरता और त्याग से युक्त धन।'

## पाठगतप्रश्नाः 4.1

1. विशेषणानि विशेष्यैः सह योजयत

| **'अ'** | **'ब'** |
|---|---|
| **विशेषणानि** | **विशेष्याणि** |
| (क) प्रच्छन्नम् | (i) शौर्यम् |
| (ख) अगर्वम् | (ii) पापम् |
| (ग) क्षमान्वितम् | (iii) ज्ञानम् |

2. प्रश्नान् उत्तरत

(क) अनर्थं किम्?

(ख) दानम् किम्?

(ग) किं पातुं युज्यते?

(घ) कीदृशं वित्तं दुलर्भम्?

(ङ) शल्यवत् किं पीडयति?

3. विग्रहान् योजयित्वा समस्तपदानि रचयत

(क) प्रियं वाक्यम् ————————————

(ख) त्यागेन समेतम् ————————————

(ग) क्षमया अन्वितम् ————————————

(घ) अंजलिः इव कर्णः ————————————

(ङ) न प्रार्थनम् इति ————————————

---

## द्वितीयः अंशः

**श्लोकः – 4**

**किं शोच्यं कार्पण्यं सति**
**विभवे किं प्रशस्तमौदार्यम्।**
**कः पूज्यो विद्वद्भिः स्वभावतः**
**सर्वदा विनीतो यः।।4।।**

**पदच्छेदः—** किम् शोच्यम् कार्पण्यम्, सति विभवे किं प्रशस्तम् औदार्यम्। कः पूज्यः विद्वद्भिः, स्वभावतः सर्वदा विनीतः यः।

**अन्वयः—** शोच्यम् किम्? कार्पण्यम्। विभवे सति किं प्रशस्तम्? औदार्यम्। विद्वद्भिः कः पूज्यः? यः सर्वदा स्वभावतः विनीतः।

जीवने शोच्यं किम्? कार्पण्यं, कृपणता, उदारतायाः अभावः। तदेव शोचनीयम्।

विभवे सति किं प्रशस्तम्? औदार्यम्, उदारता। उदारता एव प्रशंसनीया।

कदा औदार्यं प्रशस्तम्? विभवे सति ऐश्वर्ये सति

कः पूज्यः? यः विनीतः (विनम्रः) सः विद्वद्भिः पण्डितैः, विद्वज्जनैः पूज्यः भवति।

अर्थात् यः सर्वदा = सर्वासु अवस्थासु स्वभावतः = प्रकृत्या एव नम्रतायुक्तः भवेत् सः विद्वद्भिः प्रशंसनीयः सम्माननीयः भवति।

**भावार्थः—** प्रायः जनाः धनिकाः भूत्वा अपि ऐश्वर्यशालिनः भूत्वा अपि कस्मैचित् दानं न कुर्वन्ति न च सहायतां कुर्वन्ति। अतः कृपणता निन्द्या भवति उदारता च स्तुतियोग्या । विद्वज्जनाः कं पूजयन्ति इति प्रश्नस्य उत्तरे कथितम् यत् यः मनुष्यः सर्वदा एव स्वभावतः एव विनम्रः भवति स एव विद्वज्जनैः पूज्यः। "भवन्ति नम्राः तरवः फलोद्गमैः।"

क: कुलकमलदिनेशः सति
गुणविभवेऽपि यो नम्रः।
कस्य वशे जगदेतत्
प्रियहितवचनस्य धर्मनिरतस्य।।5।।

**श्लोकः– 5**

**पदच्छेदः–** क: कुलकमलदिनेशः सति गुणविभवे अपि यः नम्रः। कस्य वशे जगत् एतत् प्रियहितवचनस्य धर्मनिरतस्य।

**अन्वयः–** कुलकमलदिनेशः क:? गुणविभवे अपि सति यः नम्रः। एतत् जगत् कस्य वशे? प्रियहितवचनस्य धर्मनिरतस्य।

अस्मिन् पद्यांशे प्रश्नद्वयम् अस्ति।

कुलकमलदिनेशः क:? यः नम्रः। गुणविभवे सति अपि। गुणानां बाहुल्ये अपि। नम्रजनेन एव कुलस्य कमलं विकसति।

एतत् जगत् कस्य वशे अस्ति? यस्य वचनानि प्रियाणि हितकराणि च भवन्ति। सः प्रियहितवचनः नरः धर्मे निरतः भवेत्।

**भावार्थः–** कुले अनेके जनाः सन्ति। सूर्यः कमलानि विकासयति। तथैव यः गुणैः सम्पन्नः अपि अस्ति, विनीतः स नरः परिवारस्य सर्वेषां सदस्यानां विकासं करोति। स एव पूज्यः। वाणी एव मनुष्यस्य सर्वोत्तमं भूषणम्। यः नरः प्रियं हितकरं च वचनं ब्रवीति, धर्मे च निरतः सः एव संसारस्य उपरि राज्यं करोति।

कस्मै स्पृहयति कमला
त्वनलसचित्ताय नीतिवृत्ताय।
त्यजति च कं सहसा
द्विजगुरुसुरनिन्दाकरं च
सालस्यम्।।6।।

**श्लोकः – 6**

इदानीं **षष्ठं श्लोकं** बोधामः

**पदच्छेदः–** कस्मै स्पृहयति कमला तु अनलसचित्ताय नीतिवृत्ताय। त्यजति च कम् सहसा द्विजगुरुसुरनिन्दाकरम् च सालस्यम्।

**अन्वयः–** कमला तु कस्मै स्पृहयति, अनलसचित्ताय नीतिवृत्ताय। कम् च सहसा त्यजति, द्विजगुरुसुरनिन्दाकरं सालस्यम् (च)।

अस्मिन् पद्यांशे अपि प्रश्नद्वयम् एव।

कमला इति का? कमला इति लक्ष्मीः

सा कस्मै स्पृहयति? अनलसचित्ताय, आलस्यरहिताय मनुष्याय। नीतिवृत्ताय, नीतिपूर्णम् आचरणं यस्य तस्मै।

कमला कं त्यजति? द्विजगुरुसुरनिन्दाकरम् अर्थात् विदुषां गुरूणां देवतानां च निन्दाकारकम्।

अन्यं कं त्यजति? आलस्येन सह विद्यमानः यः तम् आलस्ययुक्तं जनम्।

**भावार्थः–** कः लक्ष्मीं प्राप्नोति इति प्रश्ने कृते यः आलस्यं न करोति, नीतेः पालनं करोति, धर्माचरणं करोति। लक्ष्मीः कं सहसा त्यजति इति प्रश्नस्य उत्तरे शंकराचार्यः वदति यः मनुष्यः विद्वज्जनानां गुरूणां देवतानां निन्दां करोति, आलस्यं च करोति लक्ष्मीः तस्य परित्यागं करोति। परनिन्दा न करणीया। उक्तं च "उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः"

## व्याकरणबिन्दवः

**विभक्तिप्रयोगः**

विभवे सति भावे सप्तमी विभक्तिः, यदा विभवः भवति तदा।

गुणविभवे सति भावे सप्तमी विभक्तिः, गुणानां विभवः यदा भवति तदा।

**स्पृह् धातोः योगे चतुर्थीविभक्तिः भवति।**

(i) कमला <u>कस्मै</u> स्पृहयति?

(ii) कमला <u>अनलसाय</u> स्पृहयति।

(iii) कमला <u>नीतिवृत्ताय</u> स्पृहयति।

**सन्धिप्रयोगः**

**(क) संयोगः अनुस्वारप्रयोगः च**

| | |
|---|---|
| प्रशस्तम् औदार्यम् | = प्रशस्तमौदार्यम् (अत्र मकारस्य अनुस्वारः न जातः) यतः अत्र वर्णानां संयोगः एव न तु सन्धिः। |
| कम् सहसा | = कं सहसा |

(यदा परपदे स्वरः भवति तदा मकारस्य अनुस्वारः न भवति किन्तु यदि व्यंजनं भवति तदा मकारस्य स्थाने अनुस्वारः भवति।)

**समस्तपदानां विग्रहाः** प्रथमं हि बहुव्रीहि–समासविषये सम्यक् पठामः।

**बहुव्रीहिः** अन्यपदार्थप्रधानः बहुव्रीहिः कथ्यते।

यथा– <u>दश</u> <u>आननानि</u> यस्य सः।

**पाठगतसमस्त पदानां विग्रहाः**

| | | |
|---|---|---|
| दिनानाम् ईशः | = दिनेशः | षष्ठीतत्पुरुषः |
| कुलस्य कमलानां दिनेशः | = कुलकमलदिनेशः | षष्ठीतत्पुरुषः |
| प्रियं च हितं च | = प्रियहितम् | द्वन्द्वः |
| प्रियहितं वचनम् | = प्रियहितवचनम् | कर्मधारयः |
| प्रियहितवचनं यस्य तस्य | = प्रियहितवचनस्य | बहुव्रीहिः |
| अनलसचित्तं यस्य तस्मै | = अनलसचित्ताय | ,, |
| धर्मे निरतः | = धर्मनिरतः | सप्तमीतत्पुरुषः |
| द्विजः च गुरवः च सुराः च | = द्विजगुरुसुराः | द्वन्द्वः |
| द्विजगुरुसुराणां निन्दा | = द्विजगुरुसुरनिन्दा | षष्ठीतत्पुरुषः |
| द्विजगुरुसुरनिन्दां करोति इति | = द्विजगुरुसुरनिन्दाकरः तम्। | उपपदतत्पुरुषः |
| आलस्येन सह विद्यमानः तम् | = सालस्यम् | सहपूर्वपदबहुव्रीहिः |

टिप्पणी

**भावार्थः**— संसार में विनम्रता बहुत बड़ा गुण है। ऐश्वर्ययुक्त होने के साथ–साथ मनुष्य को उदार भी होना चाहिए। मधुर और हितकारी वचन बोलने वाला तथा धर्म में लगा व्यक्ति संसार को भी वश में कर लेता है। आलस्य और परनिन्दा बहुत बड़े दुर्गुण हैं।

## पाठगतप्रश्नाः 4.2

1. अधोलिखितानां प्रश्नानाम् उत्तरं लिखत

   (क) शोच्यं किम्? ————————————

   (ख) प्रशस्तं किम्? ————————————

   (ग) पूज्यः कः? ————————————

   (घ) कः कुलकमलदिनेशः? ————————————

   (ङ) एतत् जगत् कस्य वशे अस्ति? ————————————

   (च) कमला कं त्यजति? ————————————

2. विलोमपदानि मेलयत

| | |
|---|---|
| (क) शोच्यम् | (i) औदार्यम् |
| (ख) कार्पण्यम् | (ii) द्विजगुरुसुरप्रशंसाकरम् |
| (ग) अलसचित्ताय | (iii) प्रशस्यम् |
| (घ) निरालस्यम् | (iv) निरलसचित्ताय |
| (ङ) द्विजगुरुसुरनिन्दाकरम् | (v) त्यजति |
| (च) स्पृहयति | (vi) सालस्यम् |

3. समस्तपदानि रचयत

   (क) (i) प्रियं च हितं च = ————————

   (ii) प्रियं च हितं च वचनम् = ————————

   (iii) प्रियहितवचनं यस्य तस्य = ————————

   (ख) (i) धर्मे निरतः = ————————

   (ग) (i) न अलसम् = ————————

   (ii) आलस्येन सह विद्यमानः तम् = ————————

   (iii) अनलसं चित्तं यस्य तस्मै = ————————

   (घ) (i) द्विजः च गुरुः च सुराः च ————————

   (ii) द्विजगुरुसुराणां निन्दा = ————————

   (ङ) (i) नीतिः एव वृत्तम् = ————————

   (ii) नीतिः एव वृत्तं यस्य तस्मै = ————————

टिप्पणी

## तृतीयः अंशः

**श्लोकः – 7**

अधुना, **सप्तमं श्लोकं** पठामः।

**पदच्छेदः**– किम् सम्पाद्यम् मनुजैः विद्या वित्तम् बलम् यशः पुण्यम्। कः सर्वगुणविनाशी लोभः शत्रुः च कः कामः।

**अन्वयः**– मनुजैः किं सम्पाद्यम्? विद्या, वित्तम्, बलम् यशः पुण्यम्। सर्वगुणविनाशी कः? लोभः। शत्रुः च कः? कामः।

अस्मिन् पद्ये त्रयः प्रश्नाः सन्ति।

सम्पाद्यम् किम्? सम्पाद्यम् प्राप्तव्यम्, अर्जितव्यम् इति। मनुजैः किं किं सम्पाद्यम्? विद्या, वित्तम् (धनम्) बलं (शक्तिः) यशः, पुण्यम् च।

सर्वगुणविनाशी कः? अर्थात् सर्वेषां गुणानां नाशकः कः? लोभः। यदा लोभः आगच्छति, सर्वे गुणाः नश्यन्ति।

कः च शत्रुः? कामः, इच्छा, वासना।

**भावार्थः**– जीवने प च गुणाः अपेक्षिताः विद्या, धनं, शक्तिः, सत्कर्मभिः अर्जितं यशः, पुण्यम् च। एतेषां गुणानां नाशः भवति यदि वयं लोभं कुर्मः। वासना, अधिकाधिकप्राप्तेः इच्छा तु सर्वेषाम् एव शत्रुः, सर्वेषां रोगाणां मूलम् एव। गीतायाम् अपि कथितम्– इच्छानाम् उपभोगेन आसक्तिः उत्पद्यते, आसक्तेः कामः, कामात् क्रोधः, क्रोधात् सम्मोहः, सम्मोहात् च स्मृतिविभ्रमः, ततश्च मनुष्यस्य पूर्णविनाशः भवति।

> किं सम्पाद्यं मनुजैर्विद्या
> वित्तं बलं यशः पुण्यम्।
> कः सर्वगुणविनाशी लोभः
> शत्रुश्च कः कामः।।7।।

इदानीम् **अष्टमं श्लोकं** बोधामः

**पदच्छेदः**– कः वर्धते? विनीतः, कः वा हीयेत यः दृप्तः। कः न प्रत्येतव्यः ब्रूते यः च अनृतम् शश्वत्।

**अन्वयः**– कः वर्धते? विनीतः, क वा हीयेत यः दृप्तः। कः च न प्रत्येतव्यः? यः च शश्वत् अनृतं ब्रूते।

> को वर्धते? विनीतः,
> को वा हीयेत यो दृप्तः।
> को न प्रत्येतव्यो
> ब्रूते यश्चानृतं शश्वत्।।8।।

अस्मिन् पद्यांशे अपि त्रयः प्रश्नाः।

| | |
|---|---|
| प्रथमः प्रश्नः– कः वर्धते? | विनीतः/ विनम्रः |
| द्वितीय प्रश्नः– कः वा हीयेत | यः दृप्तः/ अभिमानी |
| तृतीयः प्रश्नः– कः न प्रत्येतव्यः? | यः च शश्वत् अनृतं ब्रूते, यः सदा असत्यं वदति। |

**भावार्थः**– अस्मिन् पद्ये नम्रतायाः वैशिष्ट्यं वर्णितम्। संसारे कः सदा उन्नतिं करोति, यः विनयशीलः विनम्रः भवति। कस्य च सदा क्षयः भवति? निश्चयेन यः अभिमानी भवति सः



टिप्पणी

किं दानमनाकाक्षं किं मित्रं
यो निवारयति पापम्।
कोऽलङ्कारः शीलं
किं वाचां मण्डनं सत्यम्।।9।।



सदा नीचैः एव गच्छति, तस्य पतनं भवति। कस्य विश्वासः न कर्तव्यः इति प्रश्नस्य उत्तरे कथितम् यः सदा अनृतं मिथ्याप्रलापं करोति तस्मिन् विश्वासः न करणीयः।

**श्लोकः – 8**

इदानीं **नवमं श्लोकं** बोधामः।

**पदच्छेदः** किम् दानम् अनाकांक्षम्, किम् मित्रम् यः निवारयति पापम्। कः अलंकारः शीलम्, किम् वाचाम् मण्डनम्, सत्यम्।

**अन्वयः** किम् दानम्? अनाकांक्षम्। किं मित्रम्? यः पापं निवारयति। कः अलंकारः? शीलम्। वाचाम् मण्डनम् किम्? सत्यम्।

**व्याख्या–**

अत्र चत्वारः प्रश्नाः दत्ताः।

दानं किम्? अनाकांक्षम्, न आकांक्षा यस्मिन् तत्। आकांक्षारहितम्, प्रतिदानस्य इच्छारहितम्।


मित्रं किम्? यः पापं निवारयति, यः पापात् रक्षति, यः हितं करोति। कः अलंकारः? शीलम्, सदाचरणम्, सद्व्यवहारः एव मनुष्यस्य परमं भूषणम्। वाचां मण्डनं किम्? सत्यम्, सत्येन एव वाणी भूषिता भवति, असत्येन वाणी अपवित्रा जायते।

**भावार्थः**– वास्तविकं दानं तदेव यत्र प्रतिदानम् अर्थात् कस्यचित् वस्तुनः आकांक्षा न क्रियते। दीयते इति कृत्वा यत् दानं दीयते तदेव दानं सात्त्विकम्। तदेव मित्रम् यद् अस्मान् पापेभ्यः रक्षति, हिताय योजयते। मनुष्यस्य भूषणं तस्य सद्व्यवहारः एव। अस्माकं वाणी सत्यभाषणेन पवित्रा जायते। अस्माकं राष्ट्रस्य लक्ष्यमपि तदेव अस्ति– 'सत्यमेव जयते'।

संसार में मनुष्य को विद्या, धन, शक्ति और यश प्राप्त करने के लिए प्रयत्न करना चाहिए। लालच सब गुणों को नष्ट करने वाला है, वासना सब रोगों की जड़ है। विनम्र व्यक्ति ही संसार में उन्नति करता है। अहंकारी का सिर अन्त में नीचा ही होता है। झूठ बोलने वाला अपना विश्वास खो बैठता है। दान देने पर प्रतिदान की इच्छा नहीं करनी चाहिए। वही सच्चा मित्र है जो पाप करने से रोके। मनुष्य का सच्चा आभूषण उसका सद्व्यवहार है। सत्य से परिपूर्ण वाणी से ही मनुष्य सुशोभित होता है।

## व्याकरणबिन्दवः

| **विसर्गसन्धिः** | | **विसर्गस्थाने** |
|---|---|---|
| मनुजैः+विद्या | = मनुजैर्विद्या | (ः → र्) |
| कः+वर्धते | = को वर्धते | (ः → उ) |
| कः + वा | = को वा | (ः → उ) |





| | | |
|---|---|---|
| कः + न | = को न | (: → उ) |
| प्रत्येतव्यः + ब्रूते | = प्रत्येतव्यो ब्रूते | (: → उ) |
| यः + निवारयति | = यो निवारयति | (: → उ) |
| कः + अलंकारः | = कोऽलंकारः | (: → उ) |

**समस्तपदानां विग्रहः**

| | | |
|---|---|---|
| सर्वः गुणः | = सर्वगुणः | कर्मधारयः |
| सर्वगुणानां विनाशी | = सर्वगुणविनाशी | षष्ठी तत्पुरुषः |
| अनाकांक्षम् | = न आकांक्षा यस्मिन् तत् (दानम्) | नञ्पूर्वपदबहुव्रीहिः |

**रूपपरिचयः**

| | |
|---|---|
| सम्पाद्यम् | = सम् + पद् + णिच्+ यत् नपुं. प्रथमा एक व. |
| प्रत्येतव्यः | = प्रति + इ + तव्यत्+ पु. प्रथमा एक व. |
| हीयेत | = हा + विधिलिङ् प्रथम पु. (नश्येत्) |
| वाचाम् | = वाच् + षष्ठी बहुवचनम् (वाणीनाम्) |

## पाठगतप्रश्नाः 4.3

1. प्रश्नान् उत्तरैः सह मेलयत

| **प्रश्नाः** | **उत्तराणि** |
|---|---|
| (क) सर्वगुणविनाशी कः? | (i) अनाकांक्षम् |
| (ख) कः न प्रत्येतव्यः? | (ii) सत्यम् |
| (ग) किं दानम् ? | (iii) लोभः |
| (घ) कः अलंकारः? | (iv) दृप्तः |
| (ङ) वाचां मण्डनं किम्? | (v) शीलम् |
| (च) कः हीयेत ? | (vi) यः शश्वत् अनृतं ब्रूते |

2. विलोमपदानि योजयत

| **पदम्** | **विलोमपदम्** |
|---|---|
| (क) विनीतः | (i) पुण्यम् |
| (ख) शत्रुः | (ii) अनृतम् |
| (ग) वर्धते | (iii) मित्रम् |

(घ) ऋतम् (iv) हीयते

(ङ) पापम् (v) दृप्तः

3. अधोलिखितेषु अकारान्तनपुंसकलिंङ्गपदानि चित्वा लिखत

वित्तम्, लोभः, पुण्यम्, मित्रम्, शीलम्, यशः, मण्डनम्, वाचाम्, बलम्।

यथा– वित्तम् ..........................................................................................................

## 4.4 किम् अधिगतम्

- प्रश्नमाध्यमेन ज्ञानं वर्धते;
- सदाचरणेन, नम्रतया, दानेन, उद्यमेन, सत्येन जनः पूज्यः भवति।
- तत्पुरुषसमासे उत्तरपदप्रधानम् भवति, बहुव्रीहिसमासे च अन्यपदार्थं प्रधानं भवति।
- विशेषण–विशेष्यपदयोः उपमान–उपमेयपदयोः वा कर्मधारयसमासः भवति।
- म् व्यंजनस्य स्थाने परे व्यंजने सति अनुस्वारः ( ं ) भवति, स्वरात् पूर्वं 'म्' व्यंजनं तस्मिन् स्वरे एव मिश्रितं भवति।
- जश्त्व संधौ वर्गीयप्रथमवर्णस्य स्थाने तृतीयः वर्णः भवति।
- श्चुत्वसंधौ सकार–तवर्गयोः शकार–चवर्गौ भवतः।
- त्व–तल् भाववाचक प्रत्ययौ।
- विसर्ग स्थाने र्, उ, स् भवति।
- स्पृह् धातुयोगे चतुर्थी विभक्तिः भवति।

## 4.5 योग्यताविस्तारः

**(क) लेखकपरिचयः**

**आदिशंकाराचार्यः**

विश्वविख्यातस्य आदिशंकराचार्यस्य जन्म 788 तमे वर्षे केरलप्रदेशस्य 'कालडी' इति नाम्नि ग्रामे अभवत्। शंकराचार्यस्य पितुः नाम शिवगुरुः मातुश्च नाम सती आसीत्। अष्टवर्षीयः एव सः संन्यासं स्वीकृत्य गुरुगोविन्दपादस्य आज्ञया धर्मविजयम् आरभत। मण्डममिश्रादीन् विदुषः शास्त्रार्थे पराजित्य वेदान्तस्य प्रचारम् कुर्वन् उत्तरे ज्योतिर्मठम्, दक्षिणे श्रृंगेरीमठं, पूर्वे गोवर्धनपीठम्, पश्चिमे च शारदापीठम् स्थापितम्। तेन अनेके ग्रन्थाः रचिताः येषु ब्रह्मसूत्रभाष्यम्, गीताभाष्यम्, विवेकचूडामणिः प्रश्नोत्तरमालिका इत्यादयः प्रमुखाः सन्ति। द्वात्रिंशत्वर्षीयः एव हिमालयपर्वतस्य केदारनाथस्थले महासमाधौ लीनः अभवत्।

प्रश्नोत्तरमालिकायां 167 पद्यानि सन्ति येषु प्रश्नोत्तराणि दत्तानि।

**(ख) भावविस्तारः**

**कामः**

सर्वस्य विद्यते प्रान्तो न वांछायाः कदाचन (स्कन्दपुराणे)

आत्मा संयमितो येन तं यमः किं करिष्यति (आश्वालयनस्मृतिः)

कामात् क्रोधोऽभिजायते। (गीता)

**परोपकारः**

उत्तमानां स्वभावोऽपि परदुःखसहिष्णुता (स्कन्द पुराणे 9.1)

आपन्नार्तिप्रशमनफलाः सम्पदो ह्युत्तमानाम् (मेघ.53)

**अपयशः**

अपमानं हि लोकेऽस्मिन् मरणादपि गर्हितम्।

**अविवेकः**

अविवेकः परमापदां पदम्। (किरात 2.30)

**उद्यमः**

आत्मैव ह्यात्मनो बन्धुरात्मैवरिपुरात्मनः। (गीता 6.5)

वृत्तेन हि भवत्यार्यो न धनेन न विद्यया। (उद्योग 88.52)

**इन्द्रियनिग्रहः**

वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता। (गीता 2.51)

**क्रोधः**

क्रोधाभिभूतः कुरुते हिंसां प्राणविघातिनीम्। क्षमा जयति न क्रोधः। (गरुड पु0 2.34.3)

देहोत्पन्नस्तथा क्रोधो देहं दहति दारुणः। (देवीभागवत पु. 4.7.12.)

**उत्साहः**

सोत्साहस्य हि लोकेषु न किंचिद्पि दुर्लभम्। (वा.रा. 4.1.122)

उत्साहवतां शत्रवोऽपि वशीभवन्ति। (चा. नी. 3.16)

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः। (पंच. 2.137)





**दानम्**

गतिरेकैव वित्तस्य दानम् अन्याः विपत्तयः। (गरुड पु. 2.26.63)

**शीलम्**

क्षीणोऽपि न त्यजति शीलगुणान् कुलीनः। (चा. मी. 377)

मित्रम्– आपत्सु मित्रं जानीयात्। (गरुड पु. 10.9.8)

धैर्यम्– धीराः कष्टमनुप्राप्य न भवन्ति विषादिनः। (बृहस्पतिनी 4.24)

निसर्गः स हि धीराणां यदापद्यधिकं दृढाः। (कथासरित् 3.6.31)

सत्यम् – सत्यस्य वचनं श्रेयः (शक्ति 329.13)

मनः सत्येन शुध्यति। (मनु. 5.109)

सत्यं कण्ठस्य भूषणम् (सुभा. 9.59)

**लोभः**

लोभः पापस्य कारणम्। (हितो. 1. 17)

क्लिश्यन्ते लोभमोहिताः। (हि. 1.26)

अकीर्तिं लोभं हित्वा सुखी भवेत्। (वनपर्व. 31 3. 78)

संभावितस्य चाकीर्तिर्मरणादतिरिच्यते। (वनप. 300 32)

**आलस्यम्**

कर्मैव हि कर्तव्यं नास्ति सिद्धिरकर्मणः (महा अ. प. 10 26)

**उद्यमः**

दुर्लभान्यपि कार्याणि सिध्यन्ति प्रोद्यमेन वै। (बुद्धचरितम् 26, 63)

उद्यमो मित्रवद् ग्राह्यः। उत्तिष्ठत, मा स्वपत। प्रमादं शत्रुवत् त्यजेत्।

**दर्पः**

अतिदर्पाद्धता लंका, अभिमाने च कौरवाः। (चाणक्यशतक..30)

(दानं सत्यं दया चेति साारमेतज्जगत्त्रये। (गरुड पु. 2.28.37)

अहंकारजयं कृत्वा सर्वदा सुखभाग् भवेत्। (देवीभाग.पु. 6.13.50)

विवेकं हन्त्यंहकारः। (नारदपु. 1.7.30)

### (ग) भाषा विस्तारः

> **सर्वनामपदानां रूपाणि पश्यत वैशिष्ट्यम्**
>
> - एतेषां रूपाणि त्रिषु लिंगेषु चलन्ति।
> - एतेषां सम्बोधनपदं न भवति।
> - एतानि विशेषणवत् अपि प्रयुज्यन्ते।

## 4.6 पाठान्तप्रश्नाः

1. अधोलिखितानां प्रश्नानाम् अतिलघूनि उत्तराणि प्रदेयानि–

   (क) गुरुतायाः मूलं किम्?

   (ख) 'ज्ञानमगर्वम्' अत्र ज्ञानं कीदृशं प्रोक्तम्?

   (ग) किं शोच्यं भवति?

   (घ) कमला का कथ्यते?

   (ङ) सर्वगुणविनाशी कः?

   (च) वाचां मण्डनं किम्?

2. अधोलिखितानां प्रश्नानाम् अतिलघूनि उत्तराणि प्रदेयानि–

   (क) कर्णा जलिभिः किं पातुं युज्यते?

   (ख) आमरणात् किं शल्यं भवति?

   (ग) विद्वद्भिः कः पूज्यः भवति?

   (घ) इदं जगत् कस्य वशे भवेत्?

   (ङ) कमला कस्मै स्पृहयति?

   (च) मनुजैः किं किं सम्पाद्यम्?

   (छ) कः न प्रत्येतव्यः?

3. चतुर्भद्रं दुर्लभं किम्? चतुर्षु वाक्येषु लिखत।

4. अधोलिखितानि उत्तराणि अधिकृत्य पाठानुसारं प्रश्नान् चित्वा लिखत–

| **उत्तराणि** | **प्रश्नाः** |
|---|---|
| यथा (क) मूर्खत्वम् | (i) किं मरणम्? |
| (ख) कार्पण्यम् | (ii) ————————————— |

(ग) अनलसचित्ताय नीतिवृत्ताय (iii) ————————

(घ) विनीतः (iv) ————————

(ङ) लोभः (v) ————————

(च) कामः (vi) ————————

(छ) औदार्यम् (vii) ————————

5. अधोलिखितेषु प्रश्नेषु 'किम्' शब्दस्य उचितरूपप्रयोगं कुरुत

यथा कः साधुः?

(i) ——— जितम् एतत् जगत्?

(ii) ——— पूज्यः?

(iii) ——— वशे जगदेतत्?

(iv) ——— स्पृहयति कमला?

(v) ——— न प्रत्येतव्यः?

(vi) ——— मित्रम्?

(vii) ——— अलङ्कारः?

(viii) ——— शोच्यम्?

(ix) ——— सर्वगुणविनाशी?

6. एतेषां समस्तपदानि रचयत (एतेषु नञ्तत्पुरुष–तत्पुरुष–कर्मधारय, बहुव्रीहि समासानाम् उदाहरणानि सन्ति)

यथा सताम् उपदेशः सदुपदेशः

(i) न प्रार्थनम् ————————

(ii) प्रियं हितं वचनं यस्य तस्य ————————

(iii) धर्मे निरतस्य ————————

(iv) अलसेन सह विद्यमानः तम् ————————


(v) अनलसं चित्तं यस्य तस्मै ————————

(vi) प्रियम् वाक्यम् ————————

(vii) सर्वेषां गुणानां विनाशी ————————

(viii) न आकांक्षा यस्मिन् तत् ————————

(ix) त्यागेन समेतम् ————————





7. एतेषु मान्तं पदं किम्, किम् अनुस्वारयुक्तं भविष्यति?

(क) किम् + अमृतम् (ख) किम् + मित्रम्

(ग) रामम् + पश्यति (घ) गृहम् + आगतः

(ङ) पुत्रम् + वदति (च) दिनानाम् + ईशः

8. सन्धिविच्छेदं कुरुत–

(क) यदवसरे ------ + ------

(ख) जगदेतत् ------ + ------

(ग) सदुपदेशः ------ + ------

(घ) एतच्च ------ + ------

(ङ) कोऽलंकारः ------ + ------

(च) दिनेशः ------ + ------

9. सन्धिं कृत्वा लिखत–

(क) शत्रुः + च = ------------

(ख) पूज्यः + विद्वान् = ------------

(ग) कः + वर्धते = ------------

(घ) मनुजैः + विद्या = ------------

10. प्रकृति–प्रत्यययोगेन निष्पन्नं रूपम् लिखत–

(क) गुरु + तल् = ------------

(ख) महत् + त्व = ------------

(ग) कृ + क्त = ------------

(घ) सि + क्त = ------------

(ङ) दा + क्त = ------------

11. विलोमपदानि मेलयत–

(क) पापम् (i) औदार्यम्

(ख) शोच्यम् (ii) दृप्तः

(ग) कार्पण्यम् (iii) अनृतम्

(घ) ऋतम् (iv) प्रशस्यम्

(ङ) विनीतः (v) पुण्यम्

## 4.7 उत्तराणि

**बोध प्रश्नाः**

1. (क) कार्पण्यम् (ख) गुणविभवेऽपि नम्रः
(ग) विद्या वित्तं बलम् यशः पुण्यम् (घ) विनीतः (ङ) लोभः

2. (क) v (ख) viii (ग) i (घ) iii
(ङ) iv (च) ii (छ) vii (ज) vi

3. (क) v (ख) i (ग) ii
(घ) vi (ङ) iv (च) iii

**पाठगत प्रश्नाः**

**4.1** 1. (क) ii (ख) iii (ग) i

2. (क) यद् अवसरे दत्तम्, (ख) प्रियवाक्यसहितं (ग) उपदेशामृतम्
(घ) त्यागसमेतम् (ङ) प्रच्छन्नं यत् कृतं पापम्।

3. (क) प्रियवाक्यम् (ख) त्यागसमेतम् (ग) क्षमान्वितम्
(घ) कर्णांजलिः (ङ) अप्रार्थनम्

**4.2** 1. (क) कार्पण्यम् (ख) औदार्यम् (ग) विनीतः
(घ) गुणविभवेऽपि यः नम्रः (ङ) प्रियहितवचनस्य (च) द्विजगुरुसुरनिन्दाकरम्

2. (क) iii (ख) i (ग) iv,
(घ) vi (ङ) ii (च) v

3. (क) प्रियहितम्, (ii) प्रियहितवचनम्, (iii) प्रियहितवचनस्य
(ख) (i) धर्मनिरतः (ग) (i) अनलसम्, (ii) अनलसचित्तम्, (iii) अनलसचित्ताय
(घ) (i) द्विजगुरुसुराः, (ii) द्विजगुरुसुरनिन्दा
(ङ) (i) नीतिवृत्तम् (ii) नीतिवृत्ताय

**4.3** 1. (क) iii (ख) vi (ग) i
(घ) v (ङ) ii (च) iv

2. (क) v (ख) iii (ग) iv
   (घ) ii (ङ) i

3. पुण्यम्, बलम्, मित्रम्, शीलम्, मण्डनम्

**4.6 पाठान्तप्रश्नाः**

1. (क) अप्रार्थनम् (ख) अगर्वम् (ग) कार्पण्यम्
   (घ) लक्ष्मीः (ङ) लोभः (च) सत्यम्

2. (क) अमृतरूपः सदुपदेशः
   (ख) प्रच्छन्नं कृतं पापम्
   (ग) स्वभावतः सर्वदा विनीतः
   (घ) प्रियहितवचनस्य धर्मनिरतस्य च
   (ङ) अनलसचित्ताय नीतिवृत्ताय
   (च) विद्या वित्तं बलं यशः पुण्यं च
   (छ) शश्वत् असत्यवादी

3. (क) मधुरवाक्यैः दानं प्रथमः दुर्लभः गुणः अस्ति।
   (ख) नम्रतायुक्तं ज्ञानम् द्वितीयः गुणः वर्तते।
   (ग) क्षमासहिता वीरता तृतीयः गुणः भवति।
   (घ) त्यागसमेतं धनं चतुर्थः गुणः अस्ति।

4. (क) किम् मरणम् (ख) किं शोच्यम् (ग) कस्मै स्पृहयते कमला
   (घ) को वर्धते, (ङ) कः सर्वगुणविनाशी (च) कः शत्रुः
   (छ) विभवे सति किं प्रशस्तम्

5. (क) केन (ख) कः (ग) कस्य (घ) कस्मै (ङ) कः
   (च) किम् (छ) कः (ज) किम् (झ) कः

6. (क) अप्रार्थनम्, (ख) प्रियहितवचनस्य, (ग) धर्मनिरतस्य (घ) सालस्यम्
   (ङ) अनलसचित्ताय, (च) प्रियवाक्यम् (छ) सर्वगुणविनाशी
   (ज) अनाकांक्षम् (झ) त्यागसमेतम्

7. (ख) किं मित्रम् (ग) रामं पश्यति (ङ) पुत्रं वदति

8. (क) यत् + अवसरे (ख) जगत् + एतत्
   (ग) सत् + उपदेशः (घ) एतत् + च
   (ङ) कः + अलंकारः (च) दिन + ईशः

9. (क) शत्रुश्च (ख) पूज्यो विद्वान्
(ग) को वर्धते (घ) मनुजैर्विद्या

10. (क) गुरुता (ख) महत्त्वम् (ग) कृत(म्)
(घ) जितम् (ङ) दत्त(म्)

11. (क) v (ख) iv (ग) i
(घ) iii (ङ) ii

# 5

# अतिलोभः न कर्तव्यः


भवान् जानाति एव "लोभो मूलमनर्थानाम्"। यद्यपि लोभवशात् जनाः कार्यशीलाः भवन्ति परंतु यदा अतिलोभः भवति तदा जनाः दुष्टानि कर्माणि कुर्वन्ति, चौर्यं कुर्वन्ति, हत्यां कुर्वन्ति। अतिलोभस्य सीमा नास्ति। मृगतृष्णावत् अतिलोभः अधिकाधिकं वर्धते। अन्ते मनुष्यः पूर्णतया नष्टः भवति। अस्याम् कथायाम् अपि वयम् एतादृशस्य एव मनुष्यस्य विषये पठामः यः अतिलोभवशात् लोभचक्रं मस्तके धारयित्वा रुधिरप्लावितः भवति अन्ते च नश्यति। अतः अतिलोभः विनाशकारकः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- प्रदत्तायाः कथायाः घटनाक्रमानुसारं संक्षेपेण सारं लेखितुं समर्थः भविष्यति;
- लोभाविष्टानां जनानां चारित्रिकलक्षणानि वर्णयितुं शक्तः भविष्यति;
- लोभनिन्दाम् अधिकृत्य अन्यानि समानान्तरपद्यानि सूक्तीः च लेखितुं क्षमः भविष्यति;
- संख्यावाचकशब्दानां संख्यावाचकविशेषणानां च प्रयोगं करिष्यति;
- क्त्वा, ल्यप्, तुमुन् प्रत्ययानां प्रयोगं स्ववाक्येषु कर्तुं शक्ष्यति;
- अव्ययानां प्रयोगं स्ववाक्येषु कर्तुं समर्थः भविष्यति;
- कर्तृपदानुसारम् एव क्रियाप्रयोगं कर्तुं योग्यः भविष्यति।

## क्रियाकलापः



5.1



5.2

अधोलिखितानां प्रश्नानां समक्षं सम्बद्धचित्रसंख्यां (✓) इति चिह्नेन दर्शयत–

1. कस्मिन् चित्रे वृद्धव्याघ्रः पथिकं कंकणं दर्शयति? (प्रथमे/द्वितीये)

   ..............................................................................................................

2. कस्मिन् चित्रे व्याघ्रः पथिकस्य उपरि आक्रमणं करोति? (प्रथमे/द्वितीये)

   ..............................................................................................................

3. कस्मिन् चित्रे लोभाविष्टः पथिकः व्याघ्रम् उपसरति? (प्रथमे/द्वितीये)

   ..............................................................................................................

4. कस्मिन् चित्रे व्याघ्रस्य हस्ते स्वर्णकंकणम् अस्ति? (प्रथमे/द्वितीये)

   ..............................................................................................................

5. कस्मिन् चित्रे पथिकः दुःखी भूत्वा रोदिति? (प्रथमे/द्वितीये)

   ..............................................................................................................

## 5.1 मूलपाठः

### अतिलोभः न कर्त्तव्यः

एवं पथिकः लोभेन मृत्युं प्राप्नोति। एतादृशीम् एव इदानीम् अन्यां कथां वयम् पठामः।

कस्मिंश्चित् ग्रामे चत्वारि मित्राणि अवसन्। दारिद्र्योपहताः ते अचिन्तयन् यत् धनहीनजीवनात् तु वनवासः एव वरम्। अतः देशान्तरं गच्छामः धनोपार्जनाय इति विचार्य ते चत्वारः बन्धुजनाः उज्जयिनीनगरीं प्राप्तवन्तः। तत्र एकः भैरवानन्दः नाम योगी निवसति स्म। ते तस्य मठम् अगच्छन्। योगी तान् अपृच्छत् ''भवन्तः कुतः समायाताः? कुत्र गच्छन्ति? किं च प्रयोजनम्?'' ते उक्तवन्तः – ''वयं दारिद्र्यपीडिताः धनम् इच्छामः। अतिसाहसिकाः वयम्। कृपया अस्माकं मार्गदर्शनं कुर्वन्तु भवन्तः।

योगी भैरवानन्दः तेभ्यः चतस्रः सिद्ध–वर्तिकाः दत्त्वा अवदत्– ''एताः वर्त्तिकाः स्वीकुर्वन्तु। इतः हिमालयं प्रति गच्छन्तु। यत्र यत्र वर्त्तिका पतिष्यति तत्र तत्र नूनं धनं भविष्यति। तत् स्थानं खनित्वा यथेष्टं धनं स्वीकुरुत परन्तु सावधानाः भवत, अतिलोभः न कर्तव्यः।'' इति।

**शब्दार्थाः**

कस्मिंश्चित् गामे = किसी गांव में
उपहताः = मारे हुए, सताए गए
धनोपार्जनाय = धन कमाने के लिए
विचार्य = सोचकर
प्राप्तवन्तः = पहुंचे
प्रयोजनम् = काम, उद्देश्य
उक्तवन्तः = बोले
अतिसाहसिकाः = बहुत साहसी
अस्माकम् = हमारा
चतस्रः = चार (स्त्री0)
सिद्धवर्तिकाः = मन्त्र से सिद्ध बत्तियाँ
पतिष्यति = गिरेगी
यथेष्टम् = इच्छानुसार
चत्वारः = चार (पुं0)
गृहीत्वां = लेकर
निस्सरति = निकलता है
गृह्यताम् = ले लिया जाए
उत्तिष्ठ = उठो
ताम्रम् = तांबा
प्रस्थितवन्तः = चल पड़े



5.3

ते चत्वारः सखायः वर्त्तिकाः गृहीत्वा हिमालयं प्रति अगच्छन्। तदा एकस्य जनस्य हस्तात् वर्त्तिका अपतत्। तदनु यावत् स भूमिं खनति तावत् ताम्रं निस्सरति। अहो! गृह्यतां स्वेच्छया ताम्रम् स उच्चैः अवदत्। अन्ये अवदन्– भो मूढ! किम् अनेन ताम्रेण? उत्तिष्ठ, अग्रे गच्छामः। सोऽवदत् मम वर्त्तिका तु पतिता, अहं ताम्रमेव गृहीत्वा गृहं गच्छामि।"

इदानीं त्रयः सुहृदः अग्रे प्रस्थितवन्तः।

अथ किंचिद् दूरं गतेषु तेषु एकस्य अन्यस्य वर्त्तिका अपतत्। सः अपि खनितुम् आरभत, रूप्यमयीं भूमिम् अलभत। अहो! यथेच्छं रूप्यं स्वीकुरुत। नाग्रे गन्तव्यम्। "तौ उक्तवन्तौ – भोः! पूर्वं ताम्रम् पुनः रूप्यं, नूनं अग्रे स्वर्णं भविष्यति। अतः आवाम् तु अग्रे गच्छावः। द्वौ अग्रे गतवन्तौ। द्वितीयः बन्धुः तु यथाशक्ति रूप्यम् आदाय ग्रामं प्रतिनिवृत्तः।


अथ पुनः अग्रे एकस्य हस्तात् वर्तिका अपतत्। सोऽपि प्रहर्षितः यावत् खनति तावत् सुवर्णमयीं भूमिं दृष्ट्वा विस्मयोत्फुल्ललोचनः उवाच – भोः गृह्यतां स्वेच्छया सुवर्णम्। किमतिलोभेन। अस्माकं कृते एतत् धनं पर्याप्तम्।"

खनितुम् = खोदना
रूप्यमयीं = चांदी की
अलभत = पाया
उक्तवन्तौ = बोले
यथाशक्ति = शक्ति के अनुसार
स्वेच्छया = अपनी इच्छा से
उक्त्वा = कहकर
पिपासाकुलः = प्यास से व्याकुल
रुधिरप्लावितं = खून से सने हुए (मनुष्य को)
उपसृत्य = पास जाकर
अवतीर्य = उतर कर
आगत्य = आकर
भ्रमितुं = घूमना
आरभत = शुरू कर दिया



5.4

चतुर्थः अवदत् –'भो मूढ! त्वमेव ग्रामं गच्छ। अहं तु एकाकी एव अग्रे गमिष्यामि। नूनम् इतः परं रत्नानि भविष्यन्ति। "एवमुक्त्वा सः भीषणग्रीष्मर्तौ पिपासाकुलः यत्र तत्र अभ्रमत्।





अथ भ्रमन् असौ एकं रुधिरप्लावितं जनम् अपश्यत्। तस्य मस्तके चक्रं भ्रमति स्म। चक्रस्य भ्रमणात् रुधिरं वहति स्म। वर्तिकायुक्तः जनः तम् उपसृत्य अपृच्छत् ''अहो! तव मस्तके चक्रं कथं भ्रमति? किम् अत्र कुत्रापि जलम् अस्ति? अहम् अतीव पिपासाकुलः इति।'' अहो आश्चर्यम्! तस्मिन् एव क्षणे तत् चक्रं चक्रधरस्य मस्तकात् अवतीर्य वर्त्तिकायुक्तस्य जनस्य मस्तके आगत्य भ्रमितुम् आरभत। रुधिरधारा अवहत्। भयग्रस्तः भयंकरवेदनया पीडितः सन् सः अपृच्छत् –"अये! किमेतत्?" भूतपूर्वः चक्रधरः सुखम् अनुभवन् अवदत् – "एष एव परिणामः अतिलोभस्य। एतत् चक्रं तावत् भ्रमिष्यति यावत् अन्यः अतिलोभाविष्टः त्वां न मिलति।"

अतः उच्यते– **अतिलोभाभिभूतस्य चक्रं भ्रमति मस्तके।**

## 5.2 बोधप्रश्नाः

1. कथां पठित्वा रिक्तस्थानानि पूरयत

(क) कस्मिंश्चित् ग्रामे ........................................ मित्राणि अवसन्।

(ख) ते ........................................ बन्धुजनाः उज्जयिनीनगरीं प्राप्तवन्तः।

(ग) योगी भैरवानन्दः तेभ्यः ........................................ वर्त्तिकाः अयच्छत्।

(घ) एकं विहाय ........................................सुहृदः अग्रे प्रस्थितवन्तः।

(ङ) तदा ........................................ अग्रे गतवन्तौ।

(च) अहम् तु ........................................ एव अग्रे गमिष्यामि।

2. अधः प्रदत्तेषु प्रत्येकं पदद्वयेन युक्तं पदं पाठात् चित्वा तत् समक्षं लिखत–

(क) दारिद्र्य + उपहताः = ..............................................

(ख) हिम + आलयः = ..............................................

(ग) स्व + इच्छया = ..............................................

(घ) यथा + इष्टम् = ..............................................

(ङ) वर्त्तिका + अपतत् = ..............................................

(च) न + अग्रे = ..............................................

3. अधोलिखितवाक्येषु क्रियापदानि योजयत

(क) नूनम् अग्रे स्वर्णं ..............................................

(ख) ते तस्य मठम् ....................................................

(ग) कृपया अस्माकं मार्गदर्शनं ....................................................

(घ) इतः हिमालयं प्रति ....................................................

(ङ) तदनु यावत् भूमिं .......................................... तावत् ताम्रं ..........................................

## 5.3 अधुना अवगच्छामः

### प्रथमः अंशः

**कस्मिंश्चिद् ग्रामे ...................................................... ताम्रं गृहीत्वा गृहं गच्छामि।**

सम्प्रति कथां सम्यक् अवगन्तुं प्रयत्नं कुर्मः।

मित्राणि केन उपहताः आसन्? दरिद्रतया, निर्धनतया। दरिद्रतां दूरीकर्तुं ते कुत्र गन्तुं निश्चयम् अकुर्वन्? देशान्तरम्। ते उज्जयिन्यां कस्य मठम् प्रति अगच्छन्? योगिभैरवानन्दस्य। भैरवानन्दः योगी तेभ्यः किम् अयच्छत्? चतस्रः सिद्धवर्त्तिकाः। वर्त्तिकानां किं वैशिष्ट्यम् आसीत्? यत्र यत्र वर्त्तिका पतिष्यति तत्र धनं भविष्यति। प्रथमस्य मित्रस्य वर्त्तिका यत्र अपतत् तत्र कीदृशी भूमिः आसीत्? ताम्रमयी। किं ते चत्वारः एव ताम्रं गृहीत्वा गृहं प्रति निवृत्ताः? नहि, केवलम् एकः एव ताम्रम् गृहीत्वा गृहं प्रत्यागतः।

अनेन स्पष्टं भवति यत्– निर्धनतया पीडिताः चत्वारि मित्राणि स्वदरिद्रतां दूरीकर्तुं देशान्तरं गन्तुं प्रवृत्ताः अभवन्। ते योगिभैरवानन्दस्य मठं गत्वा तं मार्गदर्शनाय न्यवेदयन्। ते अकथयन् यत् ते स्वनिर्धनतायाः निराकरणाय कष्टानि सोढ्वा अपि यत् किमपि कर्तुं कृतनिश्चयाः आसन्। तेषां वचनैः प्रभावितः सन् योगी तेभ्यः सिद्धवर्तिकाः अयच्छत्। वर्त्तिकानां वैशिष्ट्यम् आसीत् यत् यत्र यत्र वर्त्तिका पतिष्यति तत्र तत्र धनप्राप्तिः भविष्यति। अग्रे गत्वा प्रथमस्य मित्रस्य वर्त्तिका यत्र अपतत् तत्र ताम्रमयी भूमिः आसीत्। सः ताम्रं गृहीत्वां गृहं प्रत्यागतः। अत्र अवलोकनीयः यत् यद्यपि ताम्रः बहुमूल्यं धातुः न वर्तते परम् एषः जनः यत् किमपि प्राप्तं तेन सन्तुष्टः भूत्वा प्रत्यावर्तत। तस्य मनसि ततः अधिकस्य लालसा न अभवत्। अर्थात् सः अत्यधिकं लोभाविष्टः न आसीत्।

अतिसाहसिकाः– अत्यधिकं साहसयुक्ताः (अतिसाहस + ठञ्)

संख्यावाचकविशेषणानां प्रयोगार्थं संख्यावचकशब्दानां ज्ञानम् अनिवार्यम्। अतः अत्र एकतः शतपर्यन्तं संख्यावाचकशब्दाः प्रदत्ताः–

## संख्या

| | | पूरणी संख्या |
|---|---|---|
| 1. | एक | प्रथमः मम्–मा |
| 2. | द्वि | द्वितीयः– यम्–या |
| 3. | त्रि | तृतीयः– यम्–या |
| 4. | चतुर् | चतुर्थः– र्थम्–र्थी |
| 5. | प×चन् (प×च) | प×चमः प×चमी |
| 6. | षष् (षट्) | षष्ठः षष्ठी |
| 7. | सप्तन् (सप्त) | सप्तमः सप्तमी |
| 8. | अष्टन् (अष्ट) | अष्टमः अष्टमी |
| 9. | नवन् (नव) | नवमः नवमी |
| 10. | दशन् (दश) | दशमः दशमी |
| 11. | एकादशन् (एकादश) | एकादशः एकादशी |
| 12. | द्वादशन् (द्वादश) | एवमेव |
| 13. | त्रयोदशन् (त्रयोदश) | ″ |
| 14. | चतुर्दशन् (चतुर्दश) | ″ |
| 15. | प×चदशन् (प×चदश) | ″ |
| 16. | षोडषन् (षोडश) | ″ |
| 17. | सप्तदशन् (सप्तदश) | ″ |
| 18. | अष्टादशन् (अष्टादश) | ″ |
| 19. | नवदशन (नवदश) अथवा एकानविंशतिः अथवा उनविंशतिः | |
| 20. | विंशतिः | विंश विंशी |
| 30. | त्रिंशत! | त्रिंश |
| 40. | चत्वारिंशत | |
| 50. | प×चाशत् | |
| 60. | षष्टिः | |
| 70. | सप्ततिः | |
| 80. | अशीतिः | |
| 90. | नवतिः | |
| 100. | शतम् | |

## संख्यावाचकशब्दानां रूपाणि

यदि 'एक' शब्दस्य अर्थः संख्यावाचकः 'एक' इति भवति तर्हि तस्य रूपाणि त्रिषु लिङ्गेषु केवलम् एकवचने भवन्ति।

'द्वि' शब्दस्य रूपाणि त्रिषु लिङ्गेषु भिन्नानि केवलं द्विवचने भवन्ति।

| | एक | | | द्वि | | |
|---|---|---|---|---|---|---|
| | पुल्लिङ्गम् | नपुंसकलिङ्गम् | स्त्रीलिङ्गम् | पुल्लिङ्गम् | नपुंसकलिङ्गम् | स्त्रीलिङ्गम् |
| प्र0 वि0 | एकः | एकम् | एका | द्वौ | द्वे | द्वे |
| द्वि0 वि0 | एकम् | एकम् | एकाम् | द्वौ | द्वे | द्वे |
| तृ0 वि0 | एकेन | एकेन | एकया | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| च0 वि0 | एकस्मै | एकस्मै | एकस्यै | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| पं0 वि0 | एकस्मात् | एकस्मात् | एकस्याः | द्वाभ्याम् | द्वाभ्याम् | द्वाभ्याम् |
| ष0 वि0 | एकस्य | एकस्य | एकस्याः | द्वयोः | द्वयोः | द्वयोः |
| स0 वि0 | एकस्मिन् | एकस्मिन् | एकस्याम् | द्वयोः | द्वयोः | द्वयोः |

'त्रि' 'चतुर' शब्दयोः रूपाणि त्रिषु लिङ्गेषु भिन्नानि केवलं बहुवचने भवन्ति–

| | त्रि | | | चतुर | | |
|---|---|---|---|---|---|---|
| | पुल्लिङ्गम् | नपुंसकलिङ्गम् | स्त्रीलिङ्गम् | पुल्लिङ्गम् | नपुंसकलिङ्गम् | स्त्रीलिङ्गम् |
| प्र० वि० | त्रयः | त्रीणि | तिस्त्रः | चत्वारः | चत्वारि | चतस्रः |
| द्वि० वि० | त्रीन् | त्रीणि | तिस्त्रः | चतुरः | चत्वारि | चतस्रः |
| तृ० वि० | त्रिभिः | त्रिभिः | तिसृभिः | चतुर्भिः | चतुर्भिः | चतसृभ्यः |
| च० वि० | त्रिभ्यः | त्रिभ्यः | तिसृभ्यः | चतुर्भ्यः | चतुर्भ्यः | चतसृभ्यः |
| पं० वि० | त्रिभ्यः | त्रिभ्यः | तिसृभ्यः | चतुर्भ्यः | चतुर्भ्यः | चतसृभ्यः |
| ष० वि० | त्रयाणाम् | त्रयाणाम् | तिसृणाम् | चतुर्णाम् | चतुर्णाम् | चतसृणाम् |
| स० वि० | त्रिषु | त्रिषु | तिसृषु | चतुर्षु | चतुर्षु | चतसृषु |

प×चन्, षष्, सप्तन्, आदिसंख्यावाचकशब्दानां रूपाणि त्रिषु लिङ्गेषु समानानि केवलं बहुवचने भवन्ति।

| | प×चन् | षष् | सप्तन् | अष्टन् | नवन् | दशन् |
|---|---|---|---|---|---|---|
| प्र० वि० | प×च | षट् | सप्त | अष्टौ, अष्ट | नव | दश |
| द्वि० वि० | प×च | षट् | सप्त | अष्टौ, अष्ट | नव | दश |
| तृ० वि० | प×चभिः | षड्भिः | सप्तभिः | अष्टाभिः, अष्टभिः | नवभिः | दशभिः |
| च० वि० | प×चभ्यः | षड्भ्यः | सप्तभ्यः | अष्टाभ्यः, अष्टभ्यः | नवभ्यः | दशभ्यः |
| पं० वि० | प×चभ्यः | षड्भ्यः | सप्तभ्यः | अष्टाभ्यः, अष्टभ्यः | नवभ्यः | दशभ्यः |
| ष० वि० | प×चानाम् | षण्णाम् | सप्तनाम् | अष्टानाम् | नवानाम् | दशानाम् |
| स० वि० | प×चसु | षट्सु | सप्तसु | अष्टासु, अष्टसु | नवसु | दशसु |

**संख्यावाचक विशेषणपदानां प्रयोगः**

विशेषणस्य लिङ्गं विशेष्यवत् भवति यथा

| | | |
|---|---|---|
| चत्वारि मित्राणि | चतस्रः वर्तिकाः | चत्वारः सखायः |
| चत्वारः बन्धुजनाः | एकस्य जनस्य | त्रयः सुहृदः |
| एवमेव– प्रथमम् मित्रम् | प्रथमः जनः | प्रथमा वर्तिका |
| द्वितीयं मित्रम् | द्वितीयः बन्धुः | द्वितीया सखी |

**क्त्वा/ल्यप् प्रत्ययस्य प्रयोगः**

पूवकालिक क्रियार्थे धातोः परं क्त्वा (त्वा) प्रत्ययः भवति। यथा छात्रः पाठं पठ् + क्त्वा = पठित्वा खेलति।

ग्रह् + क्त्वा = गृहीत्वा (ग्रहण करके)

दा + क्त्वा = दत्त्वा (देकर)

वि + चर् + णिच् + ल्यप् = विचार्य (विचार करके)

यदा धातोः पूर्वम् उपसर्गः भवति तदा 'क्त्वा' स्थाने 'ल्यप्' प्रत्ययः भवति।

**क्तवतु प्रत्ययस्य प्रयोगः**

उक्तवन्तः – ब्रू + वच् + क्तवतु, पुं प्रथमा बहुवचनम्

प्रस्थितवन्तः – प्र + स्था + क्तवतु, पुं प्रथमा बहुवचनम्

**समानार्थकशब्दाः**

मित्रम्, सखा, सुहृद्, बन्धुजनः

**कथासारः**

चत्वारि मित्राणि निर्धनाः आसन्। एकः योगी तेभ्यः सिद्धवर्त्तिकाः अयच्छत्। अकथयत् च वर्त्तिकायाः पतनस्थाने धनं भविष्यति। यदा प्रथमा वर्त्तिका अपतत् तत्र ताम्रमयी भूमिः आसीत्। तेषु एकः ताम्रं गृहीत्वा सन्तुष्टः भूत्वा गृहं प्रति अगच्छत्।

चार मित्र, निर्धन होने के कारण, धन कमाने के लिए चल पड़ते हैं। उज्जयिनी पहुंच कर एक योगी उन्हें सिद्ध बत्तियाँ देता है। बत्तियों के गिरने के स्थान पर धन होगा–ऐसा वह योगी बताता है। पहले मित्र की बत्ती जहाँ गिरती है वहाँ तांबा होता है और वह तांबा लेकर सन्तुष्ट होकर घर लौट जाता है। शेष तीन आगे चल पड़ते हैं।

## पाठगतप्रश्नाः 5.1

1. अधोलिखितेषु रिक्तस्थानानि समुचितविशेषणैः अथवा विशेष्यैः पूरयत–

| | विशेषणानि | विशेष्याणि |
|---|---|---|
| (क) | .................................... | ग्रामे |
| (ख) | चत्वारि | .................................... |
| (ग) | .................................... | सिद्धवर्त्तिकाः |
| (घ) | यथेष्टं | .................................... |
| (ङ) | चत्वारः | .................................... |
| (च) | .................................... | सुहृदः |

2. अधोलिखितवाक्येषु क्रियापदानि पूरयत–

   (क) अतः देशान्तरं .................................... धनोपार्जनाय।

   (ख) वयं दारिद्र्यपीडिताः धनम् .................................... ।

   (ग) यत्र तत्र वर्त्तिका ....................................तत्र तत्र नूनं धनम्..................... ।

   (घ) ते चत्वारः हिमालयं प्रति .................................... ।

   (ङ) एकस्य जनस्य हस्तात् वर्त्तिका .................................... ।

   (च) सः .................................. नहि, नहि, अहं तु ताम्रं गृहीत्वा गृहं .............................. ।



3. अधोलिखितवाक्येषु अव्ययपदानि पूरयत–

(क) भवन्तः .................................. समायाताः?

(ख) भवन्तः .................................. गच्छन्ति?

(ग) वर्त्तिकाः गृहीत्वा हिमालयं .................................. गच्छन्तु।

(घ) .................................. वर्त्तिका पतिष्यति .................................. धनं भविष्यति।

(ङ) तदनु .................................. भूमिं खनन्ति .................................. ताम्रमयीं भूमिं पश्यन्ति।

## द्वितीयः अंशः

द्वितीयांशं पुनः पठामः

**अथ किंचिद् दूरं .................................. चक्रं भ्रमति मस्तके।**

अधोलिखितानि पाठस्य अवबोधने भवतां साहाय्यं करिष्यन्ति।

द्वितीयस्य वर्त्तिका यत्र अपतत् तत्र कीदृशी भूमिः आसीत्? रूप्यमयी अर्थात् रजतमयी।

द्वितीयः बन्धुः किम् आदाय गृहं गतवान्? रजतम्। अन्यौ द्वौ कुत्र गतौ? अन्यौ द्वौ अग्रे गतौ। तौ किम् चिन्तितवन्तौ? अग्रे स्वर्णमयी भूमिः भविष्यति। किम् ताभ्याम् स्वर्णं लब्धम्? आम्, तृतीयवर्त्तिका यत्र अपतत् तत्र स्वर्णम् आसीत्। किम् तौ उभौ एव स्वर्णं गृहीत्वा गृहं गतौ? नहि केवलम् एकः एव गृहं गतवान्। एकः अग्रे गतवान्। अग्रे सः कीदृशस्य धनस्य आशाम् अकरोत्? रत्नानाम्। किम् तेन रत्नानि प्राप्तानि? नहि। सः कीदृशं जनम् अपश्यत्? रुधिरप्लावितम्, तस्य मस्तके चक्रम् भ्रमति स्म।

वर्त्तिकायुक्तः जनः तम् चक्रधरं किम् अपृच्छत्? 1. किम् अत्र जलमस्ति? 2. तव मस्तके चक्रं कथं भ्रमति?

किं वर्त्तिकायुक्तः जनः जलं लब्धवान्? नहि। किम् आश्चर्यम् वर्त्तिकायुक्तेन जनेन अनुभूतम्? चक्रम् अवतीर्य तस्य मस्तकम् आगच्छत्। भूतपूर्वः चक्रधरः कस्य अनुभवम् अकरोत्? सुखस्य चक्रं कस्य परिणामः अभवत्? अतिलोभस्य चक्रम् कदा मस्तकात् अवतरति? यदा कोऽपि अन्यः लोभाविष्टः मिलति। चक्रम् कस्य मस्तके भ्रमति? अतिलोभाभिभूतस्य।

अत्र द्वितीयांशे वर्णितमस्ति यत् द्वितीय मित्रस्य वर्तिका रजतयुक्तानां भूमौ न्यपतत्। सः अपि रजतेन सन्तुष्टः गृहं प्रति गतः। लोभाकृष्टौ अन्यौ स्वर्णलिप्सया अग्रे गतवन्तौ। तृतीयस्य वर्त्तिका स्वर्णयुतायां भूमौ अपतत्। सः स्वर्णलाभेन परमं सन्तोषमनुभवन् ततः प्रत्यावर्तत। परन्तु चतुर्थः तु रत्नप्राप्तेः आशया अग्रे अग्रे गतवान्। तत्र तेन एकः रक्तप्लावितः जनः दृष्टः। तस्य मस्तके चक्रं भ्रमति स्म। वर्त्तिकायुक्तः जनः तम् अपृच्छत्– "किम् अत्र जलम् अस्ति? तव मस्तके चक्रं कथं भ्रमति?" तदनन्तरं चक्रं तस्य मस्तकात् अवतीर्य वर्त्तिकायुक्तस्य जनस्य मस्तकम् आगच्छत्। अत्यधिकं भयाक्रान्तः

सः असह्यपीडामनुभूतवान्। सः सुखमनुभूयमानं तं पूर्वचक्रधरं चक्रागमनस्य कारणम् अपृच्छत्। सः अवदत् यत् अतिलोभस्य कारणात् एवं चक्राक्रमणं भवति। अर्थात् अतिलोभी जनः सदैव भयंकरं कष्टमनुभवति। अतः अतिलोभः न कर्तव्यः।

**कथासारः**

प्रथमः जनः ताम्रम् आदाय गच्छति। अवशिष्टेषु द्वितीयः जनः रजतम् आप्नोति, सः अपि तत् आदाय गच्छति। एवं तृतीयः स्वर्णम् आदाय प्रतिनिवर्तते। परन्तु चतुर्थः तदापि न सन्तुष्टः। सः अग्रे गच्छति। सः एकं चक्रधरं जनं पश्यति। तं च जलविषये पृच्छति। तस्मिन्नेव क्षणे चक्रम् अवतीर्य तस्य मस्तकम् आरोहति। यः अतिलोभम् करोति तस्य मस्तके चक्रम् एव भ्रमति। वस्तुतः अति लोभात् विनाशः भवति।

चारों मित्रों में से पहला मित्र तांबा लेकर चला जाता है। इसी प्रकार दूसरा और तीसरा चांदी और सोना अपने अपने भाग्य के अनुसार पाकर लौट जाते हैं। चौथा फिर भी लालच नहीं छोड़ता और आगे चला जाता है। प्यास से व्याकुल वह एक चक्रधारी को देखता है जिसके माथे पर चक्र घूम रहा है और खून बह रहा है। चौथे व्यक्ति के मिलने पर वह चक्र उतर कर उसके मस्तक पर आ जाता है। पहला चक्रधर मुक्त हो जाता है। वह कहता है कि चक्र तभी उतरेगा जब कोई और लोभी मनुष्य आकर तुमसे इसी प्रकार मिलेगा। वस्तुतः लालच का परिणाम विनाश ही होता है।

## व्याकरणबिन्दवः

लङ्लकारस्य प्रयोगः भूतकाले भवति। पश्यत–

| **परस्मैपदम्, प्र.पु,एकवचनम्** | **आत्मनेपदम् प्र. पु. एकवचनम्** |
|---|---|
| अपतत् (गिर गई) | आरभत (प्रारम्भ हो गई) |
| अवदत् (बोला) | अलभत (प्राप्त किया) |
| अभ्रमत् (घूमा, घूमता रहा) | (अत्र अन्ते अकारः अस्ति अतः हलन्तप्रयोगः नास्ति) |
| अपश्यत् (देखा) | |
| अपृच्छत् (पूछा) | |

**भावे सप्तमी प्रयोगः**

दूरं <u>गतेषु</u> <u>तेषु</u> उनके दूर जाने पर

**क्त्वा/ल्यप् प्रयोगः** धातोः पूर्वं यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति।

| | | |
|---|---|---|
| उक्त्वा | ब्रू – वच् क्त्वा | (कहकर) |
| दृष्ट्वा | दृश् क्त्वा | (देखकर) |
| उपसृत्य | उप सृ ल्यप् | (पास जाकर) |



टिप्पणी

| | | |
|---|---|---|
| अवतीर्य | अव तृ ल्यप् | (उतर कर) |
| आदाय | आ दा ल्यप् | (लेकर) |

**तुमुन् प्रयोगः**— निमित्तार्थक क्रियायोगे धातोः परं तुमुन् (तुम्) प्रत्ययः भवति। यथा बालः पठितुम् (पठ् + तुमुन्) विद्यालयं गच्छति।

| | | | |
|---|---|---|---|
| खनितुम् | खन् | तुमुन् | खोदने के लिए |
| भ्रमितुम् | भ्रम् | तुमुन् | घूमने के लिए |

**शतृप्रत्ययस्य प्रयोगः**

| | | |
|---|---|---|
| भ्रमन् | भ्रम् शतृ पुं0 प्रथमा एकवचनम् | घूमते हुए |
| सन् | अस् शतृ पुं0 प्रथमा एकवचनम् | होते हुए |
| अनुभवन् | अनु भू शतृ पुं0 प्रथमा एकवचनम् | अनुभव करते हुए |

**क्तवतु प्रत्ययस्य द्विवचनान्तप्रयोगौ**

उक्तवन्तौ (पु.) ब्रू – वच् क्तवतु, प्रथम पुरुषः, द्विवचनम् (वे दो) बोले।

गतवन्तौ (पु.) गम्, क्तवतु, प्रथम पुरुषः, द्विवचनम् (वे दो) गये।

**अव्ययपदानि**

अग्रे (आगे), नूनम् (निश्चयपूर्वक), अथ (इसके बाद), पुनः (फिर), अपि (भी), यावत्–तावत् (जब तक–तब तक, ज्योंही–त्योंही), कृते –(लिए), एव (ही), तु (तो), इतः परम् (इससे आगे), एवम् (इस प्रकार), यत्र तत्र (जहाँ तहाँ), कथम् (क्यों/ किसलिए)।

**कर्ता–क्रिया अन्विति:**

कर्तृपदानुसारम् एव क्रियाप्रयोगः भवति। यदि कर्त्ता प्रथमपुरुषः अस्ति तर्हि क्रिया अपि प्रथमपुरुषस्य एव भवति। यदा कर्ता मध्यमपुरुषः भवति तदा क्रिया मध्यमपुरुषस्य भवति। यदि कर्ता उत्तमपुरुषः अस्ति तदा क्रिया अपि उत्तमपुरुषस्य भवति।

**प्रथमपुरुषस्य कर्तृक्रिययोः प्रयोगः**

**एकवचने**

| | | | |
|---|---|---|---|
| पुं | बालकः/सः/एषः/कः/भवान् | 1. गच्छति | लट्लकारः |
| स्त्री0 | बालिका/सा/एषा/का/भवती | 2. अगच्छत् | लङ्लकारः |
| नपुं | मित्रम्/तत्/एतत्/किम् | 3. गच्छतु | लोट्लकारः |
| | | 4. गच्छेत् | विधिलिङ्लकारः |
| | | 5. गमिष्यति | लृट्लकारः |

**द्विवचने**

| | | |
|---|---|---|
| पुं | बालकौ/तौ/एतौ/कौ/भवन्तौ | 1. गच्छतः |
| स्त्री0 | बालिके/ते/एते/के/भवत्यौ | 2. अगच्छताम् |
| नपुं | मित्रे/ते/एते/के | 3. गच्छताम् |
| | | 4. गच्छेताम् |
| | | 5. गमिष्यतः |

| | बहुवचने |
|---|---|
| पुं | बालकाः/ते/एते/के/भवन्तः |
| स्त्री0 | बालिकाः/ताः/एताः/काः/भवत्यः |
| नपुं | मित्राणि/तानि/एतानि/कानि |

1. गच्छन्ति
2. अगच्छन्
3. गच्छन्तु
4. गच्छेयुः
5. गमिष्यन्ति

मध्यमपुरुषस्य कर्तृक्रिययोः प्रयोगः। उत्तमपुरुषस्य कर्तृक्रिययोः प्रयोगः।

| | त्वम् | युवाम् | यूयम् | अहम् | आवाम् | वयम् |
|---|---|---|---|---|---|---|
| लट् 1. | गच्छसि | गच्छथः | गच्छथ | गच्छामि | गच्छावः | गच्छामः |
| लङ् 2. | अगच्छः | अगच्छतम् | अगच्छत | अगच्छम् | अगच्छाव | अगच्छाम |
| लोट् 3. | गच्छ | गच्छतम् | गच्छत | गच्छानि | गच्छाव | गच्छाम |
| विधि 4. | गच्छेः | गच्छेतम् | गच्छेत | गच्छेयम् | गच्छेव | गच्छेम |
| लृट् 5. | गमिष्यसि | गमिष्यथः | गमिष्यथ | गमिष्यामि | गमिष्यावः | गमिष्यामः |

## पाठगतप्रश्नाः 5.2

1. एकपदेन उत्तरत–
   (क) द्वितीयः जनः किम् आदाय गृहं गतवान्?
   (ख) तृतीयः जनः किम् आदाय गृहं गतवान्?
   (ग) चतुर्थः जनः कीदृशं पुरुषम् अपश्यत्?
   (घ) अतिलोभाविष्टस्य मस्तके किं भ्रमति?
   (ङ) चक्रधरस्य मस्तकात् किम् अवहत्?
   (च) अतिलोभस्य कः परिणामः?
2. उचितपदेन रिक्तस्थानानि पूरयत–
   (क) यथेच्छं रूप्यं स्वीकृत्य ........................................ न गन्तव्यम्। (अग्रे/ग्रामे)
   (ख) भोः गृहयतां स्वेच्छया ............................ इति तृतीयः अवदत्। (रजतम्/स्वर्णम्)
   (ग) नूनम् इतः परं रत्नानि भविष्यन्ति इति ................................वदति। (तृतीयः/चतुर्थः)
   (घ) चक्रधरस्य मस्तकात् चक्रम् ........................................ वर्तिकायुक्तस्य मस्तकम् अगच्छत्। (आरुह्य/ अवतीर्य)
   (ङ) अतिलोभाभिभूतस्य ........................................ भ्रमति मस्तके। (रुधिरम्/चक्रम्)
3. अधोलिखितानां विग्रहाणां समक्षं समस्तपदानि लिखत–
   (क) लोभेन आविष्टः = ......................................................
   (ख) चक्रं धारयति इति = ......................................................







(ग) पिपासया आकुलितः = ..........................................................


(घ) भयेन ग्रस्तः = ..........................................................

(ङ) मस्तकस्य उपरि = ..........................................................

(च) रुधिरेण आप्लावितम् = ..........................................................


4. विशेषणानि विशेष्यैः सह योजयत

| **विशेषणानि** | **विशेष्याणि** |
|---|---|
| (क) रूप्यमयीम् | (i) जनम् |
| (ख) द्वितीयः | (ii) क्षणे |
| (ग) रुधिरप्लावितम् | (iii) भूमिम् |
| (घ) वर्त्तिकायुक्तः | (iv) चक्रधरः |
| (ङ) तस्मिन् | (v) बन्धुः |
| (च) भूतपूर्वः | (vi) जनः |



## 5.4 किम् अधिगतम्

- अस्माभिः कदापि लोभः न कर्तव्यः।
- अतिलोभः अनर्थकारकः भवति। अतिलोभस्य परिणामः विनाशः एव।
- सन्तोषः एव पुरुषस्य परमं निधानम्।
- धातोः पूर्वम् यदि उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् भवति।
- तत्पुरुषसमासे द्वितीयं पदं प्रधानं भवति।
- विशेषणानां प्रयोगः विशेष्यवत् भवति।
- संख्यापदानि अपि विशेषणानि भवन्ति।
- भूतकाले कर्तृवाच्ये लङ्लकारस्य स्थाने क्तवतु प्रत्ययस्य प्रयोगः भवति।



## 5.5 योग्यताविस्तारः

### (क) लेखकपरिचयः

एषा कथा पंचतन्त्रात् संकलिता। पंचतन्त्रस्य रचयिता पं० विष्णुशर्मा अस्ति। सः विष्णुशर्मा राज्ञः पुत्राणां बोधाय एताः कथाः अश्रावयत्। एताः कथाः श्रुत्वा राजपुत्राः राजनीतिकुशलाः व्यवहारचतुराः च अभवन्। अस्मिन् ग्रंथे प×च भागाः सन्ति– 1. मित्रभेदः, 2. मित्रसम्प्राप्तिः, 3. काकोलूकीयम्, 4. लब्धप्रणाशः, 5. अपरीक्षितकारकं च। अस्य ग्रन्थस्य अरबी–फारसीभाषयोः अनुवादः कृतः अस्ति। आंग्लभाषायाम् 'एरेबियन् नाइट्स' इति अस्य एव अनुवादः।

**(ख) भावविस्तारः**

**समानार्थकसूक्तयः**

(i) लोभः प्रतिष्ठा पापस्य प्रसूतिर्लोभ एव च।
द्वेषक्रोधादिजनको लोभः पापस्य कारणम्। (भोजप्रबधः)

(ii) लोभश्चेदगुणेन किम्? (भर्तृहरिः)

(iii) लोभेन बुद्धिश्चलति, लोभो जनयते तृषाम्।
तृषार्तो दुःखमाप्नोति, परत्रेह च मानवः।। (हितोपदेशः/मित्रलाभः/140)

(iv) धने लोभे जन्तोः स्थितिमुपगते कस्य सुगतिः। (दशावतारचरितम् 6.20)

(v) कासां हि नापदां हेतुरतिलोभान्धबुद्धिता। (कथासरित्सागरम् 5.1.20)

(vi) प्रभूतलोभलुब्धानां मूलस्यापि परिक्षयः। (समयमातृका, 78)

(vii) लोभविष्टो नरो वित्तं वीक्षते न स चापदम्।
दुग्धं पश्यति मार्जारो, न तथा लगुडाहतिम्।। (सुभाषितरत्नभाण्डागारम्)

**(ग) भाषाविस्तारः**

संस्कृतभाषायां त्रीणि लिङ्गानि भवन्ति। दश लकाराः त्रयः पुरुषाः, त्रीणि वचनानि च। दशलकारेषु वयम् केवल प×चलकाराणाम् एव अत्र अभ्यासं कुर्मः।

**(i) लट् लकारे**

| | | | | |
|---|---|---|---|---|
| गच्छामः | गम् | उत्तमपुरुषः | बहुवचनम् | (हम सब जाते हैं) |
| इच्छामः | इष् | उत्तमपुरुषः | बहुवचनम् | (हम सब चाहते हैं) |
| निस्सरति | निस्+सृ | प्रथमपुरुषः | एकवचनम् | (निकलता है) |
| गच्छामि | गम् | उत्तमपुरुषः | एकवचनम् | (मैं जाता हूँ) |
| खनति | खन् | प्रथमपुरुषः | एकवचनम् | (खोदता है) |
| भ्रमति | भ्रम् | प्रथमपुरुषः | एकवचनम् | (घूमता है) |

**(ii) लोट् लकारे**

| | | | | |
|---|---|---|---|---|
| कुर्वन्तु | कृ | प्रथमपुरुषः | बहुवचनम् | (करें) |
| स्वीकुर्वन्तु | स्वी + कृ | प्रथमपुरुषः | बहुवचनम् | (स्वीकार करें) |
| गच्छन्तु | गम् | प्रथमपुरुषः | बहुवचनम् | (जायें) |
| स्वीकुरुत | स्वी + कृ | मध्यमपुरुषः | बहुवचनम् | (स्वीकार करो) |

**(iii) लङ्लकारे**

| | | | | |
|---|---|---|---|---|
| अवसन् | वस् | प्रथमपुरुषः | बहुवचनम् | (रहते थे) |
| अचिन्तयन् | चिन्त् | प्रथमपुरुषः | बहुवचनम् | (सोचा) |
| अगच्छन् | गम् | प्रथमपुरुषः | बहुवचनम् | (गये) |

| | | | | |
|---|---|---|---|---|
| अपृच्छत् | प्रच्छ् (पृच्छ्) | प्रथमपुरुषः | एकवचनम् | (उसने पूछा) |
| अवदत् | वद् | प्रथमपुरुषः | एकवचनम् | (बाला) |
| अपतत् | पत् | प्रथमपुरुषः | एकवचनम् | (गिर गई) |
| अभ्रमत् | भ्रम् | प्रथमपुरुषः | एकवचनम् | (घूमा) |
| अपश्यत् | दृश् | प्रथमपुरुषः | एकवचनम् | (देखा) |
| आरभत | आ+रभ् (आ0) | प्रथमपुरुषः | एकवचनम् | (प्रारम्भ किया) |
| अलभत | लभ् (आ0) | प्रथमपुरुषः | एकवचनम् | (पाया) |

**(iv) लृट् (भविष्यत्)**

| | | | | |
|---|---|---|---|---|
| भ्रमिष्यति | भ्रम् | प्रथमपुरुषः | एकवचनम् | (घूमेगा/घूमेगी) |
| पतिष्यति | पत् | प्रथमपुरुषः | एकवचनम् | (गिरेगा/गिरेगी) |
| भविष्यति | भू | प्रथमपुरुषः | एकवचनम् | (होगा/होगी) |
| गमिष्यामि | गम् | प्रथमपुरुषः | एकवचनम् | (जाऊँगा/जाऊँगी) |

**(v) विधिलिङ् (प्रार्थना/इच्छा)**

| | | | | |
|---|---|---|---|---|
| अगच्छेत् | आ + गम् | प्रथमपुरुषः | एकवचनम् | (आये) |
| भवेत् | भू | प्रथमपुरुषः | एकवचनम् | (होवे) |
| पठेयुः | पठ् | प्रथमपुरुषः | बहुवचनम् | (पढ़ें) |

## 5.6 पाठान्तप्रश्नाः

1. अधोलिखितवाक्यानि कथाक्रमेण लिखत–
   (क) ते चत्वारः सखायः उज्जयिन्याम् योगिनः मठम् प्रति अगच्छन्।
   (ख) चतुर्थः जनः रत्नानि अग्रे भविष्यन्ति इति मत्वा अतिलोभेन अग्रे अगच्छत्।
   (ग) एकदा चत्वारि मित्राणि धनाभावेन दुःखिताः देशान्तरं प्रति प्रस्थितवन्तः।
   (घ) द्वितीयजनस्य वर्त्तिका यत्र अपतत् तत्र रजतमयी भूमिः आसीत्। सोऽपि रजतं गृहीत्वा प्रतिनिवृत्तः।
   (ङ) प्रथमः सखा वर्त्तिकापतनानुसारं ताम्रम् आदाय गृहम् अगच्छत्।
   (च) तृतीयः जनः अपि स्वर्णं प्राप्य गृहं प्रति निवृत्तः।
   (छ) योगी भैरवानन्दः तेभ्यः चतस्रः सिद्धवर्त्तिकाः अयच्छत्।
   (ज) अन्ते चतुर्थः जनः रक्तरंजितम् एकं चक्रधरं पुरुषम् अपश्यत्।
   (झ) योगी अवदत् "यत्र यत्र वर्त्तिका पतिष्यति तत्र तत्र धनं भविष्यति"।
   (ञ) चक्रं चक्रधरमस्तकात् अवतीर्य वर्त्तिकायुक्तनरस्य मस्तके आगच्छत्।
2. प्रश्नान् उत्तरत
   (क) लोभाविष्टाः जनाः भूमिं खनित्वा किम् किम् अलभन्त?

(ख) चतुर्थः जनः किम् उक्त्वा अग्रे गतवान्?

(ग) चतुर्थः जनः अग्रे गत्वा कम् अपश्यत्?

(घ) वर्त्तिकाः कीदृश्यः आसन्?

(ङ) कः वर्त्तिकाः दत्तवान्?

3. अधोलिखितेषु अव्ययपदानि रेखांकितानि कुरुत–

अग्रे, अधः, अहम्, कथम्, अतः, गच्छतः, प्रति, प्रीतिः, तत्र, कुतः, वयम्, तु, ते, एवम्।

4. संख्यापदानि विशेषणानि योजयत

(क) .............................. मित्रम्। (प्रथमः / प्रथमम्)

(ख) .............................. वर्त्तिकाः। (चत्वारः / चतस्रः)

(ग) .............................. बन्धुः। (द्वितीयः / द्वौ)

(घ) .............................. जनाः। (तृतीया / त्रयः)

(ङ) .............................. जनौ। (द्वे / द्वौ)

(च) .............................. चक्रम्। (एकः / एकम्)

## 5.7 उत्तराणि

**बोधप्रश्नाः**

1. (क) चत्वारि, (ख) चत्वारः, (ग) चतस्रः,
   (घ) त्रयः, (ङ) द्वौ, (च) एकाकी
2. (क) दारिद्र्योपहताः, (ख) हिमालयः, (ग) स्वेच्छया,
   (घ) यथेष्टम्, (ङ) वर्त्तिकापतत्, (च) नाग्रे
3. (क) भविष्यति, (ख) प्राप्तवन्तः, (ग) कुर्वन्तु,
   (घ) गच्छन्तु, (ङ) खनति, (च) निस्सरति

**पाठगतप्रश्नाः**

**5.1**

1. (क) कस्मिंश्चिद्, (ख) मित्राणि, (ग) चतस्रः,
   (घ) धनम्, (ङ) सखायः, (च) त्रयः
2. (क) गच्छामः, (ख) इच्छामः, (ग) पतति–भविष्यति,
   (घ) अगच्छन्, (ङ) अपतत्, (च) अवदत्, गच्छामि
3. (क) कुतः, (ख) कुत्र, (ग) प्रति,
   (घ) यत्र, तत्र, (ङ) यावत्, तावत्

5.2 1. (क) रजतम्, (ख) स्वर्णम्, (ग) रक्तरंजितं चक्रधरम्,
(घ) चक्रम्, (ङ) रक्तम्, (च) विनाशः
2. (क) अग्रे, (ख) स्वर्णम्, (ग) चतुर्थः,
(घ) अवतीर्य, (ङ) चक्रम्
3. (क) लोभाविष्टः, (ख) चक्रधरः, (ग) पिपासाकुलितः,
(घ) भयग्रस्तः, (ङ) मस्तकोपरि, (च) रुधिराप्लावितम्
4. (क) + (iii), (ख + (v), (ग )+ (i),
(घ) + (vi), (ङ) + (ii), (च + (iv),

**पाठान्तप्रश्नाः**

1. ग, क, छ, झ, ङ, घ, च, ख, ज, ञ
2. (क) ताम्रम्, रजतम्, स्वर्णम्
(ख) अग्रे रत्नानि भविष्यन्ति
(ग) रुधिरप्लावितं चक्रधरम्
(घ) सिद्धाः
(ङ) योगीभैरवानन्दः
3. अग्रे, अधः, कथम्, अतः, प्रति, तत्र, कुतः तु, एवम्
4. (क) प्रथमम्, (ख) चतस्रः, (ग) द्वितीयः,
(घ) त्रयः, (ङ) द्वौ, (च) एकम्

# 6

# राजते खलु कन्याकुमारी


अहं जानामि ननु भारतं नाम देवभूमिः। भारतस्य उत्तरे मुकुटशिरोमणिः हिमालयो नाम नगाधिराजः विराजते। दक्षिणे त्रयः समुद्राः भारतभूमेः पादप्रक्षालनं कुर्वन्ति। तत्र सागराणां सङ्गमस्थले एव कन्याकुमारी नाम क्षेत्रम् अस्ति। अस्य दिव्यस्थानस्य दर्शनेन स्वामिविवेकानन्दः अपि प्रभावितः जातः। अतः सः समुद्रं तीर्त्वा एव एतत् द्वीपम् उपागच्छत्। अस्य स्थानस्य ऐतिहासिकं भौगोलिकं सामाजिकं च गौरवं वर्तते। प्रकृतेः सौन्दर्यं तु अवर्णनीयम्। प्रस्तुतं पाठं पठित्वा तु वयम् अस्य क्षेत्रस्य विषये अधिकं ज्ञास्यामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- कन्याकुमारी इति सन्दर्भे प्रचलिताः कथाः स्वशब्दैः लेखितुं समर्थः भविष्यति;
- विवेकानन्दस्मारकस्य वर्णनं कर्तुं शक्ष्यति;
- पाठे विशेषणानि अवचित्य विशेष्यपदैः सह योजनं कर्तुं शक्तः भविष्यति;
- पदानां पर्यायपदानि विलोमपदानि च लेखितुं सक्षमः भविष्यति;
- इकारान्तपुल्लिङ्ग–इकारान्तस्त्रीलिङ्गशब्दानां रूपरचनायाः तुलनां कर्तुं शक्तः भविष्यति;
- तत्पुरुषसमस्तपदानां विग्रहं कर्तुं योग्यः भविष्यति;
- क्त–क्तवतु प्रत्ययानां वाक्येषु प्रयोगं कर्तुं शक्तः भविष्यति;
- टाप्–ङीप् प्रत्ययान्तपदानां चयनं करिष्यति;
- परितः, पुरतः, उपरि, पार्श्वे पदानां योगे उपपदविभक्तेः प्रयोगं करिष्यति।

## क्रियाकलापः





6.1

मानचित्रं दृष्ट्वा निम्नलिखितानां प्रश्नानाम् उत्तराणि लिखत–


1. दक्षिणभारतस्य प्रदेशानां नामानि लिखत ............ ................ .............. .................

2. त्रयाणां सागराणां नामानि लिखत (क)............
   (ख)................
   (ग).............

3. सागराणां सङ्गमस्थले दक्षिणकोणे बिन्दुना प्रदर्शितस्थानस्य नाम लिखत







## 6.1 मूलपाठः

### राजते खलु कन्याकुमारी

आम् सः बिन्दुः अस्ति कन्याकुमारी। इदानीं तस्य विषये अधिकं जानीमः।

सम्प्रति वयं मूलपाठं पठामः।

कन्याकुमारी नामकम् अद्वितीयं क्षेत्रं पूर्वसमुद्रस्य पश्चिमसमुद्रस्य दक्षिणसमुद्रस्य च सङ्गमे स्थितम्। त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं प्रक्षालयन्ति। भारतस्य मानचित्रे तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एषा कन्याकुमारी।

कन्याकुमारीविषये नानाविधाः कथाः श्रूयन्ते। प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः जातः। सः विविधान् अत्याचारान् कृत्वा जनान् पीडयति स्म। जनाः देवं विष्णुं प्रार्थितवन्तः। देवः अवदत्– अस्य वधः पराशक्त्या कुमार्या करिष्यते। तपः कृत्वा पराशक्तिः बाणासुरस्य वधम् अस्मिन् एव क्षेत्रे अकरोत्। मरणसमये बाणासुरः देव्यै निवेदितवान् ''देवि! क्षमां कुरु। मह्यं सद्गतिं प्रददातु भवती। इदं स्थलं तीर्थं भवेत्। अत्र ये स्नास्यन्ति ते गङ्गास्नानफलं प्राप्नुयुः इति।'' देवी 'तथैवास्तु' इति उक्त्वा तम् अनुगृहीतवती। बाणतीर्थनामके अस्मिन् स्थाने स्नानं महत् पुण्यदायकम् इति मन्यते। श्रूयते यत् कुमार्या कन्यया सः असुरः हतः इति एतत् क्षेत्रं कन्याकुमारी इति नाम्ना प्रसिद्धं जातम्।

अपरा च कथा एवं श्रूयते यत् पूर्वं भरतः नाम नृपः आसीत्। तस्य अष्ट पुत्राः एका पुत्री च आसीत्। भरतः स्वदेशं नवधा विभज्य दत्तवान्। दक्षिणदेशः कुमारीनाम्न्यै पुत्र्यै दत्तः। अतः सः देशः कुमारीक्षेत्रम् इत्येव प्रसिद्धः अभवत्।


अस्मिन् स्थाने एकं मन्दिरम् अस्ति। तत्र देवी जपमालां गृहीत्वा तपः आचरन्ती इव दृश्यते। विजयादशमीदिने तु बाणासुरस्य वधार्थमेव प्रस्थितायाः धनुर्बाणादिभूषितायाः देव्याः कन्याकुमार्याः शोभायात्रा भवति। नवरात्रदिनेषु मन्दिरे विशेषपूजाः प्रचलन्ति। विशाखानक्षत्रे जलयात्रा–उत्सवः आयोज्यते। एतेषु सर्वेषु उत्सवेषु असंख्याः भक्ताः तत्र सम्मिलन्ति।

**शब्दार्थाः**

अद्वितीयं = अद्भुत
सङ्गमे = मिलने के स्थान पर
पदतलं = चरणों को
प्रक्षालयन्ति = धोते हैं
नानाविधाः = अनेक प्रकार की
मदोन्मत्तः = घमण्ड के नशे में चूर
प्रार्थितवन्तः = प्रार्थना की।
स्नास्यन्ति = स्नान करेंगे
तथैवास्तु = ऐसा ही हो
अपरा = दूसरी

नवधा = नौ भागों में
विभज्य = बाँटकर
वधार्थं = वध के लिए
विशाखा नक्षत्रे = विशाखा नक्षत्र में
तपः आचरन्ती = तपस्या करती हुई
वैशिष्ट्यम् = विशेषता
शिलामये द्वीपे = शिला से निर्मित द्वीप पर
प्रकोष्ठे = कमरे में

धनुर्बाणादिभूषितायाः = धनुष–बाणादि से सुशोभित




6.2 विवेकानंद स्मारक

**शब्दार्थाः**
बृहत् = बड़ी
भविष्यविषये = भारत के भविष्य के विषय में
रम्या = सुन्दर
पुरतः = सामने
परितः = चारों ओर
नीलजलधेः = नीले सागर की
अरुणवर्णं = लालरंग के
भास्करं = सूर्य को
कनकमयमिव = स्वर्णमय जैसा
असंख्यशुक्तिमालाः = असंख्य सीपियों की मालाएँ
भारतभूम्यै = भारत भूमि के लिए
समर्पयन्ति = समर्पित करती हैं

मन्दिरस्य नातिदूरे एव दक्षिणसमुद्रे स्थिते शिलामये द्वीपे बृहत् विवेकानन्दशिलास्मारकम् निर्मितम् अस्ति। विवेकानन्दः 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् आगतः। शिलामयं द्वीपं दृष्ट्वा सः बाहुबले एव विश्वासं कृत्वा समुद्रं तीर्त्वा तत्र प्राप्तवान्। तत्र च ध्यानमग्नः सन् भारतस्य भविष्यविषये चिन्तनं कृतवान्। अतः श्री एकनाथ रानाडे महाभागः 1970 तमे वर्षे महता प्रयत्नेन विवेकानन्दशिलास्मारकस्य निर्माणम् अकारयत्। स्मारकस्य मध्ये विवेकानन्दस्य रम्या प्रतिमा दृष्टिगोचरा भवति। अत्र विशिष्टं ध्यानमन्दिरम् अस्ति। स्मारकस्य अन्धकारमये प्रकोष्ठे पुरतः 'ॐ' इत्यस्य चित्रं दृश्यते। अत्र सर्वे मौनं तिष्ठन्ति। शिलास्मारकस्य विशाले परिसरे देशविदेशेभ्यः पर्यटकाः आगत्य अस्य सुन्दरतां पश्यन्ति साधनां च कुर्वन्ति। ध्यानयोगादिमाध्यमेन चिकित्सामपि प्राप्नुवन्ति। स्मारकस्य पार्श्वे एव तिरुवल्लुवर कवेः प्रतिमा अपि विराजते। अयं 'तिरुक्कुरल' इति नामकस्य ग्रन्थस्य प्रणेता।

एतस्य भवनस्य पुरतः अस्ति श्रीपादशिला। भगवती कन्याकुमारी तत्रैव एकपादेन स्थित्वा तपः आचरितवती। तत्र शिलायां दक्षिणपादस्य चिह्नं स्पष्टतया दृश्यते। अतएव सा शिला श्रीपादशिला इति प्रसिद्धा जाता।



6.3 विवेकानंद शिला

द्वीपं परितः सागराणां शोभा अवर्णनीया एव। नीलजलधेः उपरि आगच्छन्तम् अरुणवर्णं भगवन्तं भास्करं दृष्ट्वा कस्य मनः न प्रसीदति। सम्पूर्णं समुद्रजलं कनकमयम् इव प्रतिभाति। एतत् एव तत् स्थलं यत्र सूर्योदयः तथा च सूर्यास्तः एकस्मात् एव स्थानात् द्रष्टुं शक्यते। प्रतिक्षणं सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमालाः च भारतभूम्यै समर्पयन्ति। अहो! 'राजते खलु कन्याकुमारी।'

## 6.2 बोधप्रश्नाः

1. सम्बद्धान् वाक्यांशान् योजयत–

| | |
|---|---|
| (क) तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते | (i) नानाविधाः कथाः श्रूयन्ते। |
| (ख) कन्याकुमारीविषये | (ii) एका पुत्री च आसीत्। |
| (ग) तस्य अष्ट पुत्राः | (iii) बिन्दुरूपेण दृश्यते एषा कन्याकुमारी। |
| (घ) स्मारकस्य मध्ये विवेकानन्दस्य | (iv) शोभा अवर्णनीया एव। |
| (ङ) द्वीपं परितः सागराणां | (v) रम्या प्रतिमा दृष्टिगोचरा भवति। |
| (च) सम्पूर्णं समुद्रजलं | (vi) कनकमयम् इव प्रतिभाति। |

2. रिक्तस्थानेषु क्रियापदानि लिखत–

(क) त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं .............................................।

(ख) देवि! क्षमां कुरु। मह्यं सद्गतिं ......................................... भवती।

(ग) दक्षिणदेशः 'कुमारी' नाम्न्यै पुत्र्यै .........................................।

(घ) अत्र सर्वे मौनं ................................................।

(ङ) एतस्य भवनस्य पुरतः ........................................ श्रीपादशिला।

(च) सम्पूर्णं समुद्रजलं कनकमयम् इव .................................।

3. मूलपाठात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत–

(क) प्रजापतेः पुत्रः ............................................... शिवात् वरं प्राप्य मदोन्मत्तः जातः।

(ख) अत्र ..................................... स्नास्यन्ति .............................गङ्गास्नानफलं प्राप्नुयुः।

(ग) बाणतीर्थनामके अस्मिन् स्थाने ................................... महत् पुण्यदायकम्।

(घ) ................................. देवं विष्णुं प्रार्थितवन्तः।

(ङ) ............................... तथैवास्तु इति कथयित्वा तम् अनुगृहीतवती।

(च) .................................. 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् आगतः।

## 6.3 अधुना अवगच्छामः

'कन्याकुमारी' इति प्रदेशस्य विषये पुनः पठामः। इदं स्थानं, बाणासुरस्य वधकारणात् पुण्यस्थलं जातम्। अस्य स्थलस्य महत्त्वं वयम् ज्ञास्यामः।

### प्रथमः अंशः

**कन्याकुमारी .......................................................................... सम्मिलन्ति।**

**(क) त्रयः समुद्राः कन्याकुमार्याः पदतलं निरन्तरं प्रक्षालयन्ति।**

के एते त्रयः समुद्राः? पूर्वः समुद्रः = बङ्ग–आख्यातः समुद्रः

पश्चिमः समुद्रः = अरबसागरः

दक्षिणः समुद्रः = हिन्दमहासागरः

एते समुद्राः किं कुर्वन्ति? कन्याकुमार्याः पदतलं प्रक्षालयन्ति।

कन्याकुमारी का? कन्याकुमारी एका देवी अस्ति। तस्याः नाम्ना तमिलनाडुप्रदेशे दक्षिणकोणस्य अन्ते बिन्दुरूपेण दृश्यते एकं क्षेत्रम्।त्रयः समुद्राः तस्याः कन्याकुमार्याः चरणौ प्रक्षालयन्ति। वस्तुतः अत्र त्रयाणां समुद्राणां सङ्गमः वर्तते। कन्याकुमार्याः नाम्ना इदं स्थलं कन्याकुमारीक्षेत्रं कथ्यते।

**(ख) प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः अभवत्।**

बाणासुरः कः? प्रजापतेः पुत्रः।

तेन कस्मात् वरः प्राप्तः? शिवात्। कथम्? प्रचण्डेन तपसा सः शिवं प्रसन्नम् अकरोत्। प्रसन्नो भूत्वा शिवः तस्मै वरम् अयच्छत्। एवं तस्य उपरि शिवस्य महती कृपा जाता।

कृपां प्राप्य सः कीदृशः अभवत्? कृपां प्राप्य सः मदोन्मत्तः जातः। उन्मत्तः स जनान् पीडयति स्म।

**(ग) बाणतीर्थनामके अस्मिन् स्थाने स्नानं महत् पुण्यदायकम् इति मन्यते**

कस्मिन् स्थाने स्नानं पुण्यदायकम्? बाणतीर्थनामके स्थाने।

स्थानस्य नाम बाणतीर्थं कथम् जातम्? बाणासुरस्य वधकारणात्। वस्तुतः मदोन्मत्तः बाणासुरः पराशक्त्या देव्या हतः। तत् वधस्थलं सः तीर्थस्थलं कर्तुं प्रार्थितवान्।

प्रार्थना कथं सफला जाता? बाणासुरस्य प्रार्थनया भगवती तत् स्थानं तीर्थस्थलम् अकरोत्। 'ये तत्र स्नास्यन्ति ते गङ्गास्नानफलं प्राप्स्यन्ति' इति वरम् भगवती अददात्। अतः देव्याः आशीर्वादैः तत्र स्नानं पुण्यदायकं भवति इति मन्यते।

**सारः**

तमिलनाडुराज्ये भारतस्य दक्षिणे कोणे कन्याकुमारी नामकं प्रसिद्धं तीर्थम् अस्ति। अत्र त्रयः समुद्राः मिलन्ति। 'कन्याकुमारी' इति नामविषये अनेकाः कथाः सन्ति। बाणासुरवधः, भरतस्य राज्यप्रदानम् इति प्रमुखे कथे। अस्मिन् मन्दिरे नवरात्रपूजनं, शोभायात्रायाः आयोजनं भव्यं भवति।

तमिलनाडु राज्य में भारत के दक्षिणी छोर पर तीन ओर समुद्र से घिरे एक स्थान का नाम कन्याकुमारी है। इस स्थल का नाम कन्याकुमारी कैसे पड़ा इस संदर्भ में अनेक दन्त कथाएँ हैं जिनमें बाणासुर तथा राजा भरत की कथाएँ प्रमुख हैं। कन्याकुमारी देवी

के मन्दिर में नवरात्र के दिनों में विशेष पूजा तथा शोभायात्रा का आयोजन किया जाता है।

## व्याकरणबिन्दवः

या विभक्तिः यत् लिङ्गं च विशेष्यपदे भवति तदुनसारम् एव विशेषणपदं वर्तते यथा– एकम् मन्दिरम्, असंख्याः भक्ताः, अस्मिन् स्थाने।

**सन्धयः**

| | | |
|---|---|---|
| बाणासुरः = | बाण + असुरः | अ + अ = आ (दीर्घसन्धिः) |
| मदोन्मत्तः = | मद + उन्मत्तः | अ + उ = ओ (गुणसन्धिः) |
| तथैव = | तथा + एव | आ + ए = ऐ (वृद्धिसन्धिः) |
| तथैवास्तु = | तथैव + अस्तु | अ + अ = आ (दीर्घसन्धिः) |
| इत्येव = | इति + एव | इ + ए = य (यण्सन्धिः) |

**समासाः**

| | | |
|---|---|---|
| अद्वितीयम् = | न द्वितीयम् | नञ् तत्पुरुषसमासः |
| मदोन्मत्तः = | मदेन उन्मत्तः | तृतीयातत्पुरुषः |
| मरणसमये = | मरणस्य समये | षष्ठीतत्पुरुषः |
| गङ्गास्नानफलम् = | गङ्गास्नानस्य फलम् | षष्ठीतत्पुरुषः |
| समुद्रतीरे = | समुद्रस्य तीरे | षष्ठीतत्पुरुषः |

**क्त–क्तवतुः**– क्त (त), क्तवतु (तवत्) प्रत्ययौ भूतकालिक प्रत्ययौ। 'क्त' प्रत्ययस्य प्रयोगः प्रायः कर्मवाच्ये, भाववाच्ये च भवति, क्तवतु प्रत्ययस्य प्रयोगः कर्तृवाच्ये भवति। विशेषणरूपे अपि अनयोः प्रयोगः भवति अतः त्रिषु लिङ्गेषु एतयोः प्रयोगः भवति।

यथा– क्त (1) तेल फलं <u>खादितम्</u>।

(2) मया बाला <u>दृष्टा</u>।

(3) गुरुणा बालः <u>पृष्टः</u>।

क्तवतु (1) गृहं <u>गतवान्</u> बालः। (पु.)

(2) गृहं गतवती बाला। (स्त्री.)

### पदपरिचयः (प्रकृति–प्रत्ययविभागः)

| पदानि | प्रकृतिः | प्रत्ययः | लिङ्गम् | विभक्तिः/ पुरुषः | वचनम् |
|---|---|---|---|---|---|
| हतः | हन् | क्त | पुं0 | प्रथमा | एकवचनम् |
| स्थितम् | स्था | क्त | नपुं0 | प्रथमा | एकवचनम् |
| दत्तः | दा | क्त | पुं0 | प्रथमा | एकवचनम् |
| प्रार्थितवन्तः | प्र+अर्थ | क्तवतु | पुं0 | प्रथमा | बहुवचनम् |
| निवेदितवान् | नि+विद् णिच् | क्तवतु | पुं0 | प्रथमा | एकवचनम् |
| अनुगृहीतवती | अनु+ग्रह | क्तवतु | स्त्री0 | प्रथमा | एकवचनम् |
| दत्तवान् | दा | क्तवतु | पुं0 | प्रथमा | एकवचनम् |
| आचरन्ती | आ+चर् | शतृ | स्त्री0 | प्रथमा | एकवचनम् |
| गृहीत्वा | ग्रह | क्त्वा | | | अव्ययम् |
| प्राप्य प्र+आप् | ल्यप् | | | अव्ययम् | |
| विभज्य | वि+भज् | ल्यप् | | | अव्ययम् |
| अस्मिन् | इदम् | | पुं0 | सप्तमी | एकवचनम् |
| पराशक्त्या | पराशक्तिः | | स्त्री0 | तृतीया | एकवचनम् |
| कुमारीनाम्न्यै | कुमारीनाम्नी | | स्त्री0 | चतुर्थी | एकवचनम् |
| कन्याकुमार्याः | कन्याकुमारी | | स्त्री0 | षष्ठी | एकवचनम् |
| प्रजापतेः | प्रजापति | | पुं0 | षष्ठी | एकवचनम् |

### क्रियापदपरिचयः

| | धातुः | वाच्यम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|---|
| दृश्यते | दृश् | कर्मवाच्ये | लट् | प्रथमपुरुषे | एकवचनम् |
| श्रूयन्ते | श्रू | कर्मवाच्ये | लट् | प्रथमपुरुषे | बहुवचनम् |
| आयोज्यते | आ युज् णिच् | कर्मवाच्ये | लट् | प्रथमपुरुषे | एकवचनम् |
| पीडयति | पीड् | कर्तृवाच्ये | लट् | प्रथमपुरुषे, | एकवचनम् |
| करिष्यति | कृ | " | लृट् | प्रथमपुरुषे | एकवचनम् |
| स्नास्यन्ति | स्ना | " | लृट् | प्रथमपुरुषे | बहुवचनम् |
| सम्मिलन्ति | सम् + मिल् | " | लट् | प्रथमपुरुषे | बहुवचनम् |
| प्रक्षालयन्ति | प्र + क्षाल् | " | लट् | प्रथमपुरुषे | बहुवचनम् |

## पाठगतप्रश्नाः 6.1

1. अधोलिखितपदेभ्यः पूर्वम् उपयुक्तविशेषणपदानि कोष्ठकात् चित्वा योज्यन्ताम्

   (नानाविधाः, कुमार्याः, विविधान्, त्रयः, कुमारीनाम्न्यै, अपरा)

   (क) .............................. समुद्राः

(ख) .............................. कथा

(ग) .............................. अत्याचारान्

(घ) .............................. कन्यया

(ङ) .............................. कथाः

(च) .............................. पुत्र्यै

2. अधोलिखतवाक्येषु यत् सत्यं तत् (✓) इति चिह्नेन असत्यं च (×) इति चिह्नेन चिह्नितं कुरुत

(क) कन्याकुमार्याः पूर्वे, पश्चिमे, दक्षिणे च समुद्राः सन्ति ( )

(ख) बाणासुरः जनान् रक्षति। ( )

(ग) भरतेन स्वदेशः अष्टधा विभज्य दत्तः ( )

(घ) मन्दिरे दीपावलि–उत्सवे विशेषपूजाः शोभायात्राः च आयोज्यन्ते। ( )

(ङ) बाणासुरः कन्याकुमार्या हतः। ( )

(च) तत्र देवी कन्याकुमारी जपमालां गृहीत्वा तपः आचरन्ती इव दृश्यते।( )

3. एकपदेन उत्तरत–

(क) बाणासुरः कस्य पुत्रः आसीत्? ..................................................

(ख) बाणासुरः देवीं कदा निवेदितवान्? ..................................................

(ग) कस्मिन् स्थाने स्नानं पुण्यदायकम्?

(घ) भरतेन दक्षिणदेशः कस्मै दत्तः? ..................................................

(ङ) मन्दिरे विशेषपूजाः कदा प्रचलन्ति? ..................................................

(च) कन्याकुमार्या कः हतः? ..................................................

---

## द्वितीयः अंशः

अधुना द्वितीयम् अंशं बोधामः।

**मन्दिरस्य नातिदूरे ...................................................... राजते खलु कन्याकुमारी।**

**(क) मन्दिरस्य नातिदूरे दक्षिणसमुद्रे स्थिते शिलामये द्वीपे बृहत् विवेकानन्दस्मारकं निर्मितम्**

दक्षिणसमुद्रे किं निर्मितम्? एकं बृहत् स्मारकम् निर्मितम्। स्मारकं कस्य अस्ति? स्वामिविवेकानन्दस्य इदं स्मारकम्। द्वीपः कीदृशः? अयं शिलामयः द्वीपः। 1892तमे वर्षे विवेकानन्दः तीर्त्वा तत्र अगच्छत्। तत्रैव सः ध्यानमग्नः भूत्वा भारतस्य भविष्यविषये चिन्तनम् अकरोत्। स्मारकं केन निर्मितम्? श्री एकनाथरानाडे महाभागेन 1970 तमे वर्षे

निर्मितम्। किम् इदं केवलं शिलास्मारकम्? नहि, इदं तु तीर्थस्थलम् अपि अस्ति। अत्र विवेकानन्दस्य प्रेरणादायिनी रम्या मूर्तिः दृश्यते। अत्र किंचित् वैशिष्ट्यम् अपि वर्तते? अत्र एकं ध्यानमन्दिरं वर्तते यस्मिन् अन्धकारमये प्रकोष्ठे प्रकाशमानं 'ऊँ' इत्यस्य चित्रं दृश्यते। ध्यानमन्दिरे जनाः किं कुर्वन्ति? जनाः मौनं भूत्वा साधनां कुर्वन्ति।

**(ख) समस्तं समुद्रजलं कनकमयमिव दृश्यते**

समुद्रजलं कथम् इव दृश्यते? समुद्रजलं स्वर्णमयम् इव दृश्यते। केन कारणेन जलं कनकमयं भाति? प्रभाते सूर्यस्य वर्णः अरुणः भवति। यदा अस्य अरुणिमा समुद्रतले पतति तदा समस्तं जलं कनकमयं प्रतीयते।

**सारः**

दक्षिणसमुद्रे एकस्मिन् द्वीपे विवेकानन्दस्मारकः अस्ति। अत्र ध्यानप्रकोष्ठे ऊँ इति चित्रम् अस्ति। अत्र जनाः ध्यानं कुर्वन्ति। अत्रैव तिरुक्कुरलप्रणेतुः तिरुवल्लुवरस्य अपि प्रतिमा अस्ति। एकेन पदेन तिष्ठन्ती कन्याकुमारीप्रतिमा अपि अत्र विराजते। समुद्रस्य जलं सूर्योदये स्वर्णमयं भवति। सागराः शंखमालाः शक्तिमालाः च समर्पयन्ति।

दक्षिण समुद्र के एक शिलामय द्वीप पर सन् 1970 में श्री एकनाथ रानाडे द्वारा स्थापित विवेकानन्द स्मारक है। यहाँ एक ध्यान मन्दिर है जिसके अँधेरे कमरे में 'ऊँ' का देदीप्यमान चित्र दिखाई देता है। देश विदेश से आए सैंकड़ों दर्शनार्थी यहाँ मौन साधना करते हैं। स्मारक के समीप तिरुक्कुरल नामक ग्रन्थ के प्रणेता तिरुवल्लुवर की प्रतिमा भी है। एक पैर से खड़े होकर तपस्या करती हुई कन्याकुमारी की मूर्ति भी यहाँ दिखाई देती है। प्रातः कालीन सूर्य की किरणें जब समुद्र पर पड़ती हैं तो समुद्र का जल स्वर्ण जैसा प्रतीत होता है। सागर प्रतिपल असंख्य सीपमालाएं और शंखमालाएं भारतभूमि को समर्पित करता रहता है।


## व्याकरणबिन्दवः

**सन्धयः**

| | | | |
|---|---|---|---|
| नातिदूरे = | न + अतिदूरे | अ + अ = आ | (दीर्घसन्धिः) |
| कि×चत् = | किम् + चित् | म् + च = च | (व्यंजनसन्धिः) |
| शताधिकाः = | शत + अधिकाः | अ + अ = आ | (दीर्घसन्धिः) |
| इत्यस्य = | इति + अस्य | इ + अ = य् | (यण्सन्धिः) |
| तत्रैव = | तत्र + एव | अ + ए = ऐ | (वृद्धिसन्धिः) |

**समासः**

| | | |
|---|---|---|
| नीलजलधेः– | नीलः चासौ जलधिः, तस्य | कर्मधारयसमासः |
| अरुणवर्णम्– | अरुणं वर्णम् | कर्मधारयसमासः |





**पद–परिचयः**

| पदानि | प्रकृतिः | प्रत्ययः | लिङ्गम् | विभक्तिः/ पुरुषः | वचनम् |
|---|---|---|---|---|---|
| निर्मितम् | निर् + मा | क्त | नपुं0 | प्रथमा | एकवचनम् |
| आगतः | आ + गम् | क्त | पुं0 | प्रथमा | एकवचनम् |
| जाता | जन् | क्त | स्त्री0 | प्रथमा | एकवचनम् |
| अवर्णनीया | अ + वर्ण | अनीयर् | स्त्री0 | प्रथमा | एकवचनम् |
| दृष्ट्वा | दृश् | क्त्वा | अव्ययम् | | |
| प्राप्तवान् | प्र + आप् | क्तवतु | पुं0 | प्रथमा | एकवचनम् |
| कृतवान् | कृ | क्तवतु | पुं0 | प्रथमा | एकवचनम् |
| द्रष्टुम् | दृश् | तुमुन् | अव्ययम् | | |
| शिलायाम् | शिला शब्दः | | स्त्री0 | सप्तमी | एकवचनम् |
| भारतभूम्यै | 'भारतभूमि' शब्दः | | स्त्री0 | चतुर्थी | एकवचनम् |

**क्रियापद–परिचयः**

| पदानि | प्रकृतिः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| सिध्यति | सिध् | लट् | प्रथम | एक0 |
| विराजते | वि + राज् | लट् | प्रथम | एक0 |
| प्रसीदति | प्र + सद् | लट् | प्रथम | एक0 |
| शक्यते | शक् कर्मवाच्यम् | लट् | प्रथम | एक0 |
| समर्पयन्ति | सम् + अर्प | लट् | प्रथम | एक0 |

**उपपदविभक्तिः**

परितः– अस्य पदस्य योगे द्वितीया विभक्तिः भवति। यथा– द्वीपं परितः सागराणां शोभा अवर्णनीया

पुरतः– एतेषां पदानां योगे षष्ठी विभक्तिः भवति।

उपरि– यथा वृक्षस्य पुरतः मयूरः।

गृहस्य उपरि वानरः।

पार्श्वे– विद्यालयस्य पार्श्वे वाटिका

**टाप् ङीप्** – टाप् (आ), ङीप् (ई) प्रत्ययौ स्त्रीलिङ्ग-वाचक शब्द– निर्माणाय प्रयुज्येते।

| | | |
|---|---|---|
| यथा– | अज + टाप् = अजा | देव + ङीप् = देवी |
| | बाल + टाप् = बाला | पुत्र + ङीप् = पुत्री |
| | श्वेत + टाप् = श्वेता | भवत् + ङीप् = भवती |
| | कुमार + ङीप् = कुमारी | |

## पाठगतप्रश्नाः 6.2


1. विशेषणं विशेष्यं च पृथक् कृत्वा लिखत

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (क) बृहत् स्मारकम् | | |
| (ख) द्वीपं शिलामयम् | | |
| (ग) प्रकाशमानं चित्रम् | | |
| (घ) अरुणवर्णं भगवन्तम् | | |
| (ङ) महता प्रयत्नेन | | |
| (च) अन्धकारमये प्रकोष्ठे | | |

2. कोष्ठकेषु दत्तानां पदानां समानार्थकपदानि मूलपाठात् चित्वा लिखत
   - (क) मन्दिरस्य .......................... (समीपे) विवेकानन्दस्मारकं दृश्यते।
   - (ख) मध्यभागे विवेकानन्दस्य रम्या .............................. (मूर्तिः) दृष्टिगोचरा भवति।
   - (ग) स्मारकस्य ............................ (निकटे) एव तिरुवल्लुवरप्रतिमा अपि विराजते।
   - (घ) भगवन्तं ............................... (सूर्य) दृष्ट्वा कस्य मनः न प्रसीदति।
   - (ङ) सम्पूर्णं समुद्रजलं ............................... (स्वर्णमयम्) इव दृश्यते।
   - (च) द्वीपं ......................... (सर्वतः)सागराणां शोभा अवर्णनीया।
3. प्रश्ननिर्माणं कुरुत
   - (क) शिलामयं द्वीपं दृष्ट्वा सः तीर्त्वा तत्र प्राप्तवान्।
   - (ख) स्मारकस्य मध्ये विवेकानन्दस्य रम्या प्रतिमा दृष्टिगोचरा भवति।
   - (ग) भगवती कन्याकुमारी तत्रैव एकपदेन स्थित्वा तपः आचरितवती।
   - (घ) तत्र शिलायां दक्षिणपादस्य चिह्नं स्पष्टतया दृश्यते।
   - (ङ) द्वीपं परितः सागराणां शोभा अवर्णनीया एव।
   - (च) सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमालाः च भारतभूम्यै समर्पयन्ति।

## 6.4 किम् अधिगतम्

1. भारतस्य दक्षिणे भागे 'कन्याकुमारी' नाम्नः स्थलस्य विषये अनेकाः कथाः प्रचलिताः।
2. कन्याकुमार्याः मन्दिरे नवरात्रदिनेषु विशेषपूजाः शोभायात्राः च आयोज्यन्ते।
3. दक्षिणसमुद्रे शिलामयद्वीपे विवेकानन्दस्य स्मारकं वर्तते।
4. 'तिरुवल्लुवरप्रतिमा', 'श्रीपादशिला' च अपि प्रसिद्धे।
5. एकस्मात् स्थानात् एव सूर्योदयः सूर्यास्तः च द्रष्टुं शक्येते।
6. क्त, क्तवतु भूतकालिक कृत् प्रत्ययौ।





7. तत्पुरुषसमासे उत्तरपदं प्रधानं भवति। समासे विग्रहस्य अवस्थायां पूर्वपदस्य विभक्तेः लोपः भवति।
8. क्त्वा, ल्यप्, तुमुन्, –प्रत्ययानां योगेन अव्ययपदानि भवन्ति।
9. ईकारान्तस्त्रीलिङ्ग इकारान्तस्त्रीलिङ्गशब्दरचनयोः भेदः ज्ञातः।
10. परितः योगे द्वितीया, पुरतः, उपरि, पार्श्वे योगे च षष्ठी उपपदविभक्तिः भवति।
11. टाप् (आ) ङीप् (ई) स्त्रीवाचकप्रत्ययौ।

## 6.5 योग्यताविस्तारः

**(क) कन्याकुमारीक्षेत्रस्य विशिष्टपरिचयः**

- कन्याकुमारी इति तीर्थस्थानं जगत्प्रसिद्धम् अस्ति। अत्र प्रमुखदर्शनीयस्थानम् अस्ति 'विवेकानन्दस्मारकम्' यत् 1970 तमे वर्षे स्थापितम् अभवत्।
- कन्याकुमारीतः यन्त्रचालितया नौकया स्मारकं प्रति गन्तुं शक्यते।
- तिरुक्कुरल् नामकः ग्रन्थः तमिलुवेदः अपि कथ्यते। तिरुवल्लुरस्य प्रतिमायाः पदतलं प्राप्य नमस्कृत्य ततः पुनः नौका स्मारकं प्रति गच्छति।
- स्मारकस्य एकस्मिन् भागे विवेकानन्दसाहित्यस्य वेदान्तसाहित्यस्य विक्रयव्यवस्था अपि अस्ति।
- स्मारके यदा कदाचित् विशाला प्रदर्शनी अपि आयोज्यते।
- तत्र संस्कृतनाटकादीनां मंचनम् अपि भवति।

**(ख) भाषाविस्तारः**

पाठे अधोलिखितानाम् अकारान्तपुंल्लिङ्गशब्दानां रूपाणां प्रयोगः अस्ति। प्रथमे पाठे द्वादशशब्दानां रूपाणि दर्शितानि। तथैव एतेषां शब्दानां रूपाणि अपि भवन्ति।

**अकारान्तपुल्लिंगशब्दाः (रामवत्)**

समुद्रः, संगमः, कोणः, पुत्रः, बाणासुरः, शिवः, वरः, अत्याचारः, जनः, देवः, वधः, समयः, भरतः, नृपः, पुत्रः, देशः, उत्सवः, भक्तः, विवेकानन्दः, विश्वासः, प्रयत्नः, पर्यटकः, परिसरः, विदेशः, योगः, ग्रन्थः, पादः, सागरः, भास्करः, सूर्योदयः, सूर्यास्तः, तरङ्गः।

**अकारान्तनपुंसकलिङ्गशब्दाः (फलवत्)**

जलम्, भारतम्, क्षेत्रम्, बिन्दुरूपम्, मानचित्रम्, पदतलम्, स्थलम्, तीर्थम्, फलम्, स्थानम्, मन्दिरम्, दिनम्, नक्षत्रम्, द्वीपम्, स्मारकम्, बलम्, निर्माणम्, प्रकोष्ठम्, ध्यानम्, भवनम्।

**आकारान्तस्त्रीलिङ्गशब्दाः (मालावत्)**

माला, कथा, कन्या, शोभा, जपमाला, शिला, क्षमा, प्रतिमा, सुन्दरता, अपरा, शोभायात्रा, चिकित्सा, भूषिता, साधना, पूजा, रम्या, प्रस्थिता, इच्छा, प्रचलिता।

### इकारान्तपुल्लिङ्गशब्दः (प्रजापति) स्त्रीलिङ्गश्च (भूमिः) तयोः तुलनात्मकरूपाणि

| विभक्तिः | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| प्रथमा | प्रजापतिः (पुं.) | प्रजापती | प्रजापतयः |
| | भूमिः (स्त्री.) | भूमी | भूमयः |
| द्वितीया | प्रजापतिम् | प्रजापती | प्रजापतीन् |
| | भूमिम् | भूमी | भूमीः |
| तृतीया | प्रजापतिना | प्रजापतिभ्याम् | प्रजापतिभिः |
| | भूम्या | भूमिभ्याम् | भूमिभिः |
| चतुर्थी | प्रजापतये | प्रजापतिभ्याम् | प्रजापतिभ्यः |
| | भूमये/भूम्यै | भूमिभ्याम् | भूमिभ्यः |
| पंचमी | प्रजापतेः | प्रजापतिभ्याम् | प्रजापतिभ्यः |
| | भूमेः/भूम्याः | भूमिभ्याम् | भूमिभ्यः |
| षष्ठी | प्रजापतेः | प्रजापत्योः | प्रजापतीनाम् |
| | भूमेः/भूम्याः | भूम्योः | भूमीनाम् |
| सप्तमी | प्रजापतौ | प्रजापत्योः | प्रजापतिषु |
| | भूमौ/भूम्याम् | भूम्योः | भूमिषु |
| सम्बोधन | हे प्रजापते | हे प्रजापती | हे प्रजापतयः |
| | हे भूमे | हे भूमी | हे भूमयः |

### इकारान्तस्त्रीलिङ्ग (गतिः) – ईकारान्तस्त्रीलिङ्ग (देवी) रूपेषु भेदं पश्यत

| विभक्तिः | एकवचने | द्विवचने | बहुवचने |
|---|---|---|---|
| प्रथमा | गतिः | गती | गतयः |
| | देवी | देव्यौ | देव्यः |
| द्वितीया | गतिम् | गती | गतीः |
| | देवीम् | देव्यौ | देवीः |
| तृतीया | गत्या | गतिभ्याम् | गतिभिः |
| | देव्या | देवीभ्याम् | देवीभिः |
| चतुर्थी | गतये/गत्यै | गतिभ्याम् | गतिभ्यः |
| | देव्यै | देवीभ्याम् | देवीभ्यः |
| पंचमी | गतेः/गत्याः | गतिभ्याम् | गतिभ्यः |
| | देव्याः | देवीभ्याम् | देवीभ्यः |
| षष्ठी | गतेः/गत्याः | गत्योः | गतीनाम् |
| | देव्याः | देव्योः | देवीनाम् |
| सप्तमी | गतौ/गत्याम् | गत्योः | गतिषु |
| | देव्याम् | देव्योः | देवीषु |
| सम्बोधन | हे गते! | हे गती! | हे गतयः! |
| | हे देवि! | हे देव्यौ! | हे देव्यः! |

**ध्यातव्यः** केवलम् प्रथमा विभक्त्यां सर्वेषु वचनेषु, द्वितीयाविभक्त्याम् द्विवचने, सम्बोधने च एकवचने एव भेदः भवति।

**क्त्वाप्रत्ययान्तशब्दाः** अव्ययपदानि भवन्ति। दृष्ट्वा, गृहीत्वा, पठित्वा, कृत्वा, तीर्त्वा, स्थित्वा।

**धातोः** पूर्वं यदि उपसर्गः योज्यते तथा 'क्त्वा' प्रत्ययस्य स्थाने 'ल्यप्' प्रत्ययस्य प्रयोगः भवति, तत्पदम् अपि अव्ययं भवति।

यथा आदाय, प्राप्य, विभज्य, आगत्य।

## 6.6 पाठान्तप्रश्नाः

1. रेखाङ्कितपदानां विलोमपदं पाठात् चित्वा रिक्तस्थानेषु लिखत–

| | |
|---|---|
| (क) <u>जन्मसमये</u> तुलसीदासेन 'राम' इति शब्दः उच्चारितः इति मन्यते। | (1) ............................ बाणासुरः देव्यै निवेदितवान्, "देवि! क्षमां कुरु।" |
| (ख) मम गृहस्य <u>पृष्ठतः</u> एकम् उद्यानं वर्तते। | (2) एतस्य भवनस्य ......................................अस्ति श्रीपादशिला। |
| (ग) भूलोकस्य <u>नीचैः</u> पातालोकः अस्ति। | (3) नीलजलधेः ................................. आगच्छन्तम् अरुणवर्णं भास्करं दृष्ट्वा कस्य मनः न प्रसीदति। |
| (घ) पिपासिताय जलं <u>दत्त्वा</u> अहं प्रसन्ना जाता। | (4) तत्र देवी कन्याकुमारी जपमालाम्............ तपः आचरन्ती इव दृश्यते। |
| (ङ) <u>प्रकाशमये</u> स्थाने वयं सर्वं द्रष्टुं शक्नुमः। | (5) स्मारकस्य ............................. प्रकोष्ठे पुरतः प्रकाशमानम् 'ॐ' इत्यस्य चित्रं दृश्यते। |

2. समस्तपदस्य निर्माणं कृत्वा लिखत–

(क) न द्वितीयम् .................................................

(ख) गङ्गायां स्नानस्य फलम् .................................................

(ग) समुद्रस्य तीरे .................................................

(घ) मरणस्य समये .................................................

(ङ) सद्गत्याः दानेन .................................................

(च) तीर्थस्य क्षेत्रम् .................................................

3. कन्याकुमारी नामके स्थाने 'श्रीपादशिला वर्तते। अस्याः विषये त्रीणि वाक्यानि लिखत।

4. निर्दिष्टधातुभिः सह क्त प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत–

(क) प्रजापतेः पुत्रः बाणासुरः शिवात् वरं प्राप्य मदोन्मत्तः ........................। (जन् + क्त)

(ख) श्रूयते यत् कुमार्या कन्यया सः असुरः ........................................ । (हन् + क्त)

(ग) एतत् नगरं कन्याकुमारी नाम्ना प्रसिद्धं ........................................ । (जन् + क्त)

(घ) दक्षिणदेशः कुमारीनाम्न्यै पुत्र्यै ........................................................ । (दा + क्त)

(ङ) विवेकानन्दः 1892 तमे वर्षे कन्याकुमारीक्षेत्रम् ...................... । (आ + गम् + क्त)

(च) अतएव सा शिला 'श्रीपादशिला' इति प्रसिद्धा ............................... । (जन् + क्त)

5. विवकानन्दशिलास्मारकस्य वर्णनं प×चवाक्येषु कुरुत।

6. पूर्णवाक्येन उत्तरत–

(क) कन्याकुमारीक्षेत्रे कति समुद्राणां सङ्गमः अस्ति?

(ख) का बाणासुरस्य वधम् अकरोत्?

(ग) 'जलयात्रा–उत्सवः' कदा आयोज्यते?

(घ) स्मारकस्य अन्धकारमये प्रकोष्ठे किं दृश्यते?

(ङ) भगवती कन्याकुमारी कथं तपः आचरितवती?

(च) प्रतिक्षणं सागरतरङ्गाः भारतभूम्यै काः काः समर्पयन्ति?

7. अधोलिखितेषु शब्देषु अकारान्त पुल्लिंगशब्दान्, अकारान्त नपुंसकलिंगशब्दान्, आकारान्त स्त्रीलिङ्ग शब्दान् च पृथक् पृथक् कृत्वा लिखत–

सङ्गमः, कन्याः, परिसरः, क्षेत्रम्, कथा, ध्यानम्, पर्यटकः, स्मारकम्, सूर्योदयः, प्रतिमा, मन्दिरम्, पूजाः, नक्षत्रम्।

## 6.7 उत्तराणि

**बोध प्रश्नाः**

1. (क) + (iii), (ख) + (i), (ग) + (ii), (घ) + (v), (ङ) + (iv), (च) + (vi)

2. (क) प्रक्षालयन्ति, (ख) प्रददातु, (ग) दत्तः, (घ) तिष्ठन्ति, (ङ) अस्ति, (च) प्रतिभाति।

3. (क) बाणासुरः, (ख) ये ....ते, (ग) स्नानम्, (घ) जनाः, (ङ) देवी, (च) विवेकानन्दः

**पाठगतप्रश्नाः 6.1**

1. (क) त्रयः (ख) अपरा, (ग) विविधान् (घ) कुमार्या, (ङ) नानाविधाः, (च) कुमारीनाम्न्यै

2. (क) (✓), (ख) (×), (ग) (✓), (घ) (×), (ङ) (✓), (च) (✓)

3. (क) प्रजापतेः, (ख) मरणसमये, (ग) बाणतीर्थे,
(घ) कुमार्यै, (ङ) विजयादशमीदिने, (च) बाणासुरः

6.2

1.

| विशेषणम् | विशेष्यम् | विशेषणम् | विशेष्यम् |
|---|---|---|---|
| (क) बृहत् | स्मारकम् | (घ) अरुणवर्णम् | भगवन्तम् |
| (ख) शिलामयम् | द्वीपम् | (ङ) महता | प्रयत्नेन |
| (ग) प्रकाशमानम् | चित्रम् | (च) अन्धकारमये | प्रकोष्ठे |

2. (क) नातिदूरे, (ख) प्रतिमा, (ग) पार्श्वे,
   (घ) भास्करम्, (ङ) कनकमयम्, (च) परितः

3. (क) कम्, (ख) कस्य, (ग) केन,
   (घ) कस्याम्, (ङ) कम्, (च) कस्यै

**6.5 पाठान्तप्रश्नाः**

1. (क) मरणसमये, (ख) पुरतः, (ग) उपरि,
   (घ) आदाय, (ङ) अन्धकारमये,

2. (क) अद्वितीयम्, (ख) गङ्गास्नानफलम्, (ग) समुद्रतीरे,
   (घ) मरणसमये, (ङ) सद्गतिदानेन, (च) तीर्थक्षेत्रम्

3. 1. भवनस्य पुरतः श्रीपादशिला वर्तते।
   2. तत्र भगवती कन्याकुमारी एकपदेन स्थित्वा तपः आचरितवती।
   3. शिलायां दक्षिणपादस्य चिह्नं दृश्यते।

4. (क) जातः, (ख) हतः, (ग) जातम्,
   (घ) दत्तः, (ङ) आगतः, (च) जाता

5. द्वीपं परितः सागराणां शोभा अद्वितीया अस्ति। नीलसागरे आगच्छन्तम् अरुणवर्णं भगवन्तं सूर्यं दृष्ट्वा मनः प्रसीदति। समुद्रजलं स्वर्णमयं प्रतीयते। अत्र सूर्योदयः सूर्यास्तः च एकस्मात् एव स्थानात् द्रष्टुं शक्यते। प्रतिक्षणं सागरतरङ्गाः असंख्यशुक्तिमालाः शंखमाला च भारतभूम्यै समर्पयन्ति।

6. (क) कन्याकुमारीक्षेत्रे त्रयाणाम् समुद्राणां सङ्गमः अस्ति।
   (ख) पराशक्तिः कन्याकुमारी बाणासुरस्य वधम् अकरोत्।
   (ग) विशाखानक्षत्रे जलयात्रा उत्सवः आयोज्यते।
   (घ) स्मारकस्य अन्धकारमये प्रकोष्ठे ॐ दृश्यते।
   (ङ) एकपादेन स्थित्वा कन्याकुमारी तपः आचरितवती।
   (च) प्रतिक्षणं सागरतरङ्गाः भारतभूम्यै असंख्यशुक्तिमालाः, शंखमालाः च समर्पयन्ति।

7.

| अकारान्तपुल्लिङ्गशब्दाः | अकारान्त नपुंसकलिङ्गशब्दाः | आकारान्त स्त्रीलिंङ्गशब्दाः |
|---|---|---|
| सङ्गमः | क्षेत्रम् | कन्याः |
| परिसरः | ध्यानम् | कथा |
| पर्यटकः | स्मारकम् | पूजाः |
| सूर्योदयः | मन्दिरम् | प्रतिमाः |
| | नक्षत्रम् | |

# 7

# एतद् उपास्यम्

प्राचीनकाले भारतीयसंस्कृतौ मानवानां कृते चत्वारः आश्रमाः स्वीकृताः। ते च ब्रह्मचर्य–गृहस्थ–वानप्रस्थ–संन्यासाः इति। ब्रह्मचर्याश्रमे छात्राः गुरुकुले स्थित्वा विद्याग्रहणं कुर्वन्ति स्म। वेद–वेदांगानि पाठयित्वा आचार्यः अध्ययनस्य समाप्तौ शिष्यान् उपदिशति स्म। ते एव उपदेशाः अद्यत्वे अपि दीक्षान्तभाषणरूपेण प्रसिद्धाः सन्ति। वेदानां रहस्यं साररूपेण उपनिषत्सु उपलभ्यते। वस्तुतः वैदिकसाहित्यस्य अन्तिमं स्वरूपम् उपनिषद्रूपेण सुरक्षितम्। यत् ज्ञानं शिष्यः गुरोः समीपम् उपविश्य प्राप्नोति तत् एव उपनिषद्। तैत्तिरीयोपनिषदि गुरुणा उपदिष्टाः उपदेशाः अस्मिन् पाठे संकलिताः।


## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- सदाचारविषये उपदेशवाक्यानि सम्यक् अवबोद्धुं समर्थः भविष्यति;
- पाठानुसारं करणीयानां कर्मणां निषिद्धकर्मणां च सूचीं निर्मातुं शक्तः भविष्यति;
- कर्मणः आचारस्य वा विषये संदेहे सति किं करणीयम् इति लेखितुं शक्ष्यति;
- लोट् लकारस्य विधिलिङ्. लकारस्य च प्रयोगं वाक्येषु कर्तुं सक्षमः भविष्यति;
- नञ्तत्पुरुषसमासस्य प्रयोगं कर्तुं योग्यः भविष्यति;
- तव्यत्, अनीयर्, यत्, प्रत्ययानां प्रयोगं कर्तुं समर्थः भविष्यति;
- युग्म–अव्ययानां वाक्येषु प्रयोगं करिष्यति;
- पदानां वर्णविश्लेषणं करिष्यति।

## क्रियाकलापः

अधः चित्रद्वयं प्रदत्तम् अस्ति। एकस्मिन् चित्रे गुरुः छात्रान् पाठयति। द्वितीये चित्रे छात्रजीवनं समाप्य गृहं प्रस्थितान् छात्रान् आचार्यः सम्बोधयति। उभयचित्रसम्बद्धानि अत्र कानिचित् वाक्यानि लिखितानि। तेषु वाक्येषु यानि वाक्यानि अध्ययनरत–छात्रेभ्यः सन्ति 'क' स्तम्भे, यानि च छात्रजीवनं समाप्य गृहं गच्छतः छात्रान् प्रति सन्ति तानि 'ख' स्तम्भे लिखत।



7.1



7.2

**वाक्यानि–**

1. अस्माभिः सुचरितानि एव पालनीयानि।
2. पुष्पाणि चित्वा आनयत।
3. दानं श्रद्धया यच्छेत्।
4. आजीवनं स्वाध्यायं प्रवचनं च न त्यजेत्।
5. स्वपाठं ध्यानेन पठत।
6. सदा धर्मस्य पालनं कुर्यात्।
7. यज्ञाय समिधम् आनयत।
8. त्वया सदा परोपकारः कर्तव्यः।
9. वनात् अर्जुनवृक्षस्य त्वचम् आनय।
10. इमान् मन्त्रान् सस्वरं पठत।

| **'क' स्तम्भः (अध्ययनरत छात्रेभ्यः)** | **'ख' स्तम्भः (गृहं गमनोत्सुकेभ्यः)** |
|---|---|
| 1 | 1 |
| 2 | 2 |
| 3 | 3 |
| 4 | 4 |
| 5 | 5 |

## 7.1 मूलपाठः

### एतद् उपास्यम्

इदानीं वयम् मूलपाठं ध्यानेन पठामः।


वेदम् अनूच्य आचार्योऽन्तेवासिनम् अनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां च न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।

मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वया ऽऽसनेन प्रश्वसितव्यम्।

श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षाः धर्मकामाः स्युः यथा ते तत्र वर्तेरन् तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ता आयुक्ताः अलूक्षा धर्मकामाः स्युः यथा ते वर्तेरन् तथा तेषु वर्तेथाः। एषः आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम् एवमुपासितव्यम्। एवम् चैतदुपास्यम्।

**शब्दार्थाः**

अनूच्य = पढ़ाकर, अन्तेवासिनम् = शिष्य को, अनुशास्ति = उपदेश देता है।, स्वाध्यायात् = पढ़ने से, मा प्रमदः = आलस्य मत करो, आहृत्य = लाकर, प्रजातन्तुम् = सृष्टि (सन्तान) के क्रम को, मा व्यवच्छेत्सीः = मत तोड़ो, धर्मात् न प्रमदितव्यम् = कर्तव्य से विमुख मत होवो।, कुशलात् = आत्मरक्षा के लिए किए जाने वाले कर्म से, न प्रमदितव्यम् = आलस्य नहीं करना चाहिए।, भूत्यै = विभूति–ऐश्वर्य देने वाले मांगलिक कार्यों के प्रति, स्वाध्यायप्रवचनाभ्याम् = अध्ययन और अध्यापन से।, देवपितृकार्याभ्याम् = पूजा यज्ञ आदि, देवकार्य और श्राद्ध तर्पण आदि, पितृ कार्य से, मातृदेवो भव = माता को देवता समझने वाला बनो, यानि अनवद्यानि = जो भी निन्दा रहित, सेवितव्यानि = आचरण करना चाहिए, नो इतराणि = इनसे विपरीत का नहीं। यानि अस्माकं सुचरितानि = हम आचार्य लोगों के भी सुचरित (शुभ चरित) अर्थात् शास्त्र के अनुकूल कर्म हैं, उपास्यानि = उन्हीं की तुझे उपासना करनी चाहिए।, नो इतराणि = दूसरे इनसे विपरीत की नहीं।, अस्मच्छ्रेयांसः = जो हमसे श्रेष्ठ विद्वान् हैं। आसनेन = आसन आदि देकर, प्रश्वसितव्यम् = उनकी थकान दूर करनी चाहिए।, श्रद्धया देयम् = श्रद्धा से दान देना चाहिए, श्रिया देयम् = सम्मानपूर्वक देना चाहिए, ह्रिया देयम् = लज्जापूर्वक देना चाहिए, भिया देयम् = भय मानते हुए देना चाहिए। संविदा = मैत्री भाव, सद्भाव से, अथ यदि = फिर इस प्रकार व्यवहार करते हुए, कर्मविचिकित्सा = कर्म के विषय में संशय अर्थात् कार्य–अकार्य का निर्णय न कर सकना, वृत्तविचिकित्सा = आचरण के विषय में संशय, ये तत्र ब्राह्मणाः = वहाँ उस देश काल में जो विद्वान्, सम्मर्शिनः = विचारशील, विवेकी, युक्ताः = कर्म में नियुक्त, ज्ञान–विज्ञान में निपुण, आयुक्ता = स्वेच्छा से कर्मपरायण (आजकल कमिश्नर के लिए आयुक्त शब्द का प्रयोग किया जाता है), अलूक्षाः = कोमल, सरल, बुद्धि वाले, धर्मकामाः स्युः = धर्माभिलाषी, विद्वान् हों, यथा ते वर्तेरन् = जैसा वे व्यवहार करें, तथा तत्र वर्तेथाः = वैसा ही तुम भी वहाँ करना, अभ्याख्यातेषु = दोषारोपित लोगों पर, संशययुक्तों पर, आदेशः = आज्ञा, विधि, वेदोपनिषत् = वेदों का रहस्य, अनुशासनम् = नियमानुकूल आचरण, उपासितव्यम् = उपासना करनी चाहिए। उपास्यम् = उपासना के योग्य है।





## 7.2 बोधप्रश्नाः

1. मूल पाठम् आधृत्य सम्बद्धान् वाक्यांशान् योजयत

| 'क' स्तम्भः | 'ख' स्तम्भः |
|---|---|
| (क) आचार्याय प्रियं धनमाहृत्य | (1) वेदोपनिषत् |
| (ख) स्वाध्यायप्रवचनाभ्यां च | (2) प्रजातन्तुं मा व्यवच्छेत्सीः |
| (ग) यान्यनवद्यानि कर्माणि | (3) अदेयम् |
| (घ) अश्रद्धया | (4) न प्रमदितव्यम् |
| (ङ) यथा ते वर्तेरन् | (5) तानि सेवितव्यानि |
| (च) एषा | (6) तथा तेषु वर्तेथाः |

उपयुक्तम् उत्तरं चिह्नीकुरुत

2. आचार्यः कम् अनुशास्ति?

   (क) शिष्यम् (ख) गृहस्थं (ग) संन्यासिनं (घ) आचार्यं

3. गुरुजनानां कथंविधानि चरितानि उपास्यानि?

   (क) सुचरितानि (ख) दुश्चरितानि (ग) इतराणि (घ) गृहस्य कर्माणि

4. दानं कथं न देयम्?

   (क) श्रिया (ख) ह्रिया (ग) श्रद्धया (घ) अश्रद्धया

5. पाठम् आधृत्य रिक्तस्थानानि पूरयत

   (क) स्वाध्यायात् ............................ प्रमदः।

   (ख) यान्यस्माकं सुचरितानि ...................................... त्वया उपास्यानि।

   (ग) भिया ............................।

   (घ) ............................. आदेशः।

   (ङ) देवपितृकार्याभ्यां न ...............................।

   (च) ................................ इतराणि।

## 7.3 अधुना अवगच्छामः

### प्रथमः अंशः

**वेदम् अनूच्य ........................................ प्रश्वसितव्यम्।**

अत्र प्रश्नोत्तरमाध्यमेन प्रथमम् अंशं बोधामः।

**(क) वेदमनूच्याचार्योऽन्तेवासिनम् अनुशास्ति**

कः अनुशास्ति? आचार्यः अनुशास्ति = उपदिशति। कम् उपदिशति? अन्तेवासिनम् अर्थात् शिष्यम्।

किम् अनूच्य? वेदम् अनूच्य–वेदं पाठयित्वा अर्थात् गुरुवर्यः अध्ययनात् परं शिष्याय जीवने हितकरान् उपदेशान् प्रयच्छति।

**(ख) आचार्याय प्रियधनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः**

कीदृशं धनम् आचार्याय यच्छेत्? आचार्याय विद्यानिष्पादनार्थं प्रियम्–इष्टं धनम् आहृत्य (आनीय) यच्छेत्। आचार्यस्य प्रियं धनं किम्? आचार्यस्य प्रियं धनं छात्रः।

कं मा व्यवच्छेत्सीः? प्रजातन्तुं सन्तानक्रमं मा व्यवच्छेत्सीः छिन्धि अर्थात् आचार्येण अनुज्ञातः त्वम् अनुरूपया कन्यया सह विवाहं कृत्वा सन्तानपरम्परां पालय। कस्मात् न प्रमदितव्यम्? कुशलान्न प्रमदितव्यम्, कुशलात् अर्थात् आत्मरक्षार्थं कर्मणः न प्रमदितव्यम्


मातृदेवो भव– मातृदेवो = मातरं देवताम् इव मन्यस्व। (मातृदेवो = माता देवता यस्य सः) अर्थात् त्वया माता देवतावत् उपास्या। एवमेव पिता, गुरुः, अतिथिः, अपि देवता वत् उपासनीयाः = पूज्याः।

**(ग) यान्यनवद्यानि कर्माणि तानि सेवितव्यानि**

कीदृशानि कर्माणि सेवितव्यानि? अनवद्यानि अवद्यं निन्द्यं न अवद्यम् इति अनिंद्यम् अर्थात् निन्दारहितानि कर्माणि शिष्टाचारलक्षणानि कर्माणि कर्तव्यानि।

**(घ) ये के चास्मच्छ्रेयांसो ब्राह्मणाः तेषां त्वयाऽऽसनेन प्रश्वसितव्यम्**

ब्राह्मणः कः भवति? ब्रह्म इति अक्षरम्। तत् अक्षरम् पठति = आचरति इति ब्राह्मणः अर्थात् विद्वान् एव ब्राह्मणः। के विद्वांसः प्रश्वसितव्याः? न सर्वे विद्वांसः, अपितु अस्मच्छ्रेयांसो ये अस्मत् श्रेयांसः अर्थात् आचार्यत्वादिधर्मैः अस्मत् श्रेयांसः प्रशस्यतराः, ते विद्वांसः एव त्वया प्रश्वसितव्याः। प्रश्वसितव्यम् इत्यस्य कोऽर्थः? प्रश्वसनं प्रश्वासः श्रमापनयः। तेषां श्रमः त्वया अपनेतव्यः। केन प्रकारेण? आसनं दत्त्वा तेषां श्रमः दूरीकर्तव्यः।



टिप्पणी

**भावार्थः**

वेदान् पाठयित्वा आचार्यः अन्तेवासिने शिष्याय जीवने हितकरान् उपदेशान् प्रयच्छति। जीवने सदा धर्मस्य मार्गे चलितव्यम्। आचार्याय तस्य प्रियं धनम् (सत्कर्मणा उपार्जितम्)/शिष्यं वा आहृत्य सन्तानपरम्परा पालनीया। धनार्जनात् अध्ययनात्, अध्यापनात्, देवपितृकार्याभ्याम् च आलस्यं न कर्तव्यम्। मातरं पितरम् आचार्यम् अतिथिं च देवता इव मन्यस्व। अस्माकं सदाचरणानि एव अनुसरणीयानि। समाजे अस्मदपि श्रेष्ठाः ये विद्वांसः सन्ति ते आसनादिप्रदानेन सदा सम्माननीयाः।

वेदों का अध्ययन कराने के बाद आचार्य अन्तेवासी शिष्य को जीवन के लिए उपयोगी एवं हितकारी उपदेश देता है, "सदा सत्य एवं धर्म के मार्ग पर चलो। आचार्य के लिए उसका अभीष्ट धन रूपी शिष्य लाना तथा सन्तानपरम्परा का निर्वाह करो। धनसम्पत्ति अर्जन करने में, अध्ययन और अध्यापन में तथा देवताओं और पितरों के कार्यों से आलस्य मत करो। माता, पिता, आचार्य एवं अतिथि को देवतुल्य मानो। हमारे केवल सद्गुणों को अपनाओ। समाज में हमसे भी अधिक जो सम्मानयोग्य विद्वान् हैं, उन्हें आसनादि देकर सम्मानित करो।

## व्याकरण–बिन्दवः

**पदपरिचयः**

| | | | |
|---|---|---|---|
| अन्तेवासिनम् = | अन्तेवासिन् शब्दः | द्वितीया विभक्तिः | एकवचनम् |
| भूत्यै = | "भूति" शब्दः | चतुर्थी विभक्तिः | एकवचनम् |
| श्रेयांसः = | 'श्रेयस्' शब्दस्य | प्रथमा विभक्तिः | बहुवचनम् |
| इतराणि = | 'इतर' शब्दः | नपुंसकलिंगम् प्रथमा विभक्तिः | बहुवचनम् |
| अनुशास्ति = | अनु + शास् + | लट् लकारः, प्रथमः पुरुषः | एकवचनम् |
| व्यवच्छेत्सीः = | वि + अव + छिद् + | विधिलिङ्, मध्यम पुरुषः | एकवचनम् |
| भव = | भू धातुः + | लोट् लकारः, मध्यमः पुरुषः | एकवचनम् |

**कृत्प्रत्ययानां प्रयोगः**

अनूच्य = अनु + ब्रू (→ वच् → उच्) + क्त्वा (ल्यप्)

(धातोः पूर्वम् उपसर्गकारणात् क्त्वा स्थाने ल्यप् प्रत्ययः भवति।)

आहृत्य = आ + हृ + ल्यप् (अव्ययम्)

प्रमदितव्यम् = प्र + मद् + तव्यत् + नपुंसकलिङ्गम्, एकवचनम्

(प्र + मद् योगे पंचमी विभक्तिः प्रयुज्यते यथा सत्यात् न प्रमदितव्यम्, धर्मात् न प्रमदितव्यम्। कुशलात् न प्रमदितव्यम्।)

उपास्यानि = उप + आस् + यत् प्रत्ययः, नपुंसकलिङ्गम् बहुवचनम्

**सन्धिच्छेदाः**

| | | | |
|---|---|---|---|
| आचार्योऽन्तेवासिनम् | = आचार्यः | + अन्तेवासिनम् | |
| स्वाध्यायान्न | = स्वाध्यायात् | + न | |
| यान्यनवद्यानि | = यानि | + अनवद्यानि | |
| चास्मच्छ्रेयांसः | = च | + अस्मत् | + श्रेयांसः |

**समासाः**

| | |
|---|---|
| मातृदेवः = माता देवः यस्य सः | बहुव्रीहिसमासः |
| स्वाध्यायप्रवचनाभ्याम् = स्वाध्यायः प्रवचनम् च स्वाध्यायप्रवचने, ताभ्याम्, | द्वन्द्वसमासः |
| प्रजातन्तुम् = प्रजानां तन्तुम्, | षष्ठीतत्पुरुषः |
| अनवद्यानि = न अवद्यानि | नञ्तत्पुरुषसमासः |

वर्ण विश्लेषणम् (क) आचार्यः = आ + च् + आ + र् + य् + अः

(ख) प्रियम् = प् + र् + इ + य् + अ + म्

(ग) धर्मम् = ध् + अ + र् + म् + अ + म्

## पाठगतप्रश्नाः 7.1

1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत–

| प्रश्नाः | उत्तराणि |
|---|---|
| (क) वेदम् अनूच्य आचार्यः कम् अनुशास्ति? | ............................................ |
| (ख) आचार्याणां कीदृशानि कर्माणि शिष्येन उपास्यानि? | ............................................ |
| (ग) श्रेयांसः विद्वांसः केन प्रश्वसितव्याः? | ............................................ |
| (घ) कानि कर्माणि शिष्येन सेवितव्यानि? | ............................................ |

(ङ) आचार्यः कम् न छेत्तुं कथयति? ..............................................

(च) कस्यै न प्रमदितव्यम्? ..............................................

2. पाठात् चित्वा क्रियापदानि रिक्तस्थानेषु पूरयत–

(क) सत्यात् न ..............................

(ख) आचार्याय प्रियं धनम् आहृत्य प्रजातन्तुं मा ..............................

(ग) अतिथिदेवो ..............................

(घ) तानि त्वया ..............................

(ङ) तेषां त्वया आसनेन ..............................

(च) धर्मं ..............................

3. उपयुक्तेन पदेन रिक्तस्थानानि पूरयत–

(क) .......... अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति। (वेदम्/पुराणम्/रघुवशंम्)

(ख) शिष्येण आचार्याणां ......................... उपास्यानि। (अवद्यानि/सुचरितानि/सर्वाणि चरितानि)

(ग) आचार्यः .............................. न छेत्तुं कथयति। (प्रजातन्तुं/काष्ठं/रज्जुं)

(घ) श्रेयांसः विद्वांसः ......................... प्रश्वसितव्याः। (धनेन/जलेन/आसनेन)

(ङ) ....................................................न प्रमदितव्यम्। अकुशलात्/सत्यात्/अधर्मात्)

4. निर्दिष्टधातुभिः तव्यत् प्रत्ययप्रयोगेन वाक्यपूर्तिं कुरुत–

(क) कुशलात् न ........................................... । (प्र + मद् + तव्यत्)

(ख) अनवद्यानि कर्माणि ........................................ । (सेव् + तव्यत्)

(ग) आचार्यः सदा ................................. । (उप + आस् + तव्यत्)

(घ) मातृसेवा श्रद्धया ............................ । (कृ + तव्यत्)

(ङ) पिता देवतावत् .......................... । (पूज् + तव्यत्)

(च) श्रेयांसः ब्राह्मणाः ................................. । (प्र + श्वस् + तव्यत्)

## द्वितीयः अंशः

**श्रद्धया देयम् ............................................. चैतदुपास्यम्।**

अत्र पुनः द्वितीयम् अंशम् पठित्वा गुरुणा प्रदत्तान् उपदेशान् बोधामः।

**(क) अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्**

अत्र 'अथ' इति शब्दस्य कोऽर्थः? अथ = एवं वर्तमानस्य अर्थात् अनेन प्रकारेण व्यवहारं कुर्वतः (ते)

कस्मिन् विचिकित्सा स्यात्? कदाचित् तव कर्मविचिकित्सा अर्थात् कार्ये अकार्ये उचिते, अनुचिते च कर्मणि विचिकित्सा, संशयः स्यात्।

वृत्ते विचिकित्सा इत्यस्य कोऽर्थः? वृत्ते = आचारविषये संशयः स्यात् चेत् तदा ....

**(ख) ये तत्र ब्राह्मणाः सम्मर्शिनः युक्ताः आयुक्ताः अलूक्षाः धर्मकामाः स्युः**

तत्र इत्यस्य कोऽर्थः? तस्मिन् देशे काले वा

कीदृशाः ब्राह्मणाः स्युः? सम्मर्शिनः–विचारशीलाः विवेकिनः, सहनशीलाः च ब्राह्मणाः स्युः, युक्ताः = कर्मणि वृत्ते वा पूर्णतः तत्पराः च स्युः। आयुक्ताः = अपरप्रयुक्ताः स्वेच्छया प्रवृत्ताः। अलूक्षाः = अरूक्षाः= अक्रूरमतयः= सरलहृदययुक्ताः विद्वांसः स्युः। अर्थात् यदा कर्मणि व्यवहारे वा कोऽपि संदेहः भवेत् तदा ईदृशाः एव ब्राह्मणाः अनुसरणीयाः।

**(ग) एषा वेदोपनिषत्**

किं वेदोपनिषत्? एतत् सर्वं यत् वर्णितं तत् वेदानां रहस्यम् अस्ति अर्थात् अयं वेदार्थः एव।

**भावार्थः**

दानविषये आचार्यः शिष्यं शिक्षयति यत् दानं सदा श्रद्धया, सम्मानेन, भयेन, लज्जया, सद्भावनया च देयम्। यदि कर्मणि आचरणविषये वा संशयः स्यात् तदा विवेकशीलानां विदुषाम् आचरणम् अनुकरणीयम्। एतत् एव वेदानां रहस्यम्। एतदेव अनुशासनम्।

दान के विषय में बताते हुए आचार्य कहते हैं कि श्रद्धा, सम्मान, लज्जा, डर तथा सद्भावना से दान दो। जीवन में यदि कभी कर्म अथवा आचरण के विषय में संशय हो तो उस देश काल में जो विवेकशील, विचारवान् तथा सरल हृदय वाले विद्वान् हों, वे जैसा व्यवहार करें, तुम भी वैसा ही करो। यह आदेश है। यही वेदों का रहस्य है। यही अनुशासन है, यही आचरण करने योग्य है। इसी प्रकार आचरण करना चाहिए।

## व्याकरणबिन्दवः

नञ्तत्पुरुषसमासः–भवता 'राजते कन्याकुमारी' इति पाठे तत्पुरुषसमासः पठितः। इदानीम् एकम् अन्यं अस्य समासस्य भेदं नञ्तत्पुरुषसमासम् पठामः।

**अभावस्य अर्थे नञ् तत्पुरुषस्य प्रयोगः क्रियते। अस्मिन् पाठे नञ्तत्पुरुषस्य प्रयोगः द्रष्टव्यः–**

अनवद्यानि – न अवद्यानि

अश्रद्धया – न श्रद्धया

अलूक्षाः – न लूक्षाः

**(1) अत्र वयं पश्यामः यत् यदि उत्तरपदे पदारम्भे व्यञ्जनं वर्तते तदा 'न' स्थाने अ वर्णस्य किन्तु यदि उत्तरपदे पदारम्भे स्वरः वर्तते तदा अन् शब्दस्य प्रयोगः क्रियते यथा**

न आगतम् – अनागतम्

न उद्वेगकरम् – अनुद्वेगकरम्

न उपस्थितः – अनुपस्थितः

न ऋतम् – अनृतम्

न विद्या – अविद्या

न सत् – असत्

न ध्रुवम् – अध्रुवम्

न ब्राह्मणः – अब्राह्मणः

**(2) हिन्दीभाषायां** 'चाहिए– इत्यर्थे संस्कृतभाषायां धातुना सह 'तव्यत्' 'यत्' 'अनीयर्' प्रत्ययानां प्रयोगः क्रियते यथा प्र + मद् + तव्यत् = प्रमदितव्यम्, सेव् + तव्यत् = सेवितव्यम्, प्र + श्वस् + तव्यत् = प्रश्वसितव्यम्। उप + अस् + यत् = उपास्यम्, दा + यत् = देयम्, अ + वद् + यत् = अवद्यम्। पठ् + अनीयर् = पठनीयम्, दृश् + अनीयर् = दर्शनीयम्, कृ + अनीयर् = करणीयम्। एतेषां प्रत्ययानां प्रयोगः सदा कर्मवाच्ये भाववाच्ये वा क्रियते। कर्तरि तृतीया कर्मणि प्रथमा क्रिया च कर्मानुसारं भवति यथा मया पुस्तकं पठितव्यम्। त्वया पाठः पठितव्यः। तेन कथा कथयितव्या। भाववाच्ये क्रिया नपुंसकलिङ्गे एकवचने एव भवति यथा मया चलितव्यम्। तैः हसितव्यम्।

(3) संस्कृतव्याकरणे 22 उपसर्गाः सन्ति। उपसर्गाः धातोः प्रारम्भे प्रयुक्ताः तस्य अर्थे परिवर्तनं कुर्वन्ति तथा अस्मिन् पाठे प्र + श्वस् → प्रश्वासः = श्रमापनयः, उप + आस् = उपास् – पूजार्थकं भवति। प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अध अपि अति सु उत् अभि प्रति परि उप–एते प्रादयः।

*"उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।*
*प्रहाराहार–संहार–विहार–परिहारवत्।।"*



पृथक् पृथक् उपसर्गेण सह मूलधातोः अर्थः भिन्नः भवति यथा

| उपसर्गः | धातुः | रूपः | अर्थः |
|---|---|---|---|
| प्र | हा | प्रहारः | आघातः |
| आङ् | हा | आहारः | भोजनम् |
| सम् | हा | संहारः | नाशनम् |
| वि | हा | विहारः | भ्रमणम् |
| परि | हा | परिहारः | समाधानम्, त्यागः |

केषांचित् अव्ययानां प्रयोगः युग्मरूपेण भवति। यथा

(4) यत्र–तत्र, यदा–तदा, यावत्–तावत्, यथा–तथा

**उदाहरणानि**

(i) यत्र धूमः तत्र अग्निः।

(ii) यत्र श्रीकृष्णः तत्र जयः।

(iii) यत्र देवालयः तत्र भक्ताः।

(iv) यथा ते वर्तेरन् तथा वर्तेथाः।

(v) यथा राजा तथा प्रजा।

(vi) यथा कर्म तथा फलम्।

(viii) यदा सूर्यः उदेति तदा अन्धकारः नश्यति।

(ix) यदा गुरुः प्रविशति तदा छात्राः उत्तिष्ठन्ति।

(x) यावत् दीयते तावत् धनस्य सदुपयोगः भवति।

(vii) यदा वसन्तागमनं भवति तदा कोकिलः कूजति।

(xi) यावत् स्थास्यन्ति गिरयः तावत् रामायणकथा प्रचरिष्यति।

(xii) यावत् शरीरं तावत् परोपकारः करणीयः।

**पदपरिचयः**

(क) श्रद्धया = 'श्रद्धा' शब्दः स्त्रीलिंगे तृतीयाविभक्तिः एकवचनम्

श्रिया = 'श्री' शब्दः तृतीयाविभक्तिः एकवचनम्

संविदा = 'संविद्' शब्दः तृतीयाविभक्तिः एकवचनम्

सम्मर्शिनः = 'सम्मर्शिन्' शब्दः प्रथमाविभक्तिः बहुवचनम्

अभ्याख्यातेषु = अभि + आख्यात + सप्तमी विभक्तिः बहुवचनम्

(ख) स्यात् = अस् + विधिलिङ् + प्रथमपुरुषः एकवचनम्

स्युः = अस् + विधिलिङ् + प्रथमपुरुषः बहुवचनम्

वर्तेरन् = वृत् + विधिलिङ् + प्रथमपुरुषः बहुवचनम्

वर्तेथाः = वृत् + विधिलिङ् + मध्यमपुरुषः एकवचनम्

एतानि क्रियापदानि विधिलिङ्प्रयुक्तानि। लोट् लकारे एतेषां रूपाणि एवं भविष्यन्ति–

| **विधिलिङ्** | **लोट्लकारे** |
|---|---|
| स्यात् | अस्तु |
| स्युः | सन्तु |

वर्तेरन् वर्तन्ताम्
वर्तेथाः वर्तस्व

**कृत्प्रत्ययप्रयोगाः**

देयम् = दा + यत् प्रत्ययः, नपुंसकलिंगम्
आयुक्ताः = आ + युज् + क्त, पुल्लिंगम्, प्रथमाविभक्तिः बहुवचनम्
उपास्यम् = उप + आस् + यत्, नपुंसकलिंगम्

**सन्धिच्छेदाः**

अश्रद्धयाऽदेयम् = अश्रद्धया + अदेयम्
अथाभ्याख्यातेषु = अथ + अभ्याख्यातेषु
वेदोपनिषत् = वेद + उपनिषत्
एवमु = एवम् + उ
चैतदुपास्यम् = च + एतत् + उपास्यम्

**समासः**

अश्रद्धया = न श्रद्धया नञ् तत्पुरुषसमासः

**वर्ण–विश्लेषणम्–**

(क) श्रद्धया – श् + र् + अ + द् + ध् + अ + य् + आ
(ख) ह्रिया – ह् + र् + इ + य् + आ
(ग) अलूक्षाः – अ + ल् + ऊ + क् + ष् + आः

## पाठगतप्रश्नाः 7.2

1. कोष्ठकेषु दत्तानां समानार्थद्योतकपदानि मूलपाठात् चित्वा वाक्यपूर्तिं कुरुत–

यथा (क) संविदा (सद्भावनया) देयम्।

(ख) ये तत्र ब्राह्मणाः ............................ (विचारशीलाः) स्युः।

(ग) एषा .................................... (वेदानां रहस्यम्)।

(घ) ये ................................. (अरूक्षाः) धर्मकामाः स्युः।

(ङ) यदि ते .................................... (कार्ये–अकार्ये संशयः) स्यात्।

(च) ............................ (लज्जया) देयम्।







2. विशेषणं निर्दिशत–

| | विशेषणम् |
|---|---|
| (क) श्रेयांसः ब्राह्मणाः | (क) ................................... |
| (ख) ब्राह्मणाः सम्मर्शिनः | (ख) ................................... |
| (ग) विद्वांसः धर्मकामाः | (ग) ................................... |
| (घ) कर्माणि अनवद्यानि | (घ) ................................... |
| (ङ) प्रियं धनम् | (ङ) ................................... |
| (च) अलूक्षाः ब्राह्मणाः | (च) ................................... |

3. लोट् लकारे विधिलिङ् लकारे च प्रयुक्तानि क्रियापदानि पृथक्–पृथक् कृत्वा लिखत

| | लोट् लकारे | विधिलिङ् लकारे |
|---|---|---|
| (क) सत्यं वद। | .......................... | .............................. |
| (ख) प्रजातन्तुं मा व्यवच्छेत्सीः। | .......................... | .............................. |
| (ग) यथा ते वर्तेरन्। | .......................... | .............................. |
| (घ) मातृदेवो भव। | .......................... | .............................. |
| (ङ) ये तत्र ब्राह्मणाः सम्मर्शिनः स्युः। | .......................... | .............................. |
| (च) आचार्यदेवो भव। | .......................... | .............................. |

## 7.4 किम् अधिगतम्

अध्ययनस्य समाप्तौः छात्रः जीवनोपयोगिनम् उपदेशं गृह्णाति यथा–

1. सत्यमेव जीवनस्य आधारशिला।
2. धर्मात्, कुशलात्, भूत्यै, स्वाध्यायप्रवचनाभ्यां देवपितृकार्याभ्यां न प्रमदितव्यम्।
3. माता, पिता, आचार्यः, अतिथिः च देवतुल्याः सन्ति।
4. श्रेयांसः विद्वांसः एव सम्माननीयाः।
5. यदि कर्मणि आचरणे वा संशयः स्यात् तर्हि सम्मर्शिणां विदुषां समीपे गन्तव्यम्।
6. आचार्यस्य उपदेशाः उपासितव्याः।
7. अभावस्य योगे नञ् तत्पुरुषस्य प्रयोगः भवति।
8. तव्यत्, यत्, ल्यप् प्रत्ययानां धातुषु प्रयोगः।

9. यत्र–तत्र, यदा–तदा यथा–तथा, यावत्–तावत् युग्म–अव्ययानां वाक्येषु प्रयोगः भवति।

10. पदेषु वर्णानां विश्लेषणं क्रियते।

## 7.5 योग्यताविस्तारः

### (क) ग्रन्थपरिचयः

प्रसिद्धेषु उपनिषद्ग्रन्थेषु तैत्तिरीयोपनिषद् एका प्रसिद्धा उपनिषद् अस्ति।

'उपनिषद्' इति शब्दस्य व्युत्पत्तिः एवम् अस्ति– 'उप+ नि+ सद् – गत्यवसानेषु'। अर्थात् सा विद्या या सांसारिकप्रपंचान् नाशयति यस्याः माध्यमेन ज्ञानस्य उपलब्धिः भवति सा विद्या एव उपनिषत्सु वर्तते। सद् धातोः अर्थः स्था – तिष्ठ् अपि भवति। अतः यदा शिष्यः गुरोः समीपं विनयीभूत्वा श्रद्धया तिष्ठति तदा गुरुः ब्रह्मविषये यत्किंचित् उपदिशति तत् ज्ञानं रहस्यं वा उपनिषद् कथ्यते।

शंकराचार्येण कथितम् यत् इमां ब्रह्मविद्याम् उपनयन्ति आत्मभावेन श्रद्धाभक्तिपुरस्सरं सन्तः इति उपनिषद्।

उपनिषदां संख्या असीमिता किन्तु ईश, केन, कठ, प्रश्न, मुण्डक, माण्डूक्य, तैत्तिरीय, ऐतरेय, छान्दोग्य, बृहदारण्यक, श्वेताश्वतर इति एकादश– उपनिषदां एव विशिष्टं महत्त्वं वर्तते।

भारतीयतत्त्वज्ञानस्य धर्मसिद्धान्तस्य च मूलाधाररूपेण उपनिषद्ग्रंथाः एव वर्तन्ते। भारतीयसंस्कृत्याः उपनिषदां च परस्परम् घनिष्ठः सम्बन्धः अस्ति। विदेशेषु अपि उपनिषदां प्रशंसकाः सन्ति। सप्तदशे शतके दाराशिकोहमहोदयेन, नवदशे शतके जर्मनस्य शोपेनहावरमहोदयेन महाकविगेटे–महोदयेन च उपनिषदां महती प्रशंसा कृता।

### (ख) भावविस्तारः

समानभावपरकाः सूक्तयः

1. यं मातापितरौ क्लेशं सहेते संभवे नृणाम्।
   न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि।
2. माता गुरुतरा भूमेः खात् पितोच्चतरस्तथा।
3. अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
   अश्वमेधसहस्राद् हि सत्यमेव विशिष्यते।।
4. सत्येव जयते नानृतम्।
5. अध्येतव्या त्रयी नित्यं, भवितव्यं विपश्चिता।

6. आतिथेयं परं तीर्थम्।
7. धर्मो रक्षति रक्षितः।
8. यतोऽभ्युदयनिःश्रेयस्सिद्धिः स धर्मः।
9. किं कर्म किमकर्मेति कवयोऽप्यत्रमोहिताः।

**(ग) भाषाविस्तारः**

आज्ञार्थे लोट्लकारस्य प्रयोगः क्रियते विधिलिङ्लकारस्य च प्रयोगः इच्छा–निमन्त्रण–प्रार्थनार्थे क्रियते। तत्र भेदं पश्यत।

**धातुरूपाणि**

| | | लोट् लकारः | | | विधिलिङ् लकारः | | |
|---|---|---|---|---|---|---|---|
| धातु | पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| वद् (बोलना) | प्रथमः | वदतु | वदताम् | वदन्तु | वदेत् | वदेताम् | वदेयुः |
| अस् (होना) | प्रथमः | अस्तु | स्ताम् | सन्तु | स्यात् | स्याताम् | स्युः |
| चर् (आचरण करना) | प्रथमः | चरतु | चरताम् | चरन्तु | चरेत् | चरेताम् | चरेयुः |
| भू (होना) | प्रथमः | भवतु | भवताम् | भवन्तु | भवेत् | भवेताम् | भवेयुः |
| वृत् (होना) | प्रथमः | वर्तताम् | वर्तेताम् | वर्तन्ताम् | वर्तेत | वर्तेयाताम् | वर्तेरन् |
| वद् | मध्यमः | वद | वदतम् | वदत | वदेः | वदेतम् | वदेत |
| अस् | मध्यमः | एधि | स्तम् | स्त | स्याः | स्यातम् | स्यात् |
| भू | मध्यमः | भव | भवतम् | भवत | भवेः | भवेतम् | भवेत |
| वृत् | मध्यमः | वर्तस्व | वर्तेथाम् | वर्तध्वम् | वर्तेथाः | वर्तेयाथाम् | वर्तेध्वम् |
| वद् | उत्तमः | वदानि | वदाव | वदाम | वदेयम् | वदेव | वदेम |
| अस् | उत्तमः | असानि | असाव | असाम | स्याम् | स्याव | स्याम |
| चर् | उत्तमः | चराणि | चराव | चराम | चरेयम् | चरेव | चरेम |
| भू | उत्तमः | भवानि | भवाव | भवाम | भवेयम् | भवेव | भवेम |
| वृत् | उत्तमः | वर्ते | वर्तावहै | वर्तामहै | वर्तेय | वर्तेवहि | वर्तेमहि |

**उदाहरणानि**

**लोट्लकारः**

सत्यं वद।

अतिथिदेवो भव।

सर्वे छात्राः तिष्ठन्तु।

आचार्याय जलम् आनय।

यूयम् फलानि खादत।

**विधिलिङ् लकारः**

आचार्याः अलूक्षा स्युः।

यथा ते वर्तेरन् तथा वर्तेथाः।

ईश्वरः तव रक्षकः भवेत्।

सर्वप्राणिषु बन्धुभूतः स्यात्।

भवन्तः उत्तीर्णाः भवेयुः।

## 7.6 पाठान्तप्रश्नाः

1. रेखांकितपदम् आधृत्य प्रश्ननिर्माणं कुरुत–
   (क) वेदम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति।
   (ख) आचार्यः प्रजातन्तुं न छेत्तुं कथयति।
   (ग) धर्मात् न प्रमदितव्यम्।
   (घ) श्रेयांसः विद्वांसः आसनेन प्रश्वसितव्याः।
   (ङ) भूत्यै न प्रमदितव्यम्।
2. रेखांकितेषु पदेषु सर्वनामपदानि केभ्यः प्रयुक्तानि–
   (क) त्वया कुशलात् न प्रमदितव्यम्।
   (ख) ये अस्मत् श्रेयांसः ब्राह्मणाः तेषां त्वया आसनेन प्रश्वसितव्यम्।
   (ग) यानि अस्माकं सुचरितानि तानि उपास्यानि।
3. समस्तपदानि रचयत–
   (क) न लूक्षाः इति --------------------
   (ख) न श्रद्धया इति --------------------
   (ग) न अवद्यानि इति --------------------
   (घ) स्वाध्यायात् प्रवचनात् च ताभ्याम् --------------------
   (ङ) माता देवः यस्य सः --------------------
   (च) प्रजायाः तन्तुम् --------------------
4. अधोलिखितेषु वाक्येषु रेखांकितपदं विलोमपदे परिवर्त्य लिखत

| | |
|---|---|
| (क) असत्यात् प्रमदितव्यम् | (1) .............................. प्रमदितव्यम्। |
| (ख) अश्रद्धया न देयम् | (2) .............................. देयम्। |
| (ग) यानि अवद्यानि कर्माणि तानि न सेवितव्यानि। | (3) यानि ................. कर्माणि तानि सेवितव्यानि। |
| (घ) यानि अस्माकं कुचरितानि तानि त्वया न उपास्यानि। | (4) यानि अस्माकं ...................... तानि त्वया उपास्यानि। |
| (ङ) आचार्याः लूक्षाः न स्युः | (5) आचार्याः ......................... स्युः। |
| (च) अधर्मं मा चर | (6) ...................... चर। |

5. संक्षेपेण उत्तरत–

(क) ''एतद् उपास्यम्'' इति पाठे उपदेशाः केन कस्मै प्रदत्ताः?

(ख) दानं कथं देयम् कथं च न देयम्?

(ग) यदि कदाचित् कर्मणि आचरणे च सन्देहः भवति तदा किं कुर्यात्?

(घ) गुरुजनानां कानि चरितानि अनुकरणीयानि?

6. उचितम् अव्ययं चित्वा अधोलिखितानि वाक्यानि पूर्यन्ताम्

मा, न, च, अथ, यदि, वा, यथा, तथा, तत्र

(क) चिन्ता ...................... कार्या, बालकः पित्रा सह बहिर्गतः।

(ख) असत्यं .......................... वद।

(ग) रमा सीता .......................... विद्यालयं गच्छतः।

(घ) ........................... महाभारतकथा प्रारभ्यते।

(ङ) ......................... ते वर्तेरन् ............................. वर्तेथाः।

(च) भवान् चायं पास्यति दुग्धं ......................................।

(छ) विद्यालये एकं क्रीडास्थलं वर्तते, छात्राः ........................... क्रीडन्ति।

(ज) ................................ पठिष्यसि तर्हि उत्तीर्णः भविष्यसि।

7. पदानां वर्णविश्लेषणं कुरुत

(क) धर्मम् (ख) प्रमदः (ग) श्रिया (घ) युक्ताः

## 7.7 उत्तराणि

**7.3 बोध प्रश्नाः**

1. (क) + 2, (ख) + 4, (ग) + 5,
   (घ) + 3, (ङ) + 6, (च) + 1

2. शिष्यम् 3. सुचरितानि 4. अश्रद्धया

5. (क) मा (ख) तानि (ग) देयम् (घ) एषः (ङ) प्रमदितव्यम् (च) नो

**पाठगतप्रश्नाः**

**7.1** 1. (क) अन्तेवासिनम् (ख) सुचरितानि (ग) आसनेन (घ) अनवद्यानि (ङ) प्रजातन्तुम् (च) भूत्यै

2. (क) प्रमदितव्यम् (ख) व्यवच्छेत्सीः (ग) भव (घ) उपास्यानि (ङ) प्रश्वसितव्यम् (च) चर

3. (क) वेदम् (ख) सुचरितानि (ग) प्रजातन्तुं (घ) आसनेन (ङ) सत्यात्
4. (क) प्रमदितव्यम् (ख) सेवितव्यानि (ग) उपासितव्यः (घ) कर्तव्या
(ङ) पूजयितव्यः (च) प्रश्वसितव्याः

7.2 1. (क) संविदा (ख) सम्मर्शिनः (ग) वेदोपनिषत्
(घ) अलूक्षाः (ङ) कर्मविचिकित्सा (च) ह्रिया
2. (क) श्रेयांसः (ख) सम्मर्शिनः (ग) धर्मकामाः
(घ) अनवद्यानि (ङ) प्रियं (च) अलूक्षाः

3.

| **लोट् लकारे क्रियापदानि** | **विधिलिङ् लकारे क्रियापदानि** |
|---|---|
| सत्यं वद | प्रजातन्तुं मा व्यवच्छेत्सीः |
| मातृदेवो भव | यथा ते वर्तेरन् |
| आचार्यदेवो भव | ये तत्र ब्राह्मणाः सम्मर्शिनः स्युः |

**7.6 पाठान्तप्रश्नाः**

(क) कः, (ख) किम्/कम् (ग) कस्मात् (घ) केन (ङ) कस्यै
2. (क) अन्तेवासिने (ख) श्रेयोभ्यः ब्राह्मणेभ्यः (ग) गुरुवर्येभ्यः
3. (क) अलूक्षाः (ख) अश्रद्धया (ग) अनवद्यानि (घ) स्वाध्यायप्रवचनाभ्याम्
(ङ) मातृदेवः (च) प्रजातन्तुम्
4. (क) सत्यात् (ख) श्रद्धया (ग) अनवद्यानि (घ) सुचरितानि (ङ) अलूक्षाः (च) धर्मम्
5. (क) 'एतद् उपास्यम्' इति पाठे उपदेशाः आचार्येण शिष्याम दत्ताः।
(ख) दानं श्रद्धया देयम् अश्रद्धया च न देयम्।
(ग) कर्मणि आचरणे च सन्देहे सति ब्राह्मणा सम्मर्शिनः स्युः।
(घ) गुरुजनानां सुचरितानि अनुकरणीयानि।
6. (क) न (ख) मा (ग) च (घ) अथ (ङ) यथा, तथा (च) वा (छ) तत्र (ज) यदि
7. (क) ध् + अ + र् + म् + अ + म्
(ख) प् + र् + अ + म् + अ + द् + अः
(ग) श् + र् + इ + य् + आ
(घ) य् + उ + क् + त् + आः

# 8

# परार्थे आत्मोत्सर्गः

मार्गे यदि भवान् कमपि जनं जीवं वा संकटे पश्यति तर्हि भवतः मनः करुणया द्रवितं जायते। अपि च यदि भवान् कारुणिकः अस्ति तर्हि तु तस्य सहायतामपि करोति। वस्तुतः परोपकाराय सतां विभूतयः। मानवजीवने परोपकारस्य अतिमहत्वमस्ति। अयं गुणः मानवान् पशुभ्यः पृथक् करोति। प्रस्तुतपाठे विक्रमादित्यस्य परोपकारभावनायाः विषये उल्लेखः अस्ति। एकदा राज्ये भ्रमन् विक्रमादित्यः एकेन पक्षिमाध्यमेन कस्यचिद् राक्षसस्य नृशंसतां ब्राह्मणस्य विवशतां च अशृणोत्। सः तस्य कष्टानि वारणार्थम् आत्मोत्सर्गं कृत्वा प्रजानां कल्याणम् अकरोत्। जीवने विषमपरिस्थितिषु 'किं करणीयम् किं च न करणीयम् इति विषये अस्याम् कथायाम् वयम् पठामः।


## उद्देश्यानि

इमं पाठं पठित्वा भवान्


- कथासारं लेखितुं समर्थः भविष्यति;
- विक्रमादित्यस्य चरित्र–चित्रणं स्वशब्दैः कर्तुं शक्तः भविष्यति;
- भिन्नक्रमेण दत्तानि वाक्यानि घटनाक्रमानुसारं योजयिष्यति;
- आत्मोत्सर्गस्य महत्त्वं वर्णयितुं शक्ष्यति;
- मानवीयमूल्यानां विषयमधिकृत्य सम्बद्धसूक्तीनाम् संचयनं कर्तुं सक्षमः भविष्यति;
- नकारान्तपुल्लिंगशब्दानां रूपाणि चेतुं शक्तः भविष्यति;
- वाच्यपरिवर्तनं कृत्वा भावं प्रेषयितुम् समर्थः भविष्यति;
- वृद्धिसन्धियुक्तानां पदानां सन्धिच्छेदं करिष्यति;
- वर्ण–संश्लेषणेन पदनिर्माणं करिष्यति;
- प्रातिपदिक–शब्दानां चयनं करिष्यति।

## क्रियाकलापः


एतानि चित्राणि ध्यानेन पश्यत–



8.1



8.2



8.3

चित्राणि दृष्ट्वा प्रदत्तशब्दानां साहाय्येन कथापूर्तिः कर्त्तव्याः (परोपकारार्थं, शिविः, स्वमांसं, कपोतं, शरणम्)

1. पुरा ―――――――― नाम राजा बभूव।
2. एकदा एकः बुभुक्षितः श्येनः ―――――――― हन्तुम् उद्यतः आसीत्।
3. भीतः कपोतः राज्ञः ―――――――― आगतः।
4. राजा शिविः कपोतप्राणरक्षार्थं ――――――――श्येनाय अयच्छत्।
5. शिविना ――――――――स्वशरीरं समर्पितम्।



टिप्पणी

## 8.1 मूलपाठः

### परार्थे आत्मोत्सर्गः

इदानीम् वयम् एतादृशीम् एव कथां ध्यानेन पठामः।

अथ भोजे सिंहासनम् आरोढुम् प्रवृत्ते सति अन्या पुत्तलिका कथयति–भो राजन् श्रूयताम्–विक्रमस्य राज्ये कोऽपि जनः पिशुनः तस्करः पापकर्मनिरतः च नासीत्। एकदा स राज्यभारं मन्त्रिषु निधाय स्वयं योगिवेशेन देशान्तरं निर्गतः। एवं पर्यटन् स एकस्मिन् दिवसे यदा महारण्यमध्ये प्राविशत् तदा सूर्यः अस्तंगतः। स राजा एकस्य वृक्षस्य मूलम् आश्रित्य रात्रौ स्थितः। तस्य वृक्षस्योपरि एकः चिरंजीवी नामकः खगः अन्यैः पक्षिभिः सह संलापं करोति स्म। राजाऽपि वृक्षमूले स्थितः तं संलापं शृणोति। भो पुत्राः! युष्माभिः नानादेशान् पर्यटद्भिः किं विचित्रम् दृष्टम्? तत्र एकेन पक्षिणा भणितम्– मया यत् दृष्टम् तमवलोक्य मम चेतसि महद्दुःखम् भवति। चिरंजीविना उक्तम् तत्कथय किं निमित्तं दुःखम्? तेनोक्तम्–केवलं कथनेन किं भवति। वृद्धेनोक्तम्–''भो पुत्र! यो दुःखी, स सुहृदि दुःखं निवेद्य सुखी भवति।''

तस्य वाक्यं श्रुत्वा स पक्षी दुःखकारणं कथयति– भो तात! श्रूयताम्। अस्ति उत्तरदेशे शैवालघोषो नाम पर्वतः। तस्य पर्वतस्य निकटे पलाशनगरमस्ति। तस्मिन् पर्वते स्थितः कश्चिद् राक्षसः प्रतिदिनं नगरमागत्य सम्मुखायातं यं कंचन मानुषं स्त्रियं वा बालकादिकं वा पर्वतं नीत्वा भक्षयति। एकदा स नगरवासिभिर्जनैरुक्तः– भो वकासुर! त्वं यथेच्छं सम्मुखपतितं यं कमेव मा भक्षय। वयं तुभ्यं प्रतिदिनमाहारार्थमेकं मानवं दास्यामः। तद्वचः तेनांगीकृतम्।

तदनन्तरं तत्रत्यो जनः प्रतिदिनं गृहक्रमेणैकैकं मानुषं तस्मै प्रयच्छति। एवं महान् कालो गतः। अद्य पूर्वजन्मनि स×जातसौहार्दस्य मम मित्रस्य कस्यचिद् ब्राह्मणस्य वारः समायातः। तस्यैकः एव पुत्रः। पुत्रं ददाति चेत् सन्ततिच्छेदो भवति। आत्मानं प्रयच्छति चेत् भार्या विधवा भविष्यति। वैधव्यं पुनर्महादुःखम् पत्नीं दास्यति चेत् आश्रमभ्रंशो भवति। तेषां दुःखेनाहं महादुःखी इति मम महद्दुःखकारणम्।

**शब्दार्थाः**

अथ = मंगल, प्रारम्भ इसके बाद
आरोढुम् = चढने के लिए
प्रवृत्ते सति = लगे होने पर
पुत्तलिका = पुतली, गुड़िया
पिशुनः = चुगलखोर
तस्करः = चोर डाकू
निरतः = संलग्न
निधाय = रखकर
निर्गतः = चला गया
देशान्तरं = दूसरे देश में
महारण्यमध्ये = विशाल जंगल में
संलापम् = वार्तालाप को
भणितम् = कहा
निमित्तं = कारण से
सुहृदि = मित्र पर
निवेद्य = कहकर, निवेदन कर,
शैवालघोषः = शैवालघोष नामक पर्वत
पलाशनगरम् = पलाशनगर नामक नगर
कश्चिद् = कोई
आयातं = आते हुए को
कंचन = किसी को
मानुषं = मनुष्य को
नीत्वा = लाकर
वकासुरः = वकासुर नामक राक्षस
सम्मुखपतितं = सामने पड़े/गिरे हुए को
अंगीकृतम् = स्वीकार कर लिया गया
तदनन्तरम् = उसके बाद
तत्रत्यः = वहाँ रहने वाले
सन्ततिच्छेदः = वंशनाश
आश्रमभ्रंशः = गृहस्थाश्रम का नाश
तत्रस्थैः = वहाँ के
प्रयच्छति = देता है,
आत्मनं = स्वयं को
वारः = क्रम
समायातः = आया
चेत् = यदि
भार्या = पत्नी



तस्य वचनं श्रुत्वा तत्रस्थैः पक्षिभिर्भणितम्– अहो, अयमेव सुहृत्, य सुहृदो दुःखेन स्वयं दुःखी भवति। एतदेव मित्रत्वम्, उक्तंच–

सुखिते सुखी सुहृदि यो दुःखिते दुःखी स च बन्धुर्भवति।

पक्षिणो वचः श्रुत्वा राजा तत्र नगरे वध्यशिला–समीपे गतः। तत्र ब्राह्मणं निरीक्ष्य, अभयं दत्वा, स्वगृहं सम्प्रेष्य च, तत्समीपस्थे सरोवरे स्नात्वा वध्यशिलायामुपविष्टः।

तस्मिन् समये राक्षसः समागत्य प्रसन्नवदनं पुरूषं दृष्ट्वा विस्मितस्तं वदति– भो महासत्व! अत्र शिलायां प्रतिदिनं य उपविशति, स मदागमनात्पूर्वमेव म्रियते। त्वं पुनः महाधैर्यसम्पन्नः प्रसन्नवदनः दृश्यसे। यस्य मरणकालः समायाति, तस्येन्द्रियाणि ग्लानिं प्राप्नुवन्ति। त्वं पुनरधिकां कान्तिं प्राप्य प्रहससि! तर्हि कथय को भवान्? राजा भणति– मया परार्थमेतच्छरीरं दीयते स्वेच्छया, अतो न मे कापि ग्लानिः। यद् भवतु। किमनेन विचारेण तव? त्वमात्मनः मनोरथं पूरय।

तदा राक्षसेन स्वमनसि विचारितम्– अहो साधुरयं यः आत्मनः सुखभोगेच्छां विहाय परदुःखेन दुःखी भूत्वा अत्र आगतः। उक्तं च–

त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्वसुखैषिणः।

भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः।।

एवं विचार्य स राजानमब्रवीत् भो महापुरूष! त्वं सर्वस्यार्तिहरो गुरूः, यतस्त्वं विश्वस्यार्तिं परिहरसि। परार्थं शरीरं प्रयच्छतस्तवैव एतच्छरीरं श्लाध्यम्। भो महाभाग। अनेनैव परोपकारेण त्वं सर्वाः सम्पदः प्राप्नोषि। यदुक्तम्–

परोपकारव्यापारः पुरूषो यः प्रजायते।

सम्पदः स समाप्नोति परत्रापि परं पदम्।।

एवं भणित्वा पुनरपि राजानमब्रवीत्–भो महासत्व! तवाहं तुष्टोऽस्मि। वरं वृणीष्व। राज्ञोक्तम्–भो राक्षस! त्वं यदि मयि प्रसन्नोऽसि, तर्हि अद्य प्रभृति मनुष्यभक्षणं परित्यज। यथा मनुष्यस्य आत्मनः प्राणाः प्रियाः तथैव सर्वेषाम् जीवानां प्राणाः प्रियाः भवन्ति। अतः सर्वेषाम् प्राणिनां रक्षा करणीया। तदाप्रभृति राक्षसः जीवहिंसां त्यक्तवान्। राजा च स्वनगरीम् अगच्छत्।

इमां कथां कथयित्वा पुत्तलिका भोजराजं प्रति अब्रवीत्– 'त्वयि एवं परोपकारादयः गुणाः विद्यन्ते चेत् तर्हि अस्मिन् सिंहासने समुपविश'। राजा तूष्णीमासीत्।

सुखिते = सुखी होने पर
दुःखिते = दुःखी होने पर
निरीक्ष्य = देखकर
अभयं = भय से मुक्ति को
सम्प्रेष्य = भेजकर
सरोवरे = तालाब में
उपविष्टः = बैठ गए
समागत्य = आकर
विस्मितः = आश्चर्यचकित
म्रियते = मर जाता है।
वदनः = मुख
कान्तिं = आभा को
प्रहससि = जोरसे हँसते हो
ग्लानिं = मलिनता को, दुःख को
समायाति = आ जाता है।
मनसि = मन में
साधु = सज्जन
विहाय = छोड़कर
भूत्वा = होकर
सुखैषिणः = सुख चाहने वाले
सर्वास्यर्तिहरः = सभी के दुःखो को हरने वाले।
विश्वास्यार्तिं = संसार के दुःखों को
परिहरसि = दूर करते हो
प्रयच्छ = दो
श्लाघ्याम् = प्रशंसनीय
परोपकारव्यापारः = परोपकारी
समाप्नोति = प्राप्तकरता है।
परत्रापि = परलोक में भी
परं पदम् = श्रेष्ठ स्थान को
वरं = वरदान को
वृणीष्व = चुनो
अद्यप्रभृति = आज से
परित्यज = छोड़ दो
तदाप्रभृति = तब से
समुपविश = बैठो।

## 8.2 बोधप्रश्नाः

1. पाठं पठित्वा अधोदत्तान् प्रश्नान् एकशब्देन उत्तरत–
   (क) राजा रात्रौ कुत्र स्थितः?
   (ख) सिंहासनम् आरोढुं कः प्रवृत्तः?
   (ग) सम्मुखम् आयातं जनं कः भक्षयति स्म?
   (घ) सर्वां कथां का श्रावयति?
2. अधोलिखितं केन उक्तम्? तस्य नाम चिनुत।
   (क) भो पुत्र! यो दुःखी, स सुहृदि दुःखं निवेद्य सुखी भवति। (पक्षी/ वृद्धः)
   (ख) अयमेव सुहृत् य सुहृदो भूत्वा दुःखेन स्वयं दुःखी भवति। (पक्षिणः/जनाः)
   (ग) कथय, को भवान्? (राजा/राक्षसः)
   (घ) त्वम् आत्मनः मनोरथं पूरय। (ब्राह्मणः/राजा)
   (ङ) सर्वेषां प्राणिनां रक्षा करणीया। (राजा/पुत्तलिका)
3. अर्थमेलनं कुरुत

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| (क) भणित्वा | (i) आयातम् |
| (ख) अवदत् | (ii) भोजनाय |
| (ग) आगतम् | (iii) उक्त्वा |
| (घ) खगः | (iv) सुहृत् |
| (ङ) आहारार्थम् | (v) पक्षी |
| (च) मित्रम् | (vi) अब्रवीत् |

## 8.3 अधुना अवगच्छामः


### प्रथमः अंशः

**अथ भोजे सिंहासनम् ............... दुःखं निवेद्य सुखी भवति।**

पुत्तलिकया राजानं प्रति श्रावितां कथां पुनः पठामः बोधामः च यत् दुःखी जनः अपि मित्रं प्रति निजं दुःखं कथयित्वा सुखी भवति।

कः सिंहासनम् आरोढुम् प्रवर्तते? राजा भोजः।

का कथाम् श्रावयति? पुत्तलिका।





विक्रमादित्यस्य राज्ये जनाः कीदृशाः न आसन्? पिशुनाः, तस्कराः, पापकर्मनिरताः च।

राजा कीदृशं वेशं धृत्वा देशान्तरं निर्गतः? योगिवेशम् धृत्वा।

राजा कदा वृक्षस्यमूलम् आश्रयत्? रात्रौ।

कः पक्षिभिः सह संलापं करोति स्म?चिरंजीवी नामकः खगः।

राजा रात्रौ किम् अशृणोत्? संलापम् अशृणोत्।

खगः संलापे किम् कथयति? संलापे विचित्रता–विषये कथयति।

दुःखस्य कारणम् कः पृच्छति? चिरंजीवी नामकः खगः।

दुःखी जनः कथं सुखी भवति? मित्रे दुःखम् निवेद्य जनः सुखी भवति। यथोक्तं च अभिज्ञानशाकुन्तले–''संविभक्तं हि दुःखं सह्यवेदनं भवति।

**सारः**

एकदा राजा भोजः विक्रमादित्यस्य सिंहासने उपविशति। तदा सिंहासने संलग्ना पुत्तलिका कथाम् श्रावयन्ती कथयति यत् एकदा राजा विक्रमः वनं गच्छति। तस्मिन् वने सः खगानां वार्तालापं शृणोति। दिने खगः यत् आश्चर्यम् पश्यति तद् दृष्ट्वा दुःखी भवति। खगानां पिता, चिरंजीवी, दुःखनिदानस्य उपायं कथयति– ''दुःखी जनः सुहृदि दुःखं निवेद्य सुखी भवति।''

(राजा भोज विक्रमादित्य के सिंहासन पर चढ़ने को प्रवृत्त होते हैं। तभी सिंहासन में लगी पुत्तलिका एक कथा सुनाती है कि एक बार राजा विक्रमादित्य घूमते हुए जंगल गए। वहाँ पक्षियों का वार्तालाप सुना जिसमें एक पक्षी अपने पिता से एक आश्चर्य के विषय में बताकर दुःखी होता है। उसके पिता चिरंजीवी दुःख निवारण का उपाय बताते हैं कि मनुष्य मित्रों के साथ यदि दुःख बांटे तो उसका दुख कम हो जाता है और वह सुखी हो सकता है।)

## व्याकरण बिन्दवः

### 1. नकारान्त पुल्लिङ्गशब्दयोः रूपाणि

| | राजन् शब्द | | | आत्मन् शब्द | | |
|---|---|---|---|---|---|---|
| | एकवचनम् | द्विवचनम् | बहुवचनम् | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा वि. | राजा | राजानौ | राजानः | आत्मा | आत्मानौ | आत्मानः |
| द्वितीया वि. | राजानम् | राजानौ | राज्ञः | आत्मानम् | आत्मानौ | आत्मनः |
| तृतीया वि. | राज्ञा | राजभ्याम् | राजभिः | आत्मना | अत्मभ्याम् | आत्मभिः |
| चतुर्थी वि. | राज्ञे | राजभ्याम् | राजभ्यः | आत्मने | आत्मभ्याम् | आत्मभ्यः |
| प×चमी वि. | राज्ञः | राजभ्याम् | राजभ्यः | आत्मनः | आत्मभ्याम् | आत्मभ्यः |
| षष्ठी वि. | राज्ञः | राज्ञोः | राज्ञाम् | आत्मनः | आत्मनोः | आत्मनाम् |
| सप्तमी वि. | राज्ञि | राज्ञोः | राजसु | आत्मनि | आत्मनोः | आत्मसु |
| सम्बोधनम् | हे राजन् | हे राजानौ | हे राजानः | हे आत्मन् | हे आत्मानौ | हे आत्मानः |



टिप्पणी

**2. वर्णसंश्लेषणम्**

वर्णानाम् संश्लेषणेन पदनिर्माणं भवति। वर्ण–विश्लेषणस्य विषये भवन्तः सप्तमे पाठे पठितवन्तः एव। अत्र वयं वर्ण–संश्लेषणेन पदनिर्माणं कुर्मः।

(क) प् + अ + र् + आ + र् + थ् + ए = परार्थे

(ख) प् + र् + अ + व् + ऋ + त् + त् + ए = प्रवृत्ते

(ग) श् + र् + ऊ + य् + अ + त् + आ + म् = श्रूयताम्

(घ) स् + ऊ + र् + य् + अः = सूर्यः

(ङ) व् + ऋ + क् + ष् + अ + स् + य् + अ = वृक्षस्य

(च) द् + ऋ + ष् + ट् + अ + म् = दृष्टम्

(छ) भ् + अ + व् + अ + त् + इ = भवति

**3. प्रातिपदिकम्**– धातुं प्रत्ययं च वर्जयित्वा कोऽपि अर्थवान् शब्दः 'प्रतिपादिकम्' कथ्यते। यदा प्रातिपदिकम् विभक्तियुक्तं भवति तदा तस्य वाक्ये प्रयोगः क्रियते। राम–वृक्ष–पुष्प, सिंह, वानर, नर, छात्र, ग्रन्थ दिल्ली, गङ्गा आदयः शब्दाः प्रातिप्रदिकानि एव।

**वाक्येषुप्रयोगः**

(क) रामः मातरं नमति।
(ख) वृक्षे फलानि सन्ति।
(ग) पुष्पेषु कमलं प्रसिद्धम्।
(घ) सिंहः गर्जति।
(ङ) गङ्गायाः जलम् अमृतम्।


## पाठगतप्रश्नाः 8.1

1. एकपदेन उत्तरत

(क) भोजे सिंहासनम् आरोढुं प्रवृत्ते सति का कथां कथयति?

(ख) कस्य राज्ये कोऽपि जनः पापकर्मनिरतः नासीत्?

(ग) राजा भोजः केषु राज्यभारं निधाय देशान्तरं निर्गतः?





(घ) अन्यैः खगैः सह कः संलापं करोति स्म?

(ङ) खगानां संलापं कः श्रृणोति स्म?

2. सन्धिं सन्धिच्छेदं वा कृत्वा रिक्तस्थानानि पूरयत–

(क) वृक्षस्य + उपरि = ––––––––

(ख) चिरंजीविना + –––––––– = चिरंजीविनोक्तम्

(ग) –––––– + एकेन = तत्रैकेन

(घ) सूर्यः + अस्तंगतः = –––––––

(ङ) –––––––– + तम् = स्थितस्तम्

3. धातुभिः रिक्तस्थानानि पूरयत

(क) गतः = गम् + क्त

(ख स्थितः = –––––– + क्त

(ग) दृष्टम् = ––––––– + क्त

(घ) भणितम् = –––––– + क्त

(ङ) उक्तम् = –––––– + क्त

## द्वितीयः अंशः

सम्प्रति कथायाः द्वितीयांशं अवगन्तुम् अधोलिखितानि प्रश्नोत्तराणि पठामः।

**तस्य वाक्यं श्रुत्वा ............... त्वमात्मनः मनोरथं पूरय।**

कः दुःखस्य कारणम् कथयति? पक्षी।

शैवालघोषो नाम पर्वतः कुत्र अस्ति? उत्तरदेशे।

तत्पर्वतनिकटे किम् नाम नगरम् अस्ति? पलाशनगरम्।

पर्वते कः निवसति? एकः वकासुरः नाम राक्षसः।

राक्षसः कीदृशं अत्याचारं करोति? राक्षसः नगरमागत्य मानुषं स्त्रियं वा गृहीत्वा पर्वतं नीत्वा भक्षयति।

अत्याचारनिवारणार्थम् जनाः राक्षसं किम् कथयन्ति? वयं तुभ्यं प्रतिदिनमाहारार्थमेकं मानवं दास्यामः। राक्षसेन तेषां वाक्यं स्वीकृतम् न वा? स्वीकृतम्। कालान्तरम् कस्य वारः समायातः? एकस्य ब्राह्मणस्य।

ब्राह्मणस्य कति पुत्रा आसन्? तस्य एकः पुत्रः आसीत्।

खगस्य दुःखस्य कारणं किम् अस्ति? खगस्य दुःखस्य कारणम् ब्राह्मणस्य दुःखम् अस्ति।

वन्धुः कः भवति? यः मित्रे सुखिते सुखी तस्मिन् दुःखिते वा दुःखी भवति।

खगस्य वचनम् श्रुत्वा कः वध्यशिलासमीपे गतः? राजा विक्रमः

राक्षसः किं दृष्ट्वा विस्मितः भवति? एकं प्रसन्नवदनं पुरुषम्।

राजा राक्षसं प्रति किं भणति? राजा राक्षसं प्रति भणति यत् मया स्वेच्छया परार्थमेतत् शरीरं दीयते अतः न मे ग्लानिः।

नृपस्य वचनं श्रुत्वा राक्षसः किं करोति? राक्षसः प्रसन्नः भूत्वा अभयदानं ददाति।

**सारः**

खगः कथां श्रावयति। शैवालघोषपर्वते पलाशनगरे वकासुरः नामकः राक्षसः प्रतिदिनं एकं मानवं भक्षयति। संत्रस्ताः जनाः तस्मै प्रतिदिनं गृहक्रमेण एकम् मानुषं दातुम् वचनं यच्छन्ति। अनेन प्रकारेण बहुकालः व्यतीतः। क्रमेण एकस्य ब्राह्मणस्य वारः आगतः। सः ब्राह्मणः पूर्वजन्मनि खगस्य मित्रम् आसीत्। तं दृष्ट्वा सः खगः अपि दुःखी भवति। एतत् श्रुत्वा पक्षिणः कथयन्ति यत् वस्तुतः तद् एव मित्रम् यत् मित्रस्य दुःखे दुःखी सुखे च प्रसन्नः भवति। खगानां वचनानि श्रुत्वा राजा विक्रमादित्यः ब्राह्मणाय अभयं दत्वा स्वयमेव वध्यशिलायाम् उपविशति। प्रसन्नमुखं राजानं दृष्ट्वा विस्मितः राक्षसः तस्य प्रसन्नतायाः कारणं पृच्छति। राजा कथयति यत् परार्थे एव स्वेच्छया सः प्राणान् दातुम् उद्यतः अस्ति। अतः सः प्रसन्नः अस्ति। राक्षसः आत्मनः मनोरथं पूरयतु।

(पक्षी अपने दुःख का कारण बताते हुए एक कथा सुनाता है कि शैवालघोष पर्वत पर पलाशनगर में वकासुर नामक राक्षस प्रतिदिन किसी भी मनुष्य को खा जाता है। भयभीत नगरवासी उसे प्रतिदिन एक मनुष्य भेजने का वचन देते हैं। इस प्रकार बहुत सा समय बीत जाता है। क्रमानुसार एक ब्राह्मण की बारी आती है जो पूर्वजन्म में एक पक्षी का मित्र था। मित्र को दुःखी देखकर वह पक्षी भी दुःखी हो जाता है। यह सुनकर अन्य पक्षी कहते हैं कि वास्तव में वही मित्र है जो अपने मित्र के दुःख में दुःखी और सुख में प्रसन्न होता है। पक्षियों के वचन सुनकर राजा विक्रमादित्य ब्राह्मण को अभयदान देकर स्वयं राक्षस के भोजनार्थ वध्यशिला पर बैठता है। राजा को प्रसन्न देखकर आश्चर्यचकित राक्षस राजा की प्रसन्नता का कारण पूछता है। राजा कहता है कि मैं दूसरों की रक्षा के लिए अपने प्राण देने के लिए तैयार हूँ। यही कारण है कि मैं प्रसन्न हूँ। आप अपनी इच्छा की पूर्ति करो।

## व्याकारणबिन्दवः

**वृद्धि सन्धिः** अ/आ एताभ्यां वर्णाभ्यां परे ए/ऐ वर्णौ भवतः चेत् तर्हि पूर्वपरयोः स्थाने 'ऐ' वर्णः भवति। यदि अ/आ वर्णाभ्यां परे ओ/औ वर्णौ भवतः तदा 'औ' भवति।

यथा – (i) एक + एकः = एकैकः

(ii) तस्य + एकः = तस्यैकः

(iii) महा + ऐश्वर्यम् = महैश्वर्यम्

(iv) नव + ओदनम् = नवौदनम्

(v) मम + औषधम् = ममौषधम्

## पाठगतप्रश्नाः 8.2

1. कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत–

   (क) अस्ति.........................................शैवालघोषो नाम पर्वतः। (मध्यदेशे/ उत्तरदेशे)

   (ख) राक्षसः मानुषं स्त्रियं वा .....................................नीत्वा भक्षयति। (ग्रामं/ पर्वतं)

   (ग) एकदा कस्यचिद् .................................वारः समायातः। (ब्राह्मणस्य/ शशकस्य)

   (घ) राजा .......................................स्नात्वा वध्यशिलायां उपविष्टः। (नद्यां/ सरोवरे)

   (ङ) यस्य.....................................................समायाति तस्य इन्द्रियाणि ग्लानिं प्राप्नुवन्ति (जन्मकालः/ मरणकालः)

2. रेखांकितपदानि अधिकृत्य उदाहरणानुसारं प्रश्नान् लिखत

   **उदाहरणम् शैवालघोषपर्वतस्य** समीपे पलाशनगरम् अस्ति।

   **प्रश्नः** कस्य समीपे पलाशनगरम् अस्ति?

   (क) वकासुरः प्रतिदिनं **जनान्** भक्षयति।

   (ख) **नगरवासिभिः** उक्तम् 'वयं तुभ्यं प्रतिदिनं आहारार्थमेकं मानवं दास्यामः।

   (ग) ब्राह्मणस्य दुःखेन **खगः** दुःखी भवति।

   (घ) त्वं पुनरधिकां **कान्तिं** प्राप्य प्रहससि।

3. रेखांकितपदानि संशोध्य वाक्यानि/ पुनः लिखत

   (क) तस्य <u>एकम्</u> एव पुत्रः आसीत्।————————

   (ख) त्वं <u>महाधैर्यसम्पन्नं</u> पुरुषः दृश्यसे। —————

   (ग) न मे <u>कः</u> अपि ग्लानिः? ——————

   (घ) त्वम् <u>अधिकः</u> कान्तिं प्राप्य प्रहससि।—————————

   (ङ) किम् <u>अनया</u> विचारेण तव? ——————




## तृतीयः अंशः

कथायाः तृतीयम् अंशं पुनः पठामः। वयम् ज्ञास्यामः यत् कथं राक्षसः राज्ञः वचांसि श्रुत्वा जीवहत्यां त्यजति।

**तदा राक्षसेन स्वमनसि ............ राजा तूष्णीमासीत्।**

केन स्वमनसि विचारितम्? राक्षसेन। कथायां 'साधुः' पदम् कस्मै प्रयुक्तः? राजाविक्रमादित्याय। साधुः कां विहाय आगतः? आत्मनः सुखभोगेच्छाम्। साधुः कस्य दुःखेन दुःखी भूत्वा आगतः? ब्राह्मणस्य। साधवः कीदृशाः भवन्ति? ते सर्वप्राणिनां सुखम् इच्छन्ति। साधवः केन दुःखिनः भवन्ति? परेषां दुःखेन। राक्षसः कम् प्रति स्वविचारं प्रकटयति? राजानं प्रति। राक्षसः किम् विचारयति? राजा भोजः सर्वस्य दुःखहरः अस्ति।

किम् श्लाध्यम्? परार्थे प्रदत्तं शरीरम्। राजा विक्रमादित्यः केन सर्वाः सम्पदः प्राप्नोति? परोपकारव्यापारेण। राक्षसः कथं संतुष्टः अभवत्? राज्ञः त्यागभावनया। संतुष्टः राक्षसः राज्ञे किम् दातुम् उद्यतः अभवत्? वरं दातुम्। राजा वरे किम् अयाचत? मनुष्यभक्षणं त्यज इति। प्राणिनां रक्षा किमर्थं करणीया? सर्वेषां प्राणिनाम् एव प्राणाः प्रियाः भवन्ति। कः जीवहिंसां त्यक्तवान्? राक्षसः। राजा कुत्र अगच्छत्? स्वनगरीम्। पुत्तलिका भोजं प्रति किम् अब्रवीत्? राजन् यदि त्वम् परोपकारादि गुणयुक्तः असि तर्हि सिंहासने समुपविश।

पुत्तलिकायाः वचनं श्रुत्वा राजा किम् अकरोत्?राजा तूष्णीम् अतिष्ठत्।

**श्लोकानाम् अन्वयः**

1. त्यक्त्वात्मसुखदुःखेच्छां सर्वसत्वसुखैषिणः।
   भवन्ति परदुःखेन साधवोऽत्यन्तदुःखिनः।।

   **अन्वयः** सर्वसत्वसुखैषिणः साधवः आत्मसुखदुःखेच्छां त्यक्त्वा परदुःखेन अत्यन्त दुःखिनः भवन्ति

2. परोपकारव्यापारः पुरुषो यः प्रजायते।
   सम्पदः स समाप्नोति परत्रापि परं पदम्।।

   **अन्वयः** यः पुरुषः परोपकारव्यापारः प्रजायते सः (इह) सम्पदः आप्नोति) परत्र अपि परं पदम् समाप्नोति।

**सारः**

राक्षसः महाराजविक्रमादित्यस्य परार्थे शरीरत्यागस्य गुणं दृष्ट्वा तं 'साधुः' इति कथयति। सः राजानं कथयति यत् भवान् सर्वेषां प्राणिनां दुःखानि निवारयसि अतः त्वं धनसम्पदः प्राप्नोषि। तव परोपकारभावनया अहम् अतीव प्रसन्नः अस्मि। तदनन्तरम् वरदानाय आग्रहं करोति। 'राजा तु "भवान् जीवहिंसां त्यजतु" इति वरं याचते। राक्षसः जीवहिंसां त्यजति। पुत्तलिका पुनः राजानं भोजं सिंहासने उपवेष्टुम् प्रेरयति।

राक्षस विक्रमादित्य के परहित में शरीर त्याग के गुण से अत्यन्त प्रसन्न होकर उन्हें साधु के रूप में कहते हुए एक वरदान लेने के लिए कहता है। राजा राक्षस से जीवहिंसा त्यागने का वर माँगता है। राक्षस जीवहत्या त्याग देता है। यह कथा सुनाकर पुत्तलिका पुनः राजाभोज को सिंहासन पर बैठने के लिए प्रेरित करती है कि हे राजन्! यदि तुममें राजा विक्रमादित्य जैसे इस प्रकार के गुण हैं तो इस सिंहासन पर बैठ सकते हो।

## पाठगतप्रश्नाः 8.3

1. एकपदेन उत्तरत–
   (क) परदुःखेन के दुःखिनः भवन्ति?
   (ख) राक्षसः किं व्यक्तवान्?
   (ग) सर्वेषां के प्रियाः?
   (घ) सर्वेषां जीवानां का करणीया?
2. उदाहरणं दृष्ट्वा वाच्यपरिवर्तनं कुरुत
   कर्तृवाच्यम्– एकदा नगरवासिनः तम् अकथयन्।
   कर्मवाच्यम्– एकदा नगरवासिभिः सः कथितः।
   (क) कर्तृवाच्यम्– अहं परार्थे एतत् शरीरं ददामि।
   कर्मवाच्यम्–
   (ख) कर्तृवाव्यम्– राजा भणति।
   भाव/कर्मवाच्यम्–
   (ग) कर्तृवाच्यम्– राक्षसः जीवहिंसा त्यजति।
   कर्मवाच्यम्–
   (घ) कर्तृवाच्यम्– पुत्तलिका कथां कथयति।
   कर्मवाच्यम्–
3. अधोलिखितं कथनं कः कं प्रति कथयति–

| **कथनम्** | **कः** | **कम् प्रति** |
|---|---|---|
| (क) अहं संतुष्टोऽस्मि। | –––––– | –––––––– |
| (ख) जीवहिंसां त्यजतु | –––––– | –––––––– |
| (ग) सिंहासने समुपविश। | –––––– | –––––––– |
| (घ) साधवः परदुःखेन दुःखिनः भवन्ति। | –––––– | –––––––– |

4. कोष्ठकात् अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत–

(यथा, तदाप्रभृति, यदि, तथा, तर्हि, एवं)

(क) ——————— विचार्य सः राजानम् अब्रवीत्।

(ख) ——————— मनुष्यस्य आत्मनः प्राणाः प्रियाः ———— सर्वेषां प्राणिनाम्।

(ग) त्वं ———————— मम प्रसन्नः असि,———————— जीवहिंसां त्यज।

(घ) ———————राक्षसः जीवहिंसां त्यक्तवान्।

---

## व्याकरणबिन्दवः

**क्त प्रत्ययस्य प्रयोगः**

निर्गतः निर्+ गम्+ क्त – (चले गए) पुं. प्रथमा एकवचनम्

स्थितः– स्था+ क्त (रूके) पुं.

दृष्टम्– दृश् + क्त – नपंसकलिंगम् प्रथमा एकवचनम्

भणितम्– भण्+ क्त– नपुंसकलिंगम् प्रथमा एकवचनम्

उक्तम्– वच्+ क्त– नपुसकलिंगम् प्रथमा एकवचनम्

भाववाच्ये 'क्त' प्रत्ययस्य प्रयोगः भवति।

सकर्मक कृ धातुना सह कर्मवाच्ये अपि प्रयोगः भवति।

**ल्यप् प्रत्ययस्य प्रयोगः**

निधाय– नि+ धा+ ल्यप् – (रखकर)

आश्रित्य– आ+ श्रि+ ल्यप्– (आश्रित होकर, सहारा लेकर)

अवलोक्य– अव+ लोक्+ ल्यप्– देखकर

निवेद्य– नि+ विद्+ ल्यप्– निवेदित करके

(भवान् जानाति एव यत् यदा धातोः पूर्वम् उपसर्गः भवति तदा क्त्वा स्थाने ल्यप् प्रत्ययः भवति।)

**पदपरिचयः**

चेतसि– 'चेतस्', सप्तमी एकवचनम्

श्रूयताम्– 'श्रु' धातुः (कर्मवाच्ये) लोट्लकारः, प्रथमपुरूषः एकवचनम्

**कत्वा/ल्यप् प्रत्ययस्य प्रयोगः**

श्रु + क्त्वा – श्रुत्वा

नी + क्त्वा – नीत्वा

स्ना + क्त्वा – स्नात्वा

दा + क्त्वा – दत्त्वा

दृश् + क्त्वा – दृष्ट्वा

आ + गम् + ल्यप्– आगत्य

निर् + ईक्ष् + ल्यप्– निरीक्ष्य

प्र + आप् + ल्यप्– प्राप्य

सम् + प्रेष् + ल्यप्– सम्प्रेष्य

**समासप्रयोगः**

दिनं दिनं प्रति– प्रतिदिनम्, अव्ययीभावसमासः

दुःखस्य कारणम्– दुःखकारणम्, षष्ठीतत्पुरूष समासः

सम्मुखपतितम्– सम्मुखे पतितं – सप्तमीतत्पुरूष समासः

महत् च तत् दुःखम् महादुःखम्– कर्मधारय समासः

अधोलिखितानि वाक्यानि ध्यानेन पठत

(क) युष्माभिः किं दृष्टम्?

(ख) पक्षिणा भणितम्।

(ग) चिरजीविना उक्तम्।

(घ) तेन उक्तम्।

(ङ) वृद्धेन उक्तम्।

एतेषु सर्वेषु वाक्येषु कर्ता तृतीयाविभक्त्याम् अस्ति क्रिया च प्रथमा–एकवचने एव। इदं भाववाच्यं कथ्यते। वाच्यम् इति कथनस्य प्रकारः क्रियायाः प्रयोगः वा। अस्य त्रयः भेदाः भवन्ति। (1) कर्तृवाच्यम् (2) कर्मवाच्यम् (3) भाववाच्यम्। कर्तृवाच्ये क्रियाकर्तृपदानुसारं विद्यते। कर्मवाच्ये कर्मानुसारं, भाव वाच्ये तु प्रथम पुरुषे एकवचने एव।

**विसर्गसन्धिप्रयोगः**

(विसर्गस्य उत्वम्– ः + अ = ो ऽ)

साधवोऽत्यन्तदुःखिनः– साधवः+ अत्यन्त दुःखिनः

(स्+आ+ध्+व्+अ+ः+अत्यन्तदुःखिनः)= अत्र विसर्गस्य स्थाने 'उ' भवति

(अ+उ+अ) = ओ ऽ

तुष्टोऽस्मि – तुष्टः+ अस्मि

प्रसन्नोऽसि– प्रसन्नः + असि




**पदपरिचयः**

वृणीष्व– 'वृ' धातु (आत्मनेपदी) लोट्लकारः, मध्यमपुरूषः एकवचनम्

आत्मनः– आत्मन् पुं. पंचमी / षष्ठी एकवचनम्


समुपविश– सम्+उप+विश् लोट् लकारः, मध्यमपुरूषः, एकवचनम्

म्रियते – मृ 'धातुः' (आत्मनेपदी) लट्लकारः, प्रथम पुरुषः, एकवचनम्



## 8.4 किम् अधिगतम्

- 'परार्थे आत्मोत्सर्गः' इति पाठः 'सिंहासनद्वात्रिंशिका' ग्रन्थात् उद्धृतः।
- महाराजविक्रमादित्यः दयालुः, परोपकारी, प्रतापी च नृपः आसीत्।
- सर्वेषां जीवानां प्राणाः प्रियाः। अतः अस्माभिः जीवरक्षा करणीया।
- साधवः स्वयं कष्टं सोढ्वा सर्वसत्त्वहितैषिणः भवन्ति।
- अव्ययानां रूपपरिवर्तनं न भवति।
- धातुना सह 'क्त' प्रत्ययं संयोज्य भूतकालिक–अर्थः जायते।
- यदा धातोः पूर्वम् उपसर्गः आयाति तदा क्त्वा स्थाने ल्यप् प्रत्ययः भवति, तत्पदं च अव्ययं भवति।
- वाच्यं त्रिविधं भवति– कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् च।
- वर्ण–संश्लेषणेन पदनिर्माणं भवति।



## 8.5 योग्यताविस्तारः

### (क) ग्रन्थपरिचयः

'सिंहासनद्वात्रिंशिका' नाम ग्रन्थः एकः मनोरंजकः शिक्षाप्रदश्च कथासंग्रहः अस्ति। अयं ग्रन्थः 'द्वात्रिंशत्पुत्तलिका' एवं च 'विक्रमचरितम्' नामभ्यामपि प्रसिद्धः। यदा महाराजः भोजः विक्रमादित्यस्य सिहासनं अरोढुम् प्रयतते तदा सिंहासनजटिताः पुत्तलिकाः भोजस्य योग्यतां परीक्षितुम् एकैकशः द्वात्रिशंत् पुत्तलिकाः विक्रमादित्यस्य शौर्यकथाः श्रावयन्ति। अस्याः कथायाः द्विविधं संस्करणं प्राप्यते– एकम् उत्तरभारतीयम् द्वितीयं दक्षिणभारतीयम् च। दक्षिणभारतीयं संस्करणं 'विक्रमचरितम्' इति कथ्यते। लेखकविषये पूर्णज्ञानं नोपलभ्यते।

### (ख) भावविस्तारः

परोषाम् उपकारः परोपकारः इति कथ्यते। अस्मिन् संसारे सत्पुरुषाः परोपकाराय जीवनं धारयन्ति। ते आत्मसुखं दुःखं वा अविचिन्त्य अहर्निशं समाजस्य देशस्य च कल्याणाय एव प्रयासरताः भवन्ति। अस्माकं देशे परोपकारस्य अत्यधिकं महत्त्वं वर्तते। परोपकारविषये व्यासेन उक्तम्–

अष्टादशपुराणेषु व्यासस्य वचनद्वयम्।
परोपकारः पुण्याय पापाय परपीडनम्।।

परोपकारिणः पुरुषाः स्वभावेन एव विनम्राः भवन्ति। तेषां हृदयानि सागराणाम् इव विस्तृतानि भवन्ति।

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिर्दूरविलम्बिनो घनाः।
अनुद्धता सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

अपि च— श्रोत्रं श्रुतनैव न कुण्डलेन दानेन पाणिर्नतु कंकणेन।
विभाति कायः करुणापराणां परोपकारेण न तु चन्दनेन।।

ये जनाः उदारहृदयाः भवन्ति तेषां कृते सम्पूर्णं जगत् परिवार इव भवति—

अयं निजः परोवेति गणना लघुचेतसाम्।
उदारचरितानान्तु वसुधैव कुटुम्बकम्।। (हितोपदेशः)

न केवलं मानवाः अपितु प्रकृतिः अपि सर्वदा परोपकारे संलग्ना भवति—

परोपकाराय फलन्ति वृक्षाः,
परोपराय वहन्ति नद्यः।
परोपकाराय दुहन्ति गावः,
परोपकारार्थमिदं शरीरम्।।

एवमेव— पिबन्ति नद्यः स्वयमेव नाम्भः,
स्वयं न खादन्ति फलानि वृक्षाः।
नादन्ति सस्यं खलु वारिवाहाः,
परोपकाराय सतां विभूतयः।।

अस्याः कथायाः विषये क्षेमेन्द्रस्य वृहत्कथामंजरीनामके पुस्तके, सोमदेवस्य कथासरित्सागर नामके पुस्तके च संक्षिप्तरूपेण विवरणं प्राप्यते।

राजा भोजः विक्रमादित्य इव परोपकारी, सदाचारी, विद्वद्जनानां प्रेमी आसीत्। भोजस्य पितुः नाम सिन्धुलः, नगर्याः नाम च धारा आसीत्। सः सप्तपंचाशत्वर्षाणि राज्यमकरोत्। तस्य राज्ये जनाः सदाचारिणः सन्तुष्टाः, धार्मिकाः च आसन्। भोजस्य राज्ये चतुर्दिक्षु सुव्यवस्था आसीत्। तस्य राजभवने नवरत्नाः आसन्। कलाकौशलादीनां विकासः सुष्ठुरूपेण च अभवत्।

विक्रमादित्यस्य राज्ये जनाः सदाचारिणः आसन्। कोऽपि जनः कस्यचिद् जनस्य निन्दां न अकरोत्। कोऽपि जनः चौरकर्मे प्रवृत्तः न आसीत्। तस्य राज्यम् पापशून्यम् आसीत्। सर्वाः व्यवस्थाः सुचारुरूपेण प्रचलन्ति स्म। जनाः स्व–स्व कार्येषु संलग्नाः आसन्। सर्वे जनाः धर्मयुक्ताः भूत्वा सुखेन, संतोषेण च जीवनं यापयन्ति स्म।

## (ग) भाषाविस्तारः

### वाच्यम्

वाच्यम् कथनस्य प्रकारम्।

यथा– 1. रामः पाठान् पठति। 2. रामेण पाठाः पठ्यन्ते। 3. रामेण पठ्यते।

**प्रथमे वाक्ये** 'रामः' कर्तृपदे प्रथमा विभक्तौ अस्ति। क्रियापदम् कर्तृपदस्य पुरुषवचनानुसारेण भवति। अतः अस्य कथनस्य प्रकारः कर्तृवाच्यम्।

**द्वितीये वाक्ये** 'रामेण' कर्तृपदम् अप्रधानम् (गौणम्) भूत्वा तृतीया विभक्तौ अस्ति। 'पाठाः' कर्मपदं प्रधानं भूत्वा प्रथमा विभक्तौ अस्ति। 'पठ्यन्ते' क्रियापदम् प्रधान कर्मपदस्य पुरुषवचनानुसारेण अस्ति। अत्र कर्मपदं प्रधानम् अस्ति। अतः अस्य कथनस्य प्रकारः कर्मवाच्यम्। कर्मवाच्ये धातु + य + आत्मनेपदम्। कर्मवाच्ये पठ् धातोः रूपाणि पश्यतु–

**पठ् (कर्मवाच्ये) लट्लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुषः | पठ्यते | पठ्येते | पठ्यन्ते |
| मध्यम पुरुषः | पठ्यसे | पठ्येथे | पठ्यध्वे |
| उत्तम पुरुषः | पठ्ये | पठ्यावहे | पठ्यामहे |

अन्यानि उदाहरणानि

तेन पुस्तकं पठ्यते, तेन पुस्तके पठ्येते, तेन पुस्तकानि पठ्यन्ते


तेन त्वम् दृश्यते, तेन युवाम् दृश्येथे, तेन युयम् दृश्यध्वे

तेन अहम् कथ्ये, तेन आवाम् कथ्यावहे, तेन वयं कथ्यामहे

### तृतीये वाक्ये

'रामेण' कर्त्ता अप्रधानम् भूत्वा तृतीयाविभक्तौ अस्ति।

अत्र कर्मपदस्य अभावः अस्ति। भाववाच्ये क्रिया प्रधानम् अस्ति। भावपदस्य अर्थः क्रिया अस्ति। भाववाच्ये बहुवचने अपि क्रियापदं सदा प्रथमपुरुषस्य एकवचने एव भवति। यथा तेन सुप्यते, ताभ्यां सुप्यते, तैः सुप्यते, त्वया गम्यते, युवाभ्यां गम्यते, युष्माभिः गम्यते, मया पठ्यते, आवाभ्यां पठ्यते, अस्माभिः पठ्यते।





## 8.6 पाठान्तप्रश्नाः

1. राज्ञः विक्रमादित्यस्य चारित्रिकगुणाः चतुर्वाक्येषु लिखत।
2. अस्मात् पाठात् चित्वा तिस्रः सूक्तीः लिखत।
3. निम्नलिखितप्रश्नान् उत्तरत–

    (क) विक्रमस्य राज्ये कीदृशाः जनाः न आसन्?

    (ख) वृक्षस्य उपरि चिरंजीवी नामकः खगः किं करोति स्म?

    (ग) वृद्धेन पक्षिणा किम् उक्तम्?

    (घ) राक्षसः पर्वते किं करोति स्म?

    (ङ) पक्षिणः वचः श्रुत्वा राजा किम् अकरोत्।

4. यथानिर्दिष्टं पदपरिचयं लिखत

| पदानि | मूलशब्दः | विभक्तिः | वचनम् |
|---|---|---|---|
| मन्त्रिषु | ................ | .................. | ................ |
| चिरजीविना | ................ | .................. | ................ |
| चेतसि | ................ | .................. | ................ |
| तुभ्यम् | ................ | .................. | ................ |
| सम्पदः | ................ | .................. | ................ |

5. अधोलिखितानि वाक्यानि घटनाक्रमेण लिखत–

    (क) वृक्षस्योपरि चिरंजीवी आसीत्।

    (ख) एकदा विक्रमः योगिवेशेन देशान्तरं गतः।

    (ग) सरोवरे स्नात्वा राजा वध्यशिलायाम् उपविष्टः।

    (घ) महारण्यमध्ये राजा रात्रौ वृक्षमूलमाश्रित्य स्थितः अभवत्।

    (ङ) पक्षिणः वचः श्रुत्वा राजा वध्यशिलासमीपे गतः।

    (च) तदाप्रभृति राक्षसः जीवमारणं त्यक्तवान्।

    (छ) उत्तरदेशे शैवालघोषो नाम पर्वतः आसीत्।

    (ज) कश्चित् राक्षसः प्रतिदिनं मानुषं स्त्रियं वा भक्षयति।

6. रेखांकितपदमाधृत्य प्रश्ननिर्माणं कुरूत–

    (क) <u>वृक्षमूले</u> स्थितः राजा तद्वचः शृणोति।

    (ख) पर्वतनिकटे <u>पलाशनगरम्</u> अस्ति।

    (ग) क्रमेण एकदा <u>ब्राह्मणस्य</u> वारः समायातः।

    (घ) <u>कथां</u> कथयित्वा पुत्तलिका भोजराजं प्रति अब्रवीत्।

    (ङ) तदा <u>राक्षसेन</u> मनसि विचारितम्।

7. रेखांकितपदानाम् अशुद्धिं संशोध्य पुनः तानि लिखत–
   (क) तस्मात् मृत्युभयेन तेऽपि गताः।
   (ख) एवं भणित्वा पुनरपि राजम् अब्रवीत्।
   (ग) स मदागमने पूर्वमेव म्रियत।
   (घ) पुत्तलिका भोजराजेन प्रति अब्रवीत्।
   (ङ) नृपम् नमः।
8. वर्ण–संश्लेषणं कुरुत
   (क) र् + आ + क् + ष् + अ + स् + अः =
   (ख) र् + आ + ज् + ञ् + आ =
   (ग) प् + उ + त् + त् + अ + ल् + इ + क् + आ =

## 8.7 उत्तराणि

**8.3 बोधप्रश्नाः**


1. (क) वृक्षमूले, (ख) भोजः, (ग) राक्षसः, (घ ) पुत्तलिका
2. (क) वृद्धः, (ख) पक्षिणिः, (ग) राक्षसः, (घ) राजा (ङ) राजा
3. क. iii, ख. vi, ग. i, घ. v, ङ ii, च. iv

**पाठगतप्रश्नाः**

**8.1** 1. (क) पुत्तलिका, (ख) विक्रमस्य, (ग) मन्त्रिषु (घ) चिरंजीवी ङ राजा
2. (क) वृक्षस्योपरि, (ख) उक्तम्, (ग) तत्र, (घ) सूर्योऽस्तंगतः, (ङ) स्थितः
3. (क) गम्, (ख) स्था, (ग) दृश्, (घ) भण्, (ङ) वच्।

**8.2** 1. (क) उत्तरदेशे, (ख) पर्वतं (ग) ब्राह्मणस्य, (घ) सरोवरे, (ङ) मरणकालः।
2. (क) कस्य (ख) कान् (ग) कैः (घ) कः (ङ) काम्
3. (क) एकः, (ख) महाधैर्यसम्पन्नः, (ग) का, (घ) अधिकां, (ङ) अनेन।

**8.3** 1. (क) साधवः, (ख) जीवहिंसाम्, (ग) प्राणाः, (घ) रक्षा।
2. (क) मया परार्थे एतत् शरीरं दीयते। (ख) राज्ञा भणितम्।
(ग) राक्षसेन जीवहिंसा त्यज्यते। (घ) पुत्तलिकया कथा कथ्यते।
3. (क) राक्षसः राजान प्रति (ख) राजा–राक्षसम्
(घ) पुत्तलिका–राजानम् (घ) राक्षसः–राजानम्
4. क. एवं, ख. यथा–तथा, ग. यदि–तर्हि, घ. तदाप्रभृति





### 8.6 पाठान्त प्रश्नाः

1. (i) राजा विक्रमादित्यः धैर्यसम्पन्नः प्रसन्नवदनः च आसीत्।
   (ii) सः वेशपरिवर्तनं कृत्वा राज्यस्य सर्वं वृत्तान्तं ज्ञातुं प्रयतते स्म।
   (iii) राजा स्वबलिदानेन अपि प्रजायै अभयदानम् अकरोत्।
   (iv) राज्ञः व्यवहारेण प्रेरितः राक्षसः अपि जीवहिंसां त्यजति स्म।
2. स्वयं कुरुत।
3. (क) विक्रमस्य राज्ये पिशुनः तस्कराः, पापकर्मनिरताः जनाः न आसन्।
   (ख) वृक्षस्य उपरि चिरंजीवी नामकः खगः अन्यैः पक्षिभिः सह संलापं करोति स्म।
   (ग) वृद्धेन पक्षिणा उक्तम्– ''भो पुत्र! यो दुःखी स सुहृदि दुःखं निवेद्य सुखी भवति''।
   (घ) राक्षसः प्रतिदिनं नगरमागत्य मानुषं स्त्रियं बालं वा पर्वते नीत्वा भक्षयति स्म।
   (ङ) पक्षिणः वचः श्रुत्वा राजा वध्यशिलासमीपे गतः। तत्र ब्राह्मणं दृष्ट्वा तस्मै अभयं दत्त्वा स्वगृहं च सम्प्रेष्य, सरोवरे स्नात्वा वध्यशिलायाम् उपविष्टः।
4. मन्त्रिन्, सप्तमी, बहुवचनम्
   चिंरजीविन्, तृतीया, एकवचनम्
   चेतस्, सप्तमी, एकवचनम्
   युष्मद्, चतुर्थी, एकवचनम्
   सम्पत्, प्रथमा, एकवचनम्
5. (ख) (घ) (क) (छ) (ज) (ङ) (ग) (च)
6. (क) कुत्र, (ख) किम् (ग) किं नाम नगरम्, (ग) कस्य (घ) काम्, (ङ) केन।
7. (क) मृत्युभयात्, (ख) राजानम्, (ग) मदागमनात्, (घ) भोजराजम्, (ङ) नृपाय।
8. (क) राक्षसः (ख) राज्ञा (ग) पुत्तलिका





# 9

# काले फलति सौभाग्यम्


को न जानाति खलु काले एव वृक्षाः फलन्ति। काले एव वृष्टिः जायते। काले एव भवनस्य निर्माणं भवति। प्रथमे कुद्दालाघाते एव भूतलात् जलं न निस्सरति। क्षेत्रेषु धान्यम् अपि समये एव प्ररोहति। अतः अस्माभिः धैर्येण कार्यं करणीयम्। निराशः भूत्वा मध्यमार्गे एव प्रयत्नः न त्यक्तव्यः। कथम् एकः निर्धनः जनः धैर्यम् अवलम्ब्य धनवान् भवति इति पठामः वयम् अस्मिन् हास्यनाटके।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- नाट्यांशस्य सारांशं लेखितुं शक्ष्यति;
- पाठे प्रयुक्तानां पात्राणां चरित्रचित्रणं कर्तुं शक्ष्यति;
- इन् प्रत्ययान्तपदानां रूपाणि ज्ञात्वा वाक्यप्रयोगं कर्तुं शक्ष्यति;
- पूर्वरूपसन्धियुक्तपदानां सन्धिच्छेदं करिष्यति;
- तत्पुरुषसमस्तपदानि चित्वा विग्रहं करिष्यति;
- क्त्वा प्रत्ययस्य स्थाने ल्यप् प्रत्ययस्य प्रयोगं कर्तुं क्षमः भविष्यति;
- क्तवतु प्रत्ययस्य स्थाने लङ् लकारस्य क्रियापदानि लेखिष्यति;
- भू, शक्, क्री धातूनां लटादि–प×च लकारेषु रूपाणां प्रयोगं करिष्यति।

## क्रियाकलापः





9.1: **बीजचक्रं**

उपर्युक्तचित्रे बीजचक्रं प्रदर्शितम्। चित्रं दृष्ट्वा अधोलिखितवाक्यानि पूरयन्तु

| | | | |
|---|---|---|---|
| (क) | बीजात् | अङ्कुरः | प्रजायते |
| (ख) | ......... | पादपः | ............ |
| (ग) | .......... | .......... | प्रजायते |
| (घ) | वृक्षात् | ............ | ............. |
| (ङ) | ......... | फलम् | .............. |
| (च) | फलात् | ......... | ............... |



टिप्पणी



## 9.1 मूलपाठः

### काले फलति सौभाग्यम्

यथा बीजं तस्मिन्नेव क्षणे फलं न उत्पादयति तथैव पुण्यकर्मणां फलमपि तत्क्षणमेव न भवति। पठामः तावत् अतिमनोर×जकम् एतत् नाटकम्।

**(राजसभायाः दृश्यम्। सिंहासने उपविष्टः राजा पार्श्वे मन्त्री च)**

**प्रतीहारी** – (प्रविश्य) जयतु महाराजः। प्रभो! कश्चन जीर्णवस्त्रधारी निर्धनः भवद्दर्शनाभिलाषी द्वारे तिष्ठति।

**राजा** – सादरं तम् अन्तः प्रवेशय।

**प्रतीहारी** – यथाज्ञापयति महाराजः। (प्रतीहारी गच्छति)

**राजा** – (स्वगतम्) कथं मम राज्ये जीर्णवस्त्रधारी निर्धनः?

**प्रतीहारी** – (लब्धदत्तेन सह प्रविश्य) जयतु महाराजः।

**लब्धदत्तः** – जयतु महाराजः।

**राजा** – भोः कथं मम राज्ये निर्धनः, दीपस्य अधः अन्धकारः।

**लब्धदत्तः** – महाराज! किं करोमि, मम भाग्यम् एव विपरीतम्।

**मन्त्री** – महाराज! किं न अभिजानाति, एषः एव एकदा वने महाराजस्य प्राणान् रक्षितवान्।

**लब्धदत्तः** – मातृभूमेः महाराजस्य च ऋणं प्रत्यर्पयितुं मया प्रयासः एव कृतः।

**राजा** – आम् स्मरामि। तदा अपि भवान् न किमपि याचितवान्। भवतः विनम्रतया प्रसन्नः अस्मि। वदतु किम् इच्छति?

**लब्धदत्तः** – भवतां दर्शनार्थम् एव आगतवान्।

**राजा** – (पार्श्वं दृष्ट्वा) प्रतीहारिन्। मम शयनागारे एकं बीजपूरफलम् अस्ति। शीघ्रं तत् आनय।

**प्रतीहारी** – यथाज्ञापयति महाराजः। (निष्क्रम्य, प्रविश्य च)

**प्रतीहारी** – जयतु महाराजः। एतद् बीजपूरफलम्।

**राजा** – (स्वीकृत्य) भोः लब्धदत्त। स्वीकरोतु एतत् फलम्। इतः परं बहुमूल्यं वस्त्रं परिधाय एव राजसभायाम् आगच्छतु भवान्।

**शब्दार्थाः**

राजसभायाः = राजदरबार का
प्रतीहारी = द्वारपाल
प्रविश्य = पहनकर
जीर्णवस्त्रधारी = फटे पुराने कपड़े पहने
प्रवेशय = प्रवेश कराओ
स्वगतम् = एक ओर बोली जाने वाली बात जो अन्य पात्रों को सुनाई न दे।
अभिजानन्ति = पहचानता है
प्रत्यर्पयितुम् = वापस करने के लिए, चुकाने के लिए
शयनागारे = सोने के कक्ष में
बीजपूरफलम् = बीजों से भरा फल
परिधाय = पहन कर
ज्ञास्यसि = जान जाओगे

**लब्धदत्तः** – (किञ्चिद् नैराश्यम् अनुभवन्) धन्यः अस्मि। (फलं गृहीत्वा गच्छति।)

**मन्त्री** – महाराज। किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति?

**राजा** – समयेन ज्ञास्यसि, हे मन्त्रिन्!

**प्रतीहारी** – जयतु महाराजः। महाराज! एकः साधुः राजदर्शनाकांक्षी द्वारे तिष्ठति।

**राजा** – सम्मानपूर्वकम् आनय तम्।

(ततः साधुः प्रविशति।)

**साधुः** – जयतु महाराजः। एकम् अपूर्वं फलं भवते अर्पयितुम् आगतोऽहम्। कृपया स्वीकरोतु।

**राजा** – (गृहीत्वा साश्चर्यम्) अहो एतत् तु तदेव फलम्। भोः साधो! कुतः प्राप्तम् एतत् फलम्?

**साधुः** – राजन्! मार्गे एकः अतीव निर्धनः जनः एतत् फलं विक्रीणाति स्म। दिव्यं प्रकाशमानम् एतत् फलं दृष्ट्वा अहम् एकं रूप्यकं दत्त्वा क्रीतवान् अत्र च आनीतवान्।

**राजा** – अतिशोभनम्। भवान् मम अतिथिगृहे विश्रान्तिम् अनुभवतु।

**साधुः** – कृतज्ञोऽस्मि, राजन्। (गच्छति)

**राजा** – प्रतीहारिन्! पुनः तं जीर्णवस्त्रधारिणम् लब्धदत्तम् आह्वयतु।

**प्रतीहारी** – यथा आज्ञापयति महाराजः। (गच्छति, लब्धदत्तेन सह प्रविश्य) एषः लब्धदत्तः।

**लब्धदत्तः** – जयतु महाराजः। क्षम्यताम्। बुभुक्षया पीडितोऽहं तत्फलम् एकेन रूप्यकेण विक्रीतवान्।

**राजा** – चिन्ता मा अस्तु। पुनः स्वीकरोतु तदेव फलम्। (लब्धदत्तः फलं स्वीकृत्य निर्गच्छति।)

**प्रतीहारी** – (प्रविश्य) जयतु महाराजः। कोऽपि राजदर्शनार्थी द्वारे तिष्ठति।

**राजा** – तम् अन्तः प्रवेशय।

**प्रतीहारी** – यथाज्ञापयति महाराजः। (गच्छति, पुनः व्यापारिणा सह प्रविशति।)

**व्यापारी** – जयतु महाराजः। महाराज, भवते एकं दिव्यं फलम् उपहाररूपेण अर्पयामि। कृपया स्वीकरोतु।

राजदर्शनाकांक्षी = राजा का दर्शन चाहने वाला
अपूर्वम् = अनोखा
अर्पयितुम् = देने के लिए
विक्रीणाति स्म = बेचता था
प्रकाशमानम् = चमकता हुआ
आनीतवान् = ले आया
विश्रान्तिम् = आराम, विश्राम
आह्वयतु = बुलाइए
आज्ञापयति = आज्ञा देता है
बुभुक्षया = भूख से
मा अस्तु = मत हो
समर्पणीयम् = देना है, सौंपना है
मन्ये = मानता हूँ
प्रकाशम् = जोर से, सबको सुनाई देने लायक शब्दों से

**राजा** – (साश्चर्यम्, स्वगतम्) अरे, पुनः तदेव फलम्। मन्ये सः मूर्खः पुनः एतत् फलम् एकेन रूप्यकेण विक्रीतवान्। (प्रकाशम्) भो व्यापारिन्, कुतः प्राप्तम् एतत् फलम्।

**व्यापारी** – महाराज! एकः जीर्णवस्त्रधारी एतत् फलं विक्रीणाति स्म। बहुमूल्यम् अद्भुतम् इति च मत्वा तस्मै वस्त्रयुगलं दत्त्वा अत्र आनीतवान्।

**राजा** – प्रीतोऽस्मि भवतः राजभक्त्या। मन्त्रिन्। एनं यथोचितं सत्कृत्य प्रेषयतु। तं लब्धदत्तं च पुनः आह्वयतु।

**मन्त्री** – यथा आदिशति भवान्।

**राजा** – (स्वगतम्) कथं मूर्खः सः लब्धदत्तः न अभिजानाति फलस्य दिव्यताम्। (व्यापारी गच्छति, लब्धदत्तः पुनः प्रविशति )

**लब्धदत्तः** – जयतु महाराजः। पश्यतु भगवन्। भवतां कृपया अद्य नूतनं वस्त्रयुगलं धारयामि। महान् आनन्दः वर्तते।

**राजा** – भवान् अल्पसन्तुष्टः लोभरहितः इति दृष्ट्वा प्रसन्नः अस्मि। पुनः एतत् फलं स्वीकरोतु। भवतः सर्वे मनोरथाः पूर्णाः भविष्यन्ति।

**लब्धदत्तः** – अनुगृहीतोऽस्मि। (फलं गृहीत्वा गच्छति)

**(ततः प्रविशति एका नर्तकी)**

**नर्तकी** – जयतु महाराजः। महाराज! अहम् एकं दिव्यं फलं भवते उपहारार्थम् आनीतवती।

**राजा** – (स्वगतम्) अहो! पुनरपि तदेव फलम्। सर्वे अस्य दिव्यतां परिज्ञाय एतत् अत्र आनयन्ति। सः तावत् अल्पमूल्यार्थम् एतत् विक्रीणाति। (प्रकाशम्) गच्छतु भवती अद्य। (नर्तकी गच्छति)

**राजा** – प्रतीहारिन्! पुनरपि सः लब्धदत्तः आनीयताम्।

**लब्धदत्तः** – (प्रविश्य, भीत्या) क्षम्यताम्। महाराज! प्रतिदिनम् उदरभरणम् माम् एतत् फलं विक्रेतुं बाध्यं करोति। इतः परं तथा न करिष्यामि। मम दोषः नास्ति।

**राजा** – अलं भयेन। भवतः सत्यवचनेन अहं सन्तुष्टः। भवान् विनम्रः, सरलः, अभिमानरहितः, लोभरहितः च। अतः पुनः एतत् फलं स्वीकरोतु। (लब्धदत्तः गृह्णाति)

प्राप्तम् = मिला
वस्त्रयुगलम् = वस्त्रों का एक जोड़ा
दत्त्वा = देकर
प्रीतोऽस्मि = खुश हूँ, प्रसन्न हूँ
सत्कृत्य = सम्मान देकर
प्रेषयतु = भेजें
आदिशति = आदेश देता है
उपहारार्थम् = उपहार के लिए, भेंट के लिए
परिज्ञाय = जानकर
आनयन्ति = लाते हैं
आनीयताम् = ले आइए
भीत्या = डर से
विक्रेतुम् = बेचने के लिए
बाध्यम् = विवश, मजबूर
इतः परम् = इसके बाद



**राजा** – इदानीं सर्वेषां पुरतः एतत् फलं खण्डयतु। (लब्धदत्तः फलं खण्डयति। तस्मात् रत्नानि अधः पतन्ति। सर्वत्र तेषां ज्योतिः प्रसरति।)

**लब्धदत्तः** – (आश्चर्येण) अहो रत्नमयम् आसीत् एतत् फलम्। अत एव भासते स्म।

**मन्त्री** – (स्वगतम्) एवम् दिव्यम् आसीत् फलम्! (प्रकाशम्) भो लब्धदत्त। पश्य, त्रिवारम् एतत् फलं भवते प्रदत्तम्। भवान् सम्प्राप्तां लक्ष्मीं पुनः पुनः तिरस्कृतवान्।


**लब्धदत्तः** – (नैराश्येन) महाराज! मम भाग्ये लक्ष्मीः नासीत् अतएव अहम् एतत् फलं न परिज्ञातवान्। (राज्ञः चरणयोः पतति)।

**राजा** – (लब्धदत्तम् उत्थापयन्) उत्तिष्ठ! सत्कर्मणः सद्विचाराणां च फलं कदापि न नश्यति। भवद्भिः मम प्राणरक्षा कृता। त्रिवारं मया विविधाः जनाः भवतः परीक्षार्थं प्रेषिताः। भवान् लोभं न कृत्वा अल्पेनैव मूल्येन एतत् फलं विक्रीतवान्। सर्वदा सत्यमेव उक्तम्। अतः इदानीम् एतानि सर्वाणि रत्नानि भवते दास्यामि। स्वीकरोतु।

**लब्धदत्तः** – जयतु महाराजः! अनुगृहीतोऽस्मि। चिरं जीवतु भवान् सर्वदा प्रजाहितचिन्तकः। नूनं भवतां राज्ये कोऽपि निर्धनः भवितुं न शक्नोति।

**मन्त्री** – धन्यः अस्ति अस्माकं महाराजः– **नूनम् सत्यमेव उक्तम्–काले फलति सौभाग्यम्।**

(पटाक्षेपः)



खण्डयतु = तोड़िए– फोड़िए
भासते स्म = चमक रहा था
सम्प्राप्ताम् = पाई हुई
तिरस्कृतवान् = अपमान कर दिया
नैराश्येन = निराशा से
परिज्ञातवान् = पहचाना, जाना
उत्थापयन् = उठाता हुआ
परीक्षार्थं = जाँच के लिए
नूनम् = अवश्य
पटाक्षेपः = पर्दे का गिरना

## 9.2 बोधप्रश्नाः

1. भवद्भिः मूलपाठः पठितः। तदनुसारमेव उत्तरं ददतु। कः कं प्रति कथयति?

| | कः | कम् |
|---|---|---|
| यथा– भोः। कथं मम राज्ये निर्धनः? | राजा | लब्धदत्तम् |
| (क) जयतु महाराजः। एतद् बीजपूरफलम्। | .......... | ............. |
| (ख) किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति? | ........... | ............. |
| (ग) बहुमूल्यम् अद्भुतम् इति मत्वा तस्मै वस्त्रयुगलं दत्त्वा अत्र आनीतवान् | .......... | ............ |

टिप्पणी

(घ) अहम् एकं रूप्यकं दत्त्वा क्रीतवान् ............ ..............

(ङ) भवते उपहारार्थं दिव्यं फलम् आनीतवती ............ ..............

2. अधोलिखिते संवादे रिक्तस्थानानि पूरयत

लब्धदत्तः (प्रविश्य) (i)................ महाराजः। प्रतिदिनं (ii)............ माम् एतत् फलं (iii)..............बाध्यं करोति। इतः (iv)....................न करिष्यामि। मम (v)............. नास्ति।

राजा अलं (vi).............। (vii).............. सत्यवचनेन अहं सन्तुष्टः। भवान् (viii).............. सरलः (ix)........... लोभरहितः च। अतः पुनः (x).............. फलं स्वीकुरु।

3. क्रियापदानि योजयन्तु

(क) कश्चन निर्धनः भवद्दर्शनम् ..................।

(ख) किं................. मम भाग्यम् एव विपरीतम्।

(ग) भो लब्धदत्त। .............. एतत् फलम्।

(घ) महाराज। भवते एकं दिव्यं फलम् उपहाररूपेण...........।

(ङ) इदानीं सर्वेषां पुरतः एतत् फलं....................।

---

## 9.3 अधुना अवगच्छामः

### प्रथमः अंशः


**राजसभायाः दृश्यम् .................................................. समयेन ज्ञास्यसि हे मन्त्रिन्।**

**व्याख्या–**

भवन्तः जानन्ति एव यत् अद्यापि समाजे नाटकानाम् अभिनयः प्रचलति। दूरदर्शने अपि वयं नाटकम् पश्यामः। नाटकम् अभिनयप्रधानं भवति। अस्य उद्देश्यम् न केवलं मनोर जनम् अपितु प्रेरणाप्रदानम् अपि भवति। वयम् अत्रापि नाटके कथम् एकः जीर्णवस्त्रः निर्धनः राजदर्शनम् इच्छति राजा च तस्य समस्यां कथं दूरीं करोति इति प्रथमांशे पठामः।

(क) दीपस्य अधः अन्धकारः– राजसभां गतं निर्धनं जीर्णवस्त्रधारिणं लब्धदत्तं दृष्ट्वा राजा चकितः सन् इदम् उक्तवान् ''कथं दीपस्य अधः अन्धकारः– अर्थात् दानिनः राज्ञः शासनेऽपि कथम् एतादृशः निर्धनः? कथं दानेन वञ्चितः सः? एषा वार्ता तु राज्ञः कृते अपयशस्करी।

(ख) ऋणं प्रत्यर्पयितुं मया प्रयासः कृतः– आत्मनः प्रशंसां प्रति उदासीनः लब्धदत्तः तु कथयति, ''मया तु कर्त्तव्यस्य निर्वाहः एव कृतः। अहम् अस्य देशस्य नागरिकः। अत्र एव स्वजीवननिर्वाहं करोमि। अतः राज्ञः रक्षाम् मातृभूमेः च रक्षणं अहं कृतवान्।''





(ग) समयेन ज्ञास्यसि– उचितसमये एव कस्यापि कर्मणः फलं प्राप्यते। परं कर्म तु कर्त्तव्यमेव।

**प्रथमांशसारः**

एकः राजा अतीव बुद्धिमान् प्रजावत्सलः च आसीत्। सः स्वराज्ये कमपि जनं निर्धनं द्रष्टुं न वा×छति स्म। तस्य सभायाम् एकः लब्धदत्तः नाम जीर्णवस्त्रधारी निर्धनः प्रविशति। तेन एकवारं राज्ञः प्राणरक्षा अपि कृता आसीत्। लब्धदत्तः विनम्रः आसीत् अतः: किमपि न अयाचत्। राजा तस्मै एकं बीजपूरं फलं प्रयच्छति। 'किमर्थम्' इति मन्त्री अपि न जानाति स्म। अन्ते तस्य रहस्यम् उद्घाटितम् भवति।

एक राजा बहुत परोपकारी तथा प्रजा का हित चाहने वाला था। उसकी सभा में एक फटेहाल निर्धन प्रवेश करता है। उसने पहले कभी एक बार राजा की प्राणरक्षा भी की थी किन्तु विनम्रता के कारण वह स्वयं कुछ नहीं मांगता। राजा उसे एक बीजों से भरा फल देता है। क्यों? इस बात को मन्त्री भी नहीं समझ पाता। इसका उत्तर अन्त में मिलता है।

## व्याकरणबिन्दवः

अत्र वयम् अधः उपपदविभक्तिप्रयोगं, इन् (तद्धित प्रत्ययं) क्त्वा–ल्यप्–क्तवतु (कृत्) प्रत्ययप्रयोगं च पश्यामः।

| | |
|---|---|
| प्रतीहारी | (प्रतीहार + इन्) प्रतीहारिन् शब्दः, प्रथमाविभक्तिः, एकवचनम् |
| मन्त्री | (मन्त्र + इन्) मन्त्रिन् शब्दः, प्रथमाविभक्तिः, एकवचनम् मन्त्रं परामर्शं ददाति इति। सम्बोधने मन्त्रिन् भवति। |
| महाराजः | महान् चासौ राजा। महाराज शब्दः, प्रथमाविभक्तिः, एकवचनम्। सम्बोधने–महाराज! इति भवति। |
| दीपस्य अधः | अत्र अधः इति योगे षष्ठी, किन्तु 'अधोऽधः' इति योगे द्वितीया भवति। |

**ल्यप् प्रत्यय प्रयोगः**

| | | | | | | |
|---|---|---|---|---|---|---|
| प्रविश्य | प्र | + | विश् | + | ल्यप् | प्रवेशं कृत्वा |
| निष्क्रम्य | निस् | + | क्रम् | + | ल्यप् | निष्क्रमणं कृत्वा, बहिर्गत्वा |
| परिधाय | परि | + | धा | + | ल्यप् | धारणं कृत्वा, धारयित्वा |
| स्वीकृत्य | स्वी | + | कृ | + | ल्यप् | स्वीकारं कृत्वा |

**क्त्वा प्रत्ययान्तशब्दाः**

| | | |
|---|---|---|
| दृष्ट्वा | दृश्+क्त्वा (अव्यय) | दृष्टिपातं कृत्वा |
| गृहीत्वा | ग्रह्+क्त्वा (अव्यय) | ग्रहणं कृत्वा |

**क्तवतुप्रत्ययप्रयोगः**

'क्तवतु' (तवत्) प्रत्ययः भूतकालिककृत्प्रत्ययः। अयं धातोः परं योज्यते। क्तवतुप्रत्ययान्तपदं न केवलं भूतकालिकक्रियायाः अर्थं व्यक्तं करोति। अस्य रूपाणि त्रिषु लिङ्गेषु भवन्ति। यथा– छात्रः गृहं गतवान् (गम् + क्तवतु) = भूतकालिक क्रियापदम् – अगच्छत् 'इति अर्थः।

रक्षितवान् — रक्ष् + क्तवतु, पु0 प्रथमा विभक्तिः, एकवचनम्, अरक्षत्–रक्षणम् अकरोत्।

आगतवान् — आ+गम् क्तवतु, पु0, प्रथमा वि., एकवचनम्।

याचितवान् — याच् क्तवतु, पुं0, प्रथमा वि0, एकवचनम्, अयाचत–याचनाम् अकरोत्।

## पाठगतप्रश्नाः 9.1

1. सम्बोधनं प्रथमान्तं पदं वा लिख्यताम्

| **प्रथमान्तं पदम्** | **सम्बोधनम्** |
|---|---|
| यथा प्रतीहारी | हे प्रतीहारिन् |
| (क) मन्त्री | ...................... |
| (ख) .................. | हे राजन् |
| (ग) महाराजः | ...................... |
| (घ) .................. | हे दर्शनाभिलाषिन् |

2. स्त्रीलिङ्गरूपस्य स्थाने पुल्लिंगरूपं लिखन्तु

| | |
|---|---|
| यथा सा रक्षितवती | सः रक्षितवान् । |
| (क) सा आगतवती | सः ................................ । |
| (ख) सा याचितवती | सः ................................ । |
| (ग) सा स्वीकृतवती | सः ................................ । |
| (घ) सा गृहीतवती | सः ................................ । |

3. अनया पंक्त्या कः चारित्रिकः गुणः प्रकटितः भवति?

| | |
|---|---|
| (क) राजा– कथं मम राज्ये निर्धनः? | दानवीरता/कृपणता |
| (ख) मन्त्री –एतेन एकदा राज्ञः प्राणरक्षा कृता। | तीक्ष्णा स्मृतिः/मन्दबुद्धिः |
| (ग) लब्धदत्तः– भवतां दर्शनार्थम् अत्र आगतवान्। | कुटिलता/विनम्रता |
| (घ) राजा–समयेन ज्ञास्यसि। | अज्ञानम्/चातुर्यम् |
| (5) मन्त्री– महाराज! किम् एकेन फलेन तस्य दारिद्र्यं दूरीभविष्यति। | परहितचिन्ता/उदारता |

## द्वितीयः अंशः

**प्रतीहारी–जयतु महाराजः ...................................... फलं गृहीत्वाग गच्छति।**

सम्प्रति वयम् द्वितीयांशम् प्रश्नोत्तरशैल्या बोधामः–

द्वारे कः उपस्थितः? एकः साधुः। साधुः राज्ञे किम् अर्पयति? अपूर्वं फलम्। साधुः तत् अपूर्वं फलं कुतः प्राप्तवान्? साधुः तत् अपूर्वं फलं तस्माद् एव लब्धदत्तात् क्रीत्वा आनीतवान्। साधुः लब्धदत्ताय फलस्य किं मूल्यं दत्तवान्। एकं रूप्यकम्। राजा साधवे किं पारितोषिकं ददाति? राजा साधवे अतिथिगृहे भोजनस्य व्यवस्थां कारयति। एतेन साधुं प्रति राज्ञः सम्मानभावना प्रकटीभवति। लब्धदत्तः किमर्थं फलं विक्रीतवान्? लब्धदत्तः बुभुक्षया पीडितः आसीत्। किं राजा तं दण्डयति? नहि। राजा तं न दण्डयति। अपितु पुनः तस्मै तदेव फलं ददाति। कालान्तरे कः अन्यः प्रविशति? एकः व्यापारी। व्यापारी पुनः राज्ञे किम् अर्पयति? व्यापारी पुनः राज्ञे तदेव फलम् अर्पयति। व्यापारी कुतः तत् फलम् आनीतवान्? लब्धदत्तात् व्यापारी लब्धदत्ताय वस्त्रयुगलं दत्त्वा फलं क्रीतवान्। राज्ञा आहूतः लब्धदत्तः किं धारयित्वा आनन्दं प्रकटयति? लब्धदत्तः व्यापारिणा दत्तं वस्त्रयुगलं धारयित्वा आनन्दं प्रकटयति। किं राजा तस्मै कुप्यति? नैव। राजा तु तम् अल्पसन्तुष्टं लोभरहितं मत्वा प्रसन्नः भवति। राजा किं कथयित्वा पुनः तस्मै तदेव फलं ददाति? "तव सर्वे मनोरथाः पूर्णाः भविष्यन्ति।" इति लब्धदत्तः राजानं प्रति किं कथयित्वा गच्छति? "अनुगृहीतः अस्मि" इति कथयित्वा गच्छति।

### द्वितीयांशसारः

लब्धदत्तः राज्ञा प्रदत्तं फलं गृहीत्वा गच्छति। एकः साधुः लब्धदत्तात् एकेन रूप्यकेण फलं क्रीत्वा राज्ञे समर्पयति। राजा पुनः तत् फलं लब्धदत्ताय प्रयच्छति। पुनः एकः व्यापारी तत् फलं लब्धदत्तात् क्रीणाति, तस्मै एकं वस्त्रयुगलं ददाति पुनः च राज्ञे ददाति। राजा द्वितीयं वारमपि लब्धदत्ताय तत् फलं प्रयच्छति।

लब्धदत्त राजा के दिये फल को लेकर चला जाता है। एक साधु उसे एक रुपया देकर फल खरीदकर पुनः राजा को दे देता है। राजा फिर से उसे लब्धदत्त को ही दे देता है। कुछ समय बाद एक व्यापारी लब्धदत्त को वस्त्रों का जोड़ा देकर फल ले लेता है और फल पुनः राजा को लाकर देता है। राजा दूसरी बार भी फल लेकर लब्धदत्त को देता है।

1. **'स्वगतम्'** नाटके यदा किमपि पात्रम् स्वमनोभावम् एवं वदति, येन म×चे समक्षं स्थितं पात्रं न श्रृणोति इव, परं दर्शकाः श्रृण्वन्ति– एवम्भूतं कथनं 'स्वगतम्' उच्यते। यथा हि "अश्राव्यं खलु यद्वस्तु तदिह स्वगतम् मतम्" इति।
2. **'प्रकाशम्'** एतद्विपरीतं यत् सर्वश्राव्यं कथनं भवति तत्कृते 'प्रकाशम्' इति प्रयुज्यते।

## व्याकरणबिन्दवः

अत्र वयं पदानां विग्रहं, सम्बोधनरूपं, क्त्वा–ल्यप्–क्तवतुप्रत्ययान्तरूपं च बोधामः

| **समस्तपदानि** | **विग्रहाः** |
|---|---|
| राजदर्शनम् | राज्ञः दर्शनम् |
| राजदर्शनाकांक्षी | राजदर्शनस्य आकांक्षी |
| अतिथिगृहे | अतिथीनां गृहम्, अतिथिगृहं तस्मिन् इति अतिथिगृहे। |
| जीर्णवस्त्रम् | जीर्णं वस्त्रम् |
| वस्त्रयुगलम् | वस्त्रस्य युगलम् |
| राजभक्त्या | राज्ञः भक्तिः राजभक्तिः तया इति राजभक्त्या |
| अल्पसन्तुष्टः | अल्पेन सन्तुष्टः |
| लोभरहितः | लोभेन रहितः |


**त्त्वा / ल्यप् प्रत्ययबोधः**

| | |
|---|---|
| गृहीत्वा | ग्रह् + क्त्वा |
| दृष्ट्वा | दृश् + क्त्वा |
| दत्त्वा | दा + क्त्वा |
| मत्वा | मन् + क्त्वा |
| स्वीकृत्य | स्वी + कृ + ल्यप् |
| सत्कृत्य | सत् + कृ + ल्यप् |

**क्तवतुप्रत्ययान्तशब्दाः**

| | | |
|---|---|---|
| क्रीतवान् | क्री + | क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.) |
| आनीतवान् | आ + नी + | क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.) |
| विक्रीतवान् | वि + क्री + | क्तवतु प्रत्ययः, प्रथमा एकवचनम् (पु.) |

| **सम्बोधनपदानि** | **प्रथमान्तपदानि** |
|---|---|
| महाराज! | महाराजः |
| साधो! | साधुः |
| राजन् | राजा |
| प्रतीहारिन् | प्रतीहारी |
| व्यापारिन् | व्यापारी |
| मन्त्रिन् | मन्त्री |
| भगवन् | भगवान् |





## पाठगतप्रश्नाः 9.2

1. (क) कौ द्वौ जनौ पुनः तत् दिव्यं फलं क्रीत्वा आनीतवन्तौ?
   (ख) साधुः लब्धदत्ताय किं दत्त्वा फलं प्राप्तवान्?
   (ग) व्यापारी लब्धदत्ताय किम् अयच्छत्?
   (घ) राजा तत्फलं प्राप्य पुनः कस्मै दत्तवान्?
2. अधोलिखितविग्रहान् पठित्वा समस्तपदानि रचयत।
   (क) अल्पेन सन्तुष्टः
   (ख) लोभात् विरहितः
   (ग) अतिथये गृहम्
   (घ) जीर्णं वस्त्रम्
   (ङ) राज्ञः भक्त्या
3. अधोलिखितवाक्येषु पाठानुसारं क्रियापदानि योजयत
   (क) भवान् मम अतिथिगृहे भोजनादिकं स्वीकृत्य......................................................
   (ख) पुनः तं जीर्णवस्त्रधारिणम् लब्धदत्तम् ..............................................................
   (ग) मन्त्रिन्। एनं यथोचितं सत्कृत्य ..........................................................................
   (घ) राजा– भवान् पुनः तदेव फलं ..............................................................................
   (ङ) राजा– लब्धदत्तं च पुनः .....................................................................................
4. अधोलिखितवाक्येषु विशेषणपदं रेखांकितं कुरुत
   (क) एकः साधुः द्वारे तिष्ठति।
   (ख) पुनः तं जीर्णवस्त्रधारिणं लब्धदत्तम् आह्वयतु।
   (ग) अहं तत् फलं रूप्यकेण क्रीतवान्।
   (घ) भवतां कृपया अद्य नूतनं वस्त्रयुगलं धारयामि।
   (ङ) महान् आनन्दः वर्तते।

---

## तृतीयः अंशः

**ततः प्रविशति एका नर्तकी .................................................. पटाक्षेपः।**

इदानीम् वयं तृतीयम् अंशं बोधामः–

फलं विक्रेतुं लब्धदत्तः किमर्थं बाध्यः आसीत्? क्षुधापूर्त्यै अथवा उदरंभरणाय। पुनः तत् फलं राज्ञे का आनीतवती? नर्तकी। राजा नर्तक्यै किं ददाति? न किमपि, अपितु सः तां

गन्तुं कथयति। राजा पुनः कस्य आह्वानाय आदेशं ददाति? लब्धदत्तस्य। राज्ञा कति जनाः लब्धदत्तस्य परीक्षायै प्रेषिताः आसन्? के च ते? त्रयः, साधुः, व्यापारी, नर्तकी च। ते जनाः कथं लब्धदत्तं परीक्षितवन्तः? ते तस्मात् फलं क्रीत्वा पुनः राज्ञे समर्पितवन्तः। लब्धदत्ते के के गुणाः आसन्? लब्धदत्तः विनम्रः, लोभरहितः, अल्पसन्तुष्टः अभिमानरहितः च आसीत्। राज्ञा तत् फलं लब्धदत्ताय कति वारं दत्तम्? त्रिवारम्। किं लब्धदत्तः सत्यं वदति स्म अथवा असत्यम्? सः राज्ञः पुरतः आगम्य सर्वदा सत्यमेव उक्तवान्। अन्ते राजा किं करोति? राजा अन्ते तानि रत्नानि लब्धदत्ताय एव दत्तवान्। सत्कर्मणां फलं कीदृशं भवति शुभम् अशुभं वा? सत्कर्मणां फलं शुभं भवति। फले किम् आसीत्? फले रत्नानि आसन्।

### तृतीयांशसारः

पूर्ववत् एव पुनः एका नर्तकी लब्धदत्तात् फलं स्वीकृत्य राज्ञे ददाति। राजा लब्धदत्तम् आह्वयति, फलं च खण्डयितुम् आदिशति। खण्डितात् फलात् रत्नानि अधः पतन्ति। लब्धदत्तः विस्मितः तानि पश्यति। राजा लब्धदत्तस्य सत्यभाषणेन, विनम्रतया, सन्तोषवृत्त्या च प्रसीदति तस्मै च सर्वाणि रत्नानि प्रयच्छति। वस्तुतः साधुः, व्यापारी, नर्तकी सर्वे एव राज्ञा लब्धदत्तस्य परीक्षायै प्रेषिताः आसन्। लब्धदत्तः परीक्षायां सफलः भवति। पुण्यकर्मणां फलम् अवश्यं प्राप्यते परन्तु कालेन एव। अतः नरः धैर्येण पुण्यकर्माणि कुर्वन् जीवेत्।

पूर्व की भांति एक नर्तकी लब्धदत्त से फल लेकर पुनः राजा को देती है। राजा उसी प्रकार लब्धदत्त को बुलाता है और फल तोड़ने के लिए कहता है। टूटे हुए फल से रत्न पृथ्वी पर गिर पड़ते हैं। राजा लब्धदत्त की सरलता, सन्तोषवृत्ति, सत्यभाषिता से प्रसन्न होकर सारे रत्न उसे दे देता है। वास्तव में साधु, व्यापारी तथा नर्तकी राजा के द्वारा ही लब्धदत्त की परीक्षा के लिये भेजे जाते हैं जिसमें लब्धदत्त खरा उतरता है। पुण्यकर्मों का फल अवश्य मिलता है लेकिन समय आने पर ही। अतः मनुष्य धैर्यपूर्वक पुण्यकर्म करते हुए ही जीवन यापन करे।

## व्याकरणबिन्दवः

अत्र वयं पुनः अर्थशब्दयुक्त–पदानां विग्रहं, भवत् शब्दरूपाणि, क्तवतु प्रत्ययप्रयोगं, अव्ययपदानि, उपपदविभक्ति प्रयोगं च बोधामः

| | | | |
|---|---|---|---|
| (क) | उपहारार्थम् | उपहाराय | इदम् |
| | अल्पमूल्यार्थम् | अल्पमूल्याय | इदम् |
| | परीक्षार्थम् | परीक्षायै | इदम् |
| (ख) | भवते | भवत् चतुर्थी एकवचनम् | (आपके लिये) |
| | भवतः | भवत् षष्ठी एकवचनम् | (आपका) |
| | भवान् | भवत् पु. प्रथमा एकवचनम् | (आप) |

| | | | | |
|---|---|---|---|---|
| | भवद्भिः | भवत् पु. तृतीया बहुवचनम् (आप के द्वारा) | | |
| | भवताम् | भवत् पु. षष्ठी बहुवचनम् | (आप सबका) | |
| (ग) | परिज्ञाय | परि ज्ञा ल्यप् | अभिज्ञानं कृत्वा | (पहचान करके) |
| | विक्रेतुम् | वि क्री तुमुन् | विक्रयं कर्तुम् | (बेचने के लिये) |

**क्तवतु प्रययान्तशब्दाः**

| | |
|---|---|
| आनीतवती | आ नी + क्तवतु, स्त्री., प्रथमा एकवचनम्, पुंल्लिंगे आनीतवान्। |
| तिरस्कृतवान् | तिरस्कृ + क्तवतु, पु., प्रथमा एकवचनम्, स्त्रीलिंगे, तिरस्कृतवती। |
| विक्रीतवान् | वि क्री + क्तवतु, पु, प्रथमा एकवचनम्, स्त्रीलिंगे विक्रीतवती। |

**अव्ययपदानि**

पुनः (फिर), एव (वही), अत्र (यहां), तावत् (तो, तब तक) अद्य ( आज), इतः परम् (इसके बाद), तथा ( वैसा) अलम् (बस करो, मत करो), च (और), अतः ( इसलिये) पुरतः (सामने, आगे) अधः (नीचे), सर्वत्र (सब जगह), अतएव (इसीलिये), एवम् (इस प्रकार), कदापि (कभी भी), त्रिवारम् ( तीन बार), चिरम् (बहुत दिन तक), नूनम् (निश्चय पूर्वक), न (नहीं),

**उपपदविभक्तिप्रयोगः**

(i) विना योगे द्वितीया तृतीया पंचमी अपि भवति। (ii) अलम् योगे तृतीया–अलम् भयेन।

(iii) 'दा' योगे चतुर्थी–भवते प्रदत्तम्। पर्याप्त्यर्थे अलम् योगे तु चतुर्थी भवति। यथा मल्लः <u>मल्लाय</u> अलम्।

**धातुरूपाणि**

**√शक् लट् लकारः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमपुरुषः | शक्नोति | शक्नुतः | शक्नुवन्ति |
| मध्यमपुरुषः | शक्नोषि | शक्नुथः | शक्नुथ |
| उत्तमपुरुषः | शक्नोमि | शक्नुवः | शक्नुमः |

**लोट् लकारः**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | शक्नोतु | शक्नुताम् | शक्नुवन्तु |
| मध्यमपुरुषः | शक्नुहि | शक्नुतम् | शक्नुत |
| उत्तमपुरुषः | शक्नुवानि | शक्नुवाव | शक्नुवाम |





**लृट् लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | शक्ष्यति | शक्ष्यतः | शक्ष्यन्ति |
| मध्यमपुरुषः | शक्ष्यसि | शक्ष्यथः | शक्ष्यथ |
| उत्तमपुरुषः | शक्ष्यामि | शक्ष्यावः | शक्ष्यामः |

**लङ् लकारः**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अशक्नोत् | अशक्नुताम् | अशक्नुवन् |
| मध्यमपुरुषः | अशक्नोः | अशक्नुतम् | अशक्नुत |
| उत्तमपुरुषः | अशक्नुवम् | अशक्नुव | अशक्नुव |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | शक्नुयात् | शक्नुयाताम् | शक्नुयुः |
| मध्यमपुरुषः | शक्नुयाः | शक्नुयातम् | शक्नुयात |
| उत्तमपुरुषः | शक्नुयाम् | शक्नुयाव | शक्नुवाम |

**विशेषः**– एवमेव 'आप्' धातोः रूपाणि भविष्यन्ति। यथा– आप्नोति (लटि) आप्नोतु (लोटि), आप्स्यति (लृटि), आप्नोत् (लङ्), आप्नुयात् (विधिलिङि)

**क्री (खरीदना)**

**लट् लकारः**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणाति | क्रीणीतः | क्रीणन्ति |
| मध्यमपुरुषः | क्रीणासि | क्रीणीथः | क्रीणीथ |
| उत्तमपुरुषः | क्रीणामि | क्रीणीवः | क्रीणीमः |

**लोट् लकारः**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणातु | क्रीणीताम् | क्रीणन्तु |

**लङ् लकारः**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | अक्रीणात् | अक्रीणीताम् | अक्रीणन् |

**लृट् लकारः**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | क्रेष्यति | क्रेष्यतः | क्रेष्यन्ति |

**विधिलिङ्**

| | | | |
|---|---|---|---|
| प्रथमपुरुषः | क्रीणीयात् | क्रीणीयाताम् | क्रीणीयुः |

## पाठगतप्रश्नाः 9.3


1. अधोलिखितपंक्तिषु सम्बोधनपदं योजयन्तु
   (क) ..............................! पुनरपि स लब्धदत्तः आनीयताम्।
   (ख) ..............................! अहम् एकं दिव्यं फलं भवते उपहारार्थम् आनीतवती।
   (ग) ..............................! पश्य, त्रिवारम् एतत् फलं भवते दत्तम्।
   (घ) ..............................! प्रतिदिनम् उदरपूर्तिः माम् एतत् फलं विक्रेतुं बाध्यं करोति।
   (ङ) ..............................! मम भाग्ये लक्ष्मीः नासीत्।
2. कोष्ठकात् उचितं पदं चित्वा वाक्यानि पूरयन्तु
   (क) एतानि सर्वाणि रत्नानि ........................ दास्यामि। (भवते / भवतः)
   (ख) नूनं ................ राज्ये कोऽपि निर्धनः भवितुं न शक्नोति। (भवता / भवताम्)
   (ग) ........................ विनम्रः सरलः लोभरहितः च। (भवतः / भवान्)
   (घ) .................... सत्यवचनेन अहं सन्तुष्टः। (भवतः / भवद्भिः)
   (ङ) ........................ मम प्राणरक्षा कृता। (भवद्भिः / भवद्भ्यः)
3. सन्धिरहितानि पदानि सन्धियुक्तानि कुरुत
   (क) अनुगृहीतः + अस्मि ..........................................
   (ख) कः + अपि ..........................................
   (ग) न + अस्ति ..........................................
   (घ) अल्पेन + एव ..........................................
   (ङ) उपहार + अर्थम् ..........................................
4. निर्दिष्टशब्देषु उचितम् उपपद–विभक्तिः प्रयुज्यताम्
   (क) (मित्र) ...................... विना सुखं नास्ति।
   (ख) धनी (निर्धन) .................... धनं ददाति।
   (ग) अलं .................... (कोलाहल)।
   (घ) सिंहः (गज) .................... अलम्।

## 9.4 किम् अधिगतम्

- लब्धदत्तः सत्यवक्ता, अल्पसंतोषी, निर्लोभः, विनम्रः च आसीत्।
- सर्वदा सत्यम् एव जयते।



- धैर्येण कार्यं करणीयम्।
- सत्कर्मणां फलं सदैव शुभं भवति।
- 'अर्थम्' 'के लिये' इति अर्थे विग्रहे पूर्वपदे चतुर्थी भवति।
- अलम् योगे निषेधार्थे तृतीयाविभक्तिः प्रयुज्यते, पर्याप्त्यर्थे च चतुर्थी।
- भूतकालस्य अर्थे 'क्तवतु' प्रत्ययस्य प्रयोगः अपि भवति।
- उपसर्गपूर्वकं धातोः परं क्त्वा स्थाने ल्यप् प्रत्ययः भवति।
- प्रतीहारी मन्त्री, व्यापारी शब्दाः इन् प्रत्ययान्ताः सन्ति।
- भू, शक्, आप्, क्री धातूनां रूपाणि।



## 9.5 योग्यताविस्तारः

### (क) लेखक–ग्रन्थ–परिचयः

प्रस्तुतनाटकस्य कथा संस्कृतवाङ्मयस्य ''कथासरित्सागरः'' इति प्रसिद्धकथाग्रन्थात् उद्धृता अस्ति। तामेव कथामाधृत्य लिखितं ''काले वर्षति पर्जन्यः'' इति नामकं नाटकं ''सम्भाषण सन्देशः'' इति संस्कृतपत्रिकायाः 1999 वर्षस्य नवम्बर मासस्य अंके प्रकाशितम् वर्तते। नाटकस्य लेखकः श्री नी. ना. मध्यस्थः अस्ति। ''काले वर्षति पर्जन्यः'' इति प्रकाशितस्य मूलशीर्षकस्य परिवर्तनं कृत्वा अत्र ''काले फलति सौभाग्यम्'' इति नाटकस्य नाम प्रदत्तम् अस्ति। अल्पेन सन्तुष्टः, लोभरहितः, सत्यवादी, निर्धनः लब्धदत्तः स्व सत्कर्मणां रत्नरूपाणि फलानि समये आगते अलभत।


### प्रमुखनाट्यतत्त्वानि

**नाटकम्** नाटकं ख्यातवृत्तं स्यात् पंचसंधिसमन्वितम्।
विलासाध्यादिगुणवद्युक्तं नानाविभूतिभिः।।
सुखदुःखसमुद्भूतिं नानारसनिरन्तरम्।।
पंचादिका दशपरास्तत्रांकाः परिकीर्त्तिताः।
नायकः त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्साही।
दक्षोऽनुरक्तलोकः तेजोवैदग्ध्यशीलमन्नेता।।

नाटकम् रूपकस्य एकः भेदः। तस्य आख्यानं प्रसिद्धम् ऐतिहासिकं पौराणिंक वा भवति। तत्र एकः प्रख्यातनायकः भवति। नाटके वीरश्रृंगारकरुणेषु एकः प्रधानः रसः भवति।

**नान्दी** नाटकस्य प्रारम्भे विघ्नविनाशाय क्रियमाणा स्तुतिः नान्दीति कथ्यते।

**सूत्रधारः** नाटके मंचसंचालनस्य सर्वम् उत्तरदायित्वं यः निर्वहति सः सूत्रधारः कथ्यते।





**प्रतीहारी** राजानम् उपगम्य बहिः आगन्तुकस्य वृत्तं यः कथयति स द्वारपालः एव प्रतीहारी कथ्यते।

**कंचुकी** वयसा वृद्धः गुणी विप्रः, यः अन्तःपुरचरोऽपि भवति सर्वकार्येषु कुशलश्च भवति, स राजभवननिवासी कंचुकी इत्यभिधीयते।

**विदूषक** 'कुसुम', 'वसन्त' इत्यादिनाम्ना अभिधीयमानः वेशभावादिभिः हास्यकरः, कलह–प्रेम प्रवीणः, मंचे वर्तमानः विदूषकः इति कथ्यते।

**आकाशभाषितम्** आकाशे लक्ष्यं कृत्वा यद् उच्यते तत् आकाशभाषितम् इति।

**भरतवाक्यम्** नाटकसमाप्तौ सामाजिकेभ्यः यदाशीःदीयते शुभकामना वा क्रियते तत् भरतवाक्यमिति कथ्यते।

**नेपथ्यम्** रंगमंचस्य पृष्ठतः वेश–परिधान–परिवर्तनाय नाटकीयपात्राणां निर्धारितं स्थानं गृहं वा नेपथ्यम् इत्युच्यते।

**(ख) भाषाविस्तारः**

**इन् प्रत्ययान्तशब्दाः**

प्रतीहारिन्, जीर्णवस्त्रधारिन्, दर्शनाभिलाषिन्, राजदर्शनाकांक्षिन्, व्यापारिन् एतेषां रूपाणि अधोलिखितवत् भवन्ति। भवता द्वितीये पाठे इन् प्रत्ययान्तशब्दाः करिन्, चक्रिन् आदयः पठिताः। अस्मिन् पाठे अपि अनेके इन प्रत्ययान्तशब्दाः सन्ति। यथा–

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | प्रतीहारी | प्रतीहारिणौ | प्रतीहारिणः |
| द्वितीया | जीर्णवस्त्रधारिणम् | जीर्णवस्त्रधारिणौ | जीर्णवस्त्रधारिणः |
| तृतीया | दर्शनाभिलाषिणा | दर्शनाभिलाषिभ्याम् | दर्शनाभिलाषिभिः |
| चतुर्थी | दर्शनाकांक्षिणे | दर्शनाकांक्षिभ्याम् | दर्शनाकांक्षिभ्यः |
| पंचमी | व्यापारिणः | व्यापारिभ्याम् | व्यापारिभ्यः |
| षष्ठी | प्रतीहारिणः | प्रतीहारिणोः | प्रतीहारिणाम् |
| सप्तमी | जीर्णवस्त्रधारिणि | जीर्णवस्त्रधारिणोः | जीर्णवस्त्रधारिषु |
| सम्बोधन | हे दर्शनाभिलाषिन् | हे दर्शनाभिलाषिणौ | हे दर्शनाभिलाषिणः |

एवमेव तपस्विन्, मनस्विन्, धनिन्, गुणिन्, सुखिन्, पापिन्, रोगिन्, तेजस्विन्, स्वामिन् इत्यादिशब्दानां रूपाणि भवन्ति।

**क्तवतुप्रत्ययान्तपदानि**

| **धातुः** | **नपुंसकलिंगे** | **पुल्लिंगे प्रथमा एकवचने** | **स्त्रीलिंगे प्रथमा एकवचने** |
|---|---|---|---|
| गम् | गतवत् | गतवान् | गतवती |
| पठ् | पठित | पठितवान् | पठितवती |

| | | | |
|---|---|---|---|
| पत् | पतितवत् | पतितवान् | पतितवती |
| क्रीड् | क्रीडितवत् | क्रीडितवान् | क्रीडितवती |
| पा–(पिब्) | पीतवत् | पीतवान् | पीतवती |
| नी–(नय्) | नीतवत् | नीतवान् | नीतवती |
| दृश् (पश्य्) | दृष्टवत् | दृष्टवान् | दृष्टवती |
| त्यज् | त्यक्तवत् | त्यक्तवान् | त्यक्तवती |
| ज्ञा | ज्ञातवत् | ज्ञातवान् | ज्ञातवती |
| हन् | हतवत् | हतवान् | हतवती |
| दा | दत्तवत् | दत्तवान् | दत्तवती |
| स्था | स्थितवत् | स्थितवान् | स्थितवती |
| श्रु | श्रुतवत् | श्रुतवान् | श्रुतवती |
| लभ् | लब्धवत् | लब्धवान् | लब्धवती |
| कृ | कृतवत् | कृतवान् | कृतवती |
| स्मृ | स्मृतवत् | स्मृतवान् | स्मृतवती |
| चुर् | चोरितवत् | चोरितवान् | चोरितवती |
| प्रच्छ् | पृष्टवत् | पृष्टवान् | पृष्टवती |
| मिल् | मिलितवत् | मिलितवान् | मिलितवती |
| अस् भू | भूतवत् | भूतवान् | भूतवती |

| **एकवचने** | | **भूतकाले प्रयोगः** |
|---|---|---|
| पुं0 | बालकः / सः / एषः / कः / भवान् / अहम् / त्वम् | गतवान् |
| स्त्री0 | बालिका / रमा / एषा / का / भवती / अहम् / त्वम् | गतवती |
| नपु0 | वाहनम् / तत् / एतत् / किम् | गतवत् |

## 9.6 पाठान्तप्रश्नाः

1. (क) एकदा वने महाराजस्य प्राणान् कः रक्षितवान्?
   (ख) राजा बीजपूरफलदानसमये लब्धदत्तं कीदृशं वस्त्रं परिधाय राजसभाम् आगन्तुम् अकथयत्?
   (ग) साधुः किं दत्त्वा लब्धदत्तात् दिव्यं फलं क्रीतवान्?
   (घ) वस्त्रयुगलं दत्त्वा लब्धदत्तात् दिव्यं फलं कः क्रीतवान्?
   (ङ) राजा लब्धदत्ताय कतिवारं बीजपूरफलं दत्तवान्?
   (च) लब्धदत्तः किमर्थं पुनः पुनः बीजपूरफलं विक्रीतवान्?
   (छ) लब्धदत्तः फले खण्डिते सति किम् अपश्यत्?

2. (क) राज्ञः द्वौ गुणौ लिखत।
   (ख) लब्धदत्तस्य त्रयः गुणाः के?
   (ग) मन्त्रिणः एकं गुणं लिखत।
3. लब्धदत्तस्य चरित्रं पंचवाक्येषु वर्णयत।
4. राज्ञः वैशिष्ट्यं चतुर्वाक्येषु लिखत।
5. 'काले फलति सौभाग्यम्' अस्य सारांशं प×च/षट् वाक्येषु लिखत।
6. अधोलिखितवाक्येषु उचित–अव्ययपदानि योजयत
   (एव, सह, कुतः, एकदा, अत्र)
   (क) एष एव .................. महाराजस्य प्राणान् रक्षितवान्।
   (ख) इतः परं बहुमूल्यं वस्त्रं धारयित्वा............ राजभवने आगन्तव्यम्।
   (ग) प्रतीहारी लब्धदत्तेन .................. प्रविशति।
   (घ) भो व्यापारिन्! ........................... प्राप्तम् एतत् फलम्?
   (ङ) तस्मै वस्त्रयुगलं दत्त्वा फलम् ................ आनीतवान्।
7. अधोलिखितवाक्येषु लङ्लकारस्य स्थाने 'क्तवतु' प्रत्ययस्य प्रयोगं कृत्वा लिखत
   (क) अहम् एतत् फलम् अत्र <u>आनयम्</u>।
   (ख) तदा अपि लब्धदत्तः राजानम् किमपि न <u>अयाचत</u>।
   (ग) लब्धदत्तः राज्ञः सभायाम् <u>आगच्छत्</u>।
   (घ) नर्तकी दिव्यं फलं राज्ञे <u>आनयत्</u>।
   (ङ) भवान् अल्पेनैव मूल्येन एतत् फलं <u>व्यक्रीणात्</u>।
8. रेखाङ्कितपदानां विग्रहः कार्यः।
   (क) लब्धदत्तः <u>अल्पसंतुष्टः लोभरहितः</u> आसीत्।
   (ख) सः <u>राजदर्शनम्</u> इच्छति।
   (ग) त्वं <u>पीतवस्त्रं</u> कथं धारयसि।
   (घ) एतत् <u>उपहारार्थम्</u> एव।
9. क्त्वा/ल्यप् प्रत्यययोगेन वाक्यपूर्तिः क्रियन्ताम्
   (क) साधुः तस्मै एकरूप्यकं (दा + क्त्वा) ............. फलं क्रीतवान्।
   (ख) मन्त्री लब्धदत्तं (परि + ज्ञा + ल्यप्) ................ अवदत्।
   (ग) लब्धदत्तः रत्नानि (दृश् + क्त्वा).................. चकितः जातः।
   (घ) मन्त्रिन्! राष्ट्रभक्तं यथोचितं (सत् + कृ + ल्यप्) प्रेषयतु।

10. उचित धातुरूपेण वाक्यपूर्तिः क्रियन्ताम्

(क) वयम् शिक्षिताः .................................... (भवामि / भवामः)

(ख) त्वम् चित्रम् द्रष्टुं ................................ (शक्ष्यति / शक्ष्यसि)

(ग) छात्रः पुस्तकं ................................ (क्रीणातु / क्रीणीहि)

(घ) सायम् मम जन्मोत्सवः .......................... (भू + लङ्)

(ङ) सः पुरस्कारम् ....................................... (आप् + लट्)

## 9.7 उत्तराणि

**9.2 बोधप्रश्नाः**

1. (क) प्रतीहारी – राजानम् (ख) मन्त्री – राजानम्
(ग) व्यापारी – राजानम् (घ) साधुः – राजानम्
(ङ) नर्तकी – राजानम्

2. (i) जयतु (ii) उदरपूर्तिः (iii) विक्रेतुम् (iv) परम्
(v) दोषः (vi) भयेन (vii) भवतः (viii) विनम्रः
(ix) अभिमानरहितः (x) एतत्

3. (क) इच्छति (ख) करोमि (ग) स्वीकरोतु (घ) अर्पयामि
(ङ) खण्डयतु

**पाठगतप्रश्नाः**

**9.1** 1. (क) हे मन्त्रिन् (ख) राजा (ग) हे महाराज (घ) दर्शनाभिलाषी

2. (क) आगतवान् (ख) याचितवान् (ग) स्वीकृतवान् (घ) गृहीतवान्

3. (क) दानवीरता (ख) तीक्ष्णा स्मृतिः (ग) विनम्रता (घ) चातुर्यम्
(ङ) परहितचिन्ता

**9.2** 1. (क) साधुः नर्तकी च तत् दिव्यं फलं क्रीत्वा आनीतवन्तौ।

(ख) साधुः लब्धदत्ताय एकं रूप्यकं दत्त्वा फलं प्राप्तवान्।

(ग) व्यापारी लब्धदत्ताय फलार्थम् वस्त्रयुगलम् अयच्छत्।

(घ) राजा तत्फलं प्राप्य पुनः लब्धदत्ताय दतवान्।

2. (क) अल्पसन्तुष्टः (ख) लोभविरहितः (ग) अतिथिगृहम् (घ) जीर्णवस्त्रम्
(ङ) राजभक्त्या

3. (क) गच्छतु (ख) आह्वयतु (ग) प्रेषयतु
(घ) स्वीकुरु (ङ) आह्वयतु

4. (क) एकः (ख) जीर्णवस्त्रधारिणं (ग) तत्
(घ) नूतनं (ङ) महान्

**9.3** 1. (क) प्रतीहारिन् (ख) महाराज (ग) लब्धदत्त
(घ) महाराज (ङ) महाराज

2. (क) भवते (ख) भवतां (ग) भवान्
(घ) भवतः (ङ) भवद्भिः

3. (क) अनुगृहीतोऽस्मि (ख) कोऽपि (ग) नास्ति
(घ) अल्पेनैव (ङ) उपहारार्थम्

4. (क) मित्रम्/मित्रेण/मित्रात् (ख) निर्धनाय
(ग) कोलहलेन (घ) गजाय

**9.6 पाठान्तप्रश्नाः**

1. (क) लब्धदत्तः (ख) बहुमूल्यं (ग) एकं रूप्यकम् (घ) व्यापारी
(ङ) त्रिवारं (च) बुभुक्षाशमनार्थम् (छ) पतितानि दिव्यरत्नानि
2. (क) राजा बुद्धिमान् प्रजावत्सलः च आसीत्।
(ख) लब्धदत्तः लोभरहितः, अल्पसन्तुष्टः, विनम्रः च असीत्।
(ग) मन्त्री उदारः आसीत्।
3. स्वेच्छया प×चवाक्यानि रचयत।
4. स्वेच्छया चतुर्वाक्यानि रचयत।
5. स्वेच्छया पंच/षट् वाक्येषु सारांशं लिखत।
6. (क) एकदा (ख) एव (ग) सह (घ) कुतः (ङ) अत्र
7. (क) आनीतवान् (ख) याचितवान् (ग) आगतवान् (घ) आनीतवती (ङ) विक्रीतवान्
8. (क) अल्पेन संतुष्टः, लोभात् रहितः (ख) राज्ञः दर्शनम् (ग) जीर्णम् वस्त्रम्
(घ) उपहाराय इदम्
9. (क) दत्त्वा (ख) परिज्ञाय (ग) दृष्ट्वा (घ) सत्कृत्य
10. (क) भवामः (ख) शक्ष्यसि (ग) क्रीणातु (घ) अभवत्
(ङ) आप्नोति

# 10

# पतन्ति परपीडकाः

कृष्णस्य बालचरितविषये तु भवन्तः पठितवन्तः श्रुतवन्तः च। लोकप्रियं सुखदम् अद्भुतं च कृष्णस्य बालचरितम् इति वयं जानीमः एव। कृष्णः वसुदेवस्य पुत्रः आसीत्। देवकी च तस्य जननी अभवत्। मथुराधिपः कंसः अतीव प्रजापीडकः आसीत्। कृष्णः बाल्यकाले एव तं दुष्टं कंसं हतवान्। पाठेऽस्मिन् कृष्णस्य तदद्भुतं बालचरितं नाट्यशैल्यां प्रस्तुतं वर्तते। तद्विषये ज्ञातुं वयम् इमं पाठं पठामः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- भासकवेः परिचयं लेखितुं शक्तः भविष्यति;
- कृष्णस्य चरित्रचित्रणं कर्तुं समर्थः भविष्यति;
- पाठस्य सारं स्वशब्दैः लेखितुं शक्ष्यति;
- पद्यांशानां वाक्यांशानां च भावार्थं चेष्यति;
- संवादकौशलपूर्वकम् अभिनयं कर्तुं क्षमः भविष्यति;
- 'लोट्' लकारे प्रयुक्तानि वाक्यानि लट्लकारे परिवर्तयिष्यति;
- परसवर्णसन्धिं कर्तुं शक्ष्यति;
- अव्ययीभाव– द्वन्द्व–द्विगु–समासानाम् उदाहरणानि चित्वा समासविग्रहं करिष्यति;
- शतृ–शानच् प्रत्ययान्तपदानि चेष्यति।

## क्रियाकलापः

अधः चित्रं पश्यतु



10.1

उपर्युक्तं चित्रं दृष्ट्वा कोष्ठके प्रदत्तपदानां च सहायतया इमानि वाक्यानि पूरयत

(मथुरां, देवकी, कृष्णः, दुष्टः, अत्याचारी, उग्रसेनस्य, वसुदेवेन)

(क) कंसः ––––– पुत्रः अभवत्।

(ख) सः अतीव–––––– आसीत्।

(ग) ––––––––––कंसस्य भगिनी आसीत्।

(घ) देवक्याः विवाहः ––––– सह अभवत्।

(ङ.) –––––– वसुदेव–देवक्योः पुत्रः आसीत्।

(च) बलरामः कृष्णः च –––––– गतवन्तौ।

(छ) आश्चर्यम् ––––– कंसः तु बालकृष्णेन हतः।

## 8.1 मूल पाठः

### पतन्ति परपीडकाः

अयं नाट्यांशः महाकवेः भासस्य 'बालचरितम्' नाम नाटकात् संगृहीतः। प्रथमं वयं अत्रत्यानां पात्राणां विषये जानीमः पश्चात् च पाठं पठिष्यामः।

**पात्र–परिचयः**

| | | |
|---|---|---|
| राजा | – | मथुराधिपतिः कंसः |
| भटः | – | ध्रुवसेनः नाम राजसेवकः |
| चाणूरः/मुष्टिकः | – | द्वौ मल्लौ (दो पहलवान) |

दामोदरः – वसुदेवस्य पुत्रः श्रीकृष्णः, नन्दपुत्रः अपि कथ्यते
बलरामः – श्रीकृष्णस्य अग्रजः
प्रतीहारी – मधुरिका नाम सेविका द्वारं रक्षति
कुब्जिका – मदनिका नाम सेविका

**राजा** (आत्मगतम्) नूनम् अद्य बलरामेण सह दामोदरं रङ्गगतं मल्लेन घातयामि। (प्रकाशम्) ध्रुवसेन! ध्रुवसेन!

**भटः** (प्रविश्य) जयतु महाराजः।

**राजा** ध्रुवसेन! किमागतो नन्दपुत्रः?

**भटः** श्रोतुमर्हति महाराजः। नन्दपुत्रः आगतः इति श्रुत्वा महामात्येन 'उत्पलापीडो, नाम गन्धहस्ती तम् अभिघातयितुं प्रेषितः। दामोदरः आयान्तं तम् अद्रिनिभं गजेन्द्रं वीक्ष्य दन्तं समाकृष्य जघान।

**राजा** कथं जघानेति। गच्छ भूयो ज्ञायतां वृत्तान्तः।

**भटः** यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। एष इदानीं नन्दगोपपुत्रः राजमार्गं प्रविश्य राजद्वारे गन्धद्रव्ययुक्तहस्तां मदनिकानाम्नीं कुब्जिकां दृष्ट्वा तस्याः हस्ताद् गन्धमादाय स्वगात्रम् अनुलिप्य तेनैव हस्तेन कुब्जरहितां पूर्णस्वस्थां तां कृत्वा धनुःशालाभिमुखो गतः।

**राजा** किन्नु खलु तेन व्यवसितम्? तेन हि शीघ्रं गच्छ। भूयो ज्ञायतां वृत्तान्तः।

**शब्दार्थाः**

नूनम्= निश्चित ही
र गतम् = मल्लशाला में,
मल्लेन = पहलवान के द्वारा
घातयामि = मरवा देता हूँ
दामोदरं = कृष्ण को
श्रोतुमर्हति = सुन सकते हैं,
प्रविशन् = प्रवेश करते हुए
महामात्येन = महामंत्री के द्वारा
गंधहस्ती = मस्ती में आया हुआ हाथी
अभिघातयितुं = मारने के लिए
आयान्तं = आते हुए
अद्रिनिभं = पर्वत के समान विशाल
वीक्ष्य = देखकर
समाकृष्य = खींचकर
जधान = मार डाला
निष्क्रम्य = निकल कर
इदानीं = इस समय
गन्धद्रव्ययुक्तहस्तां = सुगन्धित द्रव्यों को हाथ में लिये हुए
स्वगात्रम् = अपने शरीर पर
अनुलिप्य = चुपड़कर
कुब्ज = कूबड़
कुब्जिकां = कुबड़ी को
धनुःशालाभिमुखः = धनुःशाला की ओर
व्यवसितम् = किया गया



**भटः** यदाज्ञापयति महाराजः। (निष्क्रम्य प्रविश्य) जयतु महाराजः। धनुःशालारक्षकेण सिंहबलेन वार्यमाणः तं कर्णमूले प्रहारं कृत्वा धनुः समादाय द्विखण्डं कृत्वा साम्प्रतं सभामण्डपं प्रति गतः।

**राजा** सावेगमिव मे हृदयम्। गच्छ यथानिर्दिष्टौ चाणूरमुष्टिकौ प्रवेशय।

**भटः** यदाज्ञापयति महाराजः। (निष्क्रान्तः)

**राजा** यावदहमपि प्रासादमारुह्य चााणूरमुष्टिकयोर्युद्धं पश्यामि। (आरुह्य) मधुरिके! विघाट्यतां द्वारम्।

**प्रतिहारी** यद् भर्ता आज्ञापयति।

(राजा प्रविश्योपविशति)

(ततः प्रविशतः चाणूरमुष्टिकौ)

**भटः** एष महाराजः। उपसर्पेतां भवन्तौ।

**उभौ** (उपेत्य) जयतु भर्ता।

**राजा** चाणूरमुष्टिकौ! सर्वप्रयत्नेन युवाभ्यामानृण्यं कर्तव्यम्।

**उभौ** श्रृणोतु भर्ता। करणसन्धाबन्धप्रहारैः युद्धविशेषैः सिद्धिं गच्छामः।

**राजा** बाढमेवं क्रियताम्। ध्रुवसेन। प्रवेशय गोपदारकौ।

**भटः** यदाज्ञापयति महाराजः। (निष्क्रान्तः)

(ततः प्रविशतः दामोदरबलरामौ ध्रुवसेनेन सह)

**भटः** एष महाराजः। उपसर्पेतां भवन्तौ।

**उभौ** आः कस्य महाराजः!

**भटः** सर्वस्य, जगतोऽस्माकं च।

**दामोदरः** अद्यप्रभृति न भविष्यति।

**भटः** जयतु महाराजः। एतौ तौ।

**राजा** (विलोक्य) अयं स दामोदरः। अयं नु ललितगम्भीराकृतिः पूर्वजः। ध्रुवसेन! प्रवर्ततां युद्धम्।

**भटः** यदाज्ञापयति महाराजः। (मालां क्षिपति)

वार्यमाणः = रोके जाते हुए
साम्प्रतं = इस समय
सावेगम् = आवेश सहित
विघाट्यतां = खोल दो
उपसर्पेतां = पास आएँ
उपेत्य = पास जाकर
आनृण्यं = ऋण मुक्त
करणसन्धाबन्धप्रहारैः = करणसन्ध और आबन्ध प्रहारों से
सिद्धिं = सफलता को
बाढम् = अच्छा
प्रवेशय = प्रवेश करायें
अद्यप्रभृति = आज से
अ घो = अरे
ललित = सुन्दर
पूर्वजः = बड़ा भाई
रामः = बलराम
प्रवर्ततां = शुरू करो

टिप्पणी

**मल्लौ** अङ्घो! वादयत वादयत सङ्ख्यपटहान्।

**चाणूरः** एहि दामोदर! अद्य मे भुजबलेन सिद्धिं गच्छ।

**दामोदरः** प्राप्तोऽस्मि, तिष्ठ, मम वेगमिमं सहस्व।

**मुष्टिकः** ए ए राम! अद्य मे मुष्टिप्रहारैः गलितरुधिरगात्रः जीवितमुज्झसि।

**बलरामः** त्वामद्य मुष्टिक! यमाय निवेदयामि।
(सर्वे युद्धं कुर्वन्ति)

**दामोदरः** (चाणूरं निहत्य) भग्नास्थिरेष निहतः।

**बलरामः** निहतो मयापि।

वादयत= बजाओ
सङ्ख्यपटहान् = युद्ध के बाजों को।
सहस्व = सहो
गलितरुधिरगात्रः = खून से भीगे शरीरवाला
उज्झसि = छोड़ दोगे
निहतः = मार दिया गया
निगृह्य = पकड़कर
विस्तीर्णलोहितमुखः = मुख से बहते हुए रक्त वाला
परिवृत्तनेत्रः घूम गए हैं नेत्र जिसके
अंस = कंधे
पतिता गद = भुजा का भूषण गिर गया है
लम्बसूत्रः = यज्ञोपवीत
वज्रप्रभग्नशिखरः = वज्र से टूटे शिखर वाले
अक्षयविजयिनौ = तुम दोनो सदा विजयी हो



10.3

**दामोदरः** कंसासुरं च यमलोकमहं नयामि।
(प्रासादमारुह्य कंसं शिरसि निगृह्य पातयित्वा)
एष एव दुरात्मा कंसः!
विस्तीर्णलोहितमुखः परिवृत्तनेत्रो
भग्नांसकण्ठकटिजानुकरोरूजङ्घः।
विच्छिन्नहारपतिताङ्गदलम्बसूत्रो
वज्रप्रभग्नशिखरः पतितो यथाद्रिः।।
(नेपथ्ये)
हा हा महाराजः!



10.4

(ततः प्रविशति वसुदेवः)

**बलरामः** (विलोक्य) अये तात! बलरामोऽहम् अभिवादये।

**दामोदरः** तात! दामोदरोऽहम् अभिवादये।

**वसुदेवः** (सस्नेहं विलोक्य) अक्षयविजयिनौ भवेतां भवन्तौ। सत्पुत्रजन्मफलमद्य प्राप्तवानस्मि।

**उभौ** अनुगृहीतौ स्वः।

## 10.2 बोधप्रश्नाः

उपयुक्तम् उत्तरं (✓) चिह्नीकुर्वन्तु

1. बलरामेण सह दामोदरं कः हन्तुम् इच्छति?

   (क) राजा कंसः (ख) भटः ध्रुवसेनः (ग) मदनिका नाम दासी

2. कुब्जिकां कुब्जरहितां पूर्णस्वस्थां च कः अकरोत्?

   (क) बलरामः (ख) श्रीकृष्णः (ग) कंसः

3. चाणूरः मुष्टिकः च किमर्थम् आहूतौ?

   (क) मेलनाय (ख) खेलनाय (ग) दामोदरं बलरामं च मारणाय

4. मूलपाठं पठित्वा रिक्तस्थानपूर्तिः क्रियताम्

   (क) दामोदरः अद्रिनिभं गजेन्द्रं ........................ समाकृष्य हतवान्।

   (ख) दामोदरः धनुः समादाय ........................ कृत्वा साम्प्रतं सभामण्डपं गतः।

   (ग) वादयत वादयत ........................ ।

   (घ) वज्रप्रभग्नशिखरः ........................ यथाद्रिः।

5. एतेषां कथनानां कः कः वक्ता? प्रत्येकं सम्मुखं लिखन्तु

   (क) दामोदरं रङ्गगतं मल्लेन घातयामि। ........................ ........................

   (ख) एष महाराजः। उपसर्पेतां भवन्तौ। ........................ ........................

   (ग) युवाभ्यामानृण्यं कर्त्तव्यम्। ........................ ........................

   (घ) तिष्ठ, मम वेगमिमं सहस्व। ........................ ........................

   (ङ.) अक्षयविजयिनौ भवेतां भवन्तौ। ........................ ........................

---

## 10.3 अधुना अवगच्छामः

### प्रथमः अंशः

**राजा आत्मगतम् ........................................... प्रविश्योपविशति।**

इदानीं पुनः पठामः यत् कथं कंसः विविधैः षड्यन्त्रैः कृष्णं बलरामं च हन्तुं प्रयासं करोति।

**व्याख्या**

कः बलरामेण सह दामोदरं घातयितुं चिन्तयति? राजा कंसः। राजा कंसः दामोदरं कुत्र केन च घातयितुं विचारयति? रङ्गशालायाम्, मल्लेन।

टिप्पणी

दामोदरं दण्डयितुं महामात्येन किं कृतम्? महामात्येन दामोदरं मारयितुं उत्पलापीडः नाम गन्धहस्ती प्रेषितः। गजेन्द्रः केन समः आसीत्? गजेन्द्रः अद्रिनिभः (पर्वतेन सदृशः विशालः) आसीत्। दामोदरः आयान्तं पर्वतसदृशं गजेन्द्रं वीक्ष्य किम् किम् अकरोत्? दामोदरः तु आयान्तं तं पर्वतसदृशं विशालं गजेन्द्रं वीक्ष्य तस्य दन्तम् आकृष्य हतवान्। मदनिका का आसीत्? सा 'कुब्जिका' इति कथम् कथ्यते? मदनिका राजसेविका आसीत्। तस्याः पृष्ठं कुब्जम् आसीत्। एतस्मात् कारणात् सा कुब्जिका इति कथ्यते। मदनिकायाः हस्ते किम् आसीत्? गन्धद्रव्याणि। गन्धद्रव्याणि दृष्ट्वा दामोदरः किम् अकरोत्? दामोदरः तस्याः हस्ताद् गन्धद्रव्याणि गृहीत्वा स्वशरीरे अनुलिम्पति। दामोदरः मदनिकायाः गन्धद्रव्याणि स्वशरीरे अनुलिप्य तां कुब्जिकां किम् अकरोत्? दामोदरः तां कुब्जिकां कुब्जरहिताम् अकरोत्। कृष्णः कुब्जिकां पूर्णस्वस्थां कृत्वा कुत्र गतः? कृष्णः कुब्जिकां पूर्णस्वस्थां कृत्वा धनुःशालां गतः। कृष्णः धनुःशालां प्राप्य किम् अकरोत्? कृष्णः तत्र. स्थापितं धनुः द्विखण्डं कृतवान्। "धनुः समादाय द्विखण्डं कृत्वा साम्प्रतं सभामण्डपं गतः" इति वार्ता कः कं प्रति ज्ञापयति? भटः महाराजं प्रति। 'सावेगमिव मे हृदयम्' इति कः अनुभवति? कथम् च? राजा कंसः, यतः उत्पलापीडहस्तिनः हनने, कुब्जिकास्वस्थकरणे, धनुर्भङ्गकरणे च कृष्णस्य अतुलः पराक्रमः दृश्यते। चाणूरमुष्टिकौ कौ? कंसस्य विशिष्टौ मल्लौ।

**प्रथमांशसारः**

कंसः विविधैः षड्यन्त्रैः कृष्णं बलरामं च घातयितुमिच्छति। कृष्णः बलरामः च मथुरानगरं प्रविशतः। मन्त्रिणा पीडितः मदोन्मत्तः उत्पलापीडनामकः हस्ती अपि हतः। राजद्वारे स्थितायाः मदनिका नाम कुब्जायाः कुब्जत्वं दूरीकृतम्। ततश्च धनुःशालां प्राप्य धनुर्भङ्गः कृतः। कंसः अतीव उद्विग्नः सन् चाणूर–मुष्टिकौ मल्लौ आह्वयति येन तौ तु युद्ध्वा कृष्णबलरामौ हन्येताम्। एतैः कृत्यैः कृष्णस्य अद्भुतं पराक्रमकौशलं सिद्ध्यति।

राजा कंस मल्लशाला में दामोदर और बलराम को बुलाकर मरवाना चाहता है। इधर भट राजा को सूचना देता है कि दामोदर (कृष्ण) ने बलराम के साथ नगर में प्रवेश कर मन्त्री द्वारा प्रेषित मतवाले उत्पलापीड नामक हाथी को भी मार डाला। राजद्वार में खड़ी मदनिका कुब्जा के कुबड़ेपन को दूर कर दिया। उसके बाद धनुःशाला में धनुष के दो टुकड़े कर दिये। राजा कंस यह सुनकर दुःखी होता है और चाणूर व मुष्टिक नामक दो पहलवानों को, उन दोनों को युद्ध में मरवाने के लिए बुलाता है।

## व्याकरणबिन्दवः

अत्र वयं पदानां विविधं स्वरूपं पश्यामः।

**सन्धिविच्छेदः**

| | | |
|---|---|---|
| यदाज्ञापयति | = यत् | + आज्ञापयति |
| धनुःशालाभिमुखः | = धनुःशाला | + अभिमुखः |
| प्रविश्योपविशति | = प्रविश्य | + उपविशति |

**प्रकृतिप्रत्यययोगः**

(i) आदिश्य = आ+दिश्+ल्यप्

(ii) आच्छिद्य = आ+छिद्+ल्यप्

(iii) प्रविशन् = प्र+विश्+शतृ, पुं. प्र. ए.

(iv) गृहीतवान् = ग्रह+क्तवतु, पु. प्रथमा एकवचनम्

(v) आयान्तम् = आ+या+शतृ, पुं. द्वि.ए.

(vi) समाकृष्य = सम्+आ+कृष्+ ल्यप्

(vii) आदाय = आ+ दा+ल्यप्

(viii) प्रहृत्य = प्र+हृ+ल्यप्

(ix) वार्यमाणः = वृ+णिच्+शानच्

(x) निष्क्रान्तः = निस्+क्रम्+क्त, पुं., प्र. ए.

**क्रियापदपरिचयः**

जयतु = जि, लोट्, प्र.पु., ए.

प्रवेशय = प्र+विश्+णिच्, लोट्, म.पु.ए.

गच्छ = गम्, लोट् म.पु.ए.

**समस्तपदविग्रहाः**

नन्दगोपपुत्रः = नन्दगोपस्य पुत्रः (ष. त.)

सभामण्डपम् = सभायाः मण्डपम् (ष.त.)

सावेगम् = आवेगेन सह (अव्ययी.)

## शतृ–शानचौ

शतृ (अत्) शानच् (आन/मान) वर्तमानकालिक–कृत्प्रत्ययौ। शतृ–शानच् प्रत्ययान्तशब्दौ विशेषणरूपे भवतः। अतः एतयोः त्रिषु लिङ्गेषु रूपाणि भवन्ति।

यथा– (i) बालः चित्रं <u>पश्यन्</u> (दृश् + शतृ) खादति।

(ii) <u>क्रीडन्तं</u> (क्रीड् + शतृ) शिशुं पश्य।

(iii) <u>मोदमानः</u> (मुद् + शानच्) छात्रः आगच्छति।

(iv) उपहारं <u>लभमाना</u> (लभ् + शानच्) बालिका मोदते।

(v) अत्र भ्रमत् (भ्रम् + शतृ) चक्रं वर्तते।


एवं शतृ (अत्) प्रत्ययः परस्मैपदिधातुभ्यः, शानच् (आन/मान) प्रत्ययः आत्मनेपदि धातुभ्यः लगति।

## पाठगतप्रश्नाः 10.1

1. प्रश्नानाम् उत्तराणि लिखत
   (क) रङ्गगतं दामोदरं कः मल्लेन घातयितुम् इच्छति?
   (ख) रजकेभ्यः वस्त्राणि आच्छिद्य कः गृहीतवान्?
   (ग) महामात्येन दामोदरम् अभिघातयितुं कः प्रेषितः?
   (घ) मदनिका का आसीत्? सा कुत्र स्थिता आसीत्?
   (ङ.) धनुःशालां गत्वा दामोदरः किम् अकरोत्?
   (च) चाणूर–मुष्टिकौ कौ आस्ताम्?
2. विशेषण–विशेष्यमेलनं क्रियताम्

| क | ख |
|---|---|
| (क) रङ्गगतम् | (i) गजेन्द्रम् |
| (ख) अद्रिनिभम् | (ii) दामोदरम् |
| (ग) सावेगम् | (iii) कुब्जिकाम् |
| (घ) गन्धद्रव्ययुक्तहस्तां | (iv) हृदयम् |

3. प्रकृतिप्रत्यययोः योगः क्रियताम्
   यकथा प्र+विश्+ल्यप् = प्रविश्य
   (क) सम्+आ+कृष्+ल्यप् = ----------
   (ख) अनु+लिप्+ल्यप् = ----------
   (ग) प्र+हृ+ल्यप् = ----------
   (घ) प्र+विश्+शतृ = ----------
   (ङ) गम्+क्त = ----------
   (च) श्रु+तुमुन् = ----------
   (छ) हन्+क्त्वा = ----------
7. सन्धिः क्रियताम्
   (क) गज+इन्द्रम् = ----------
   (ख) यत्+आज्ञापयति = ----------
   (ग) तेन+ एव = ----------
   (घ) शीघ्रम्+गच्छ = ----------





## द्वितीयः अंशः

**ततः प्रविशति चाणूर ................................ सर्वे युद्धं कुर्वन्ति।**

अधुना पुनः पठामः यत् भयाकुलः कंसः मल्लयुद्धे निपुणौ चाणूरमुष्टिकौ कथं प्रेरयति–

**व्याख्या**

'सर्वप्रयत्नेन युवाम्यामानृण्यं कर्तव्यम्'' इति कः कौ प्रति कथयति। राजा कंसः चाणूरमुष्टिकौ प्रति आनृण्यं कं प्रति? कंसं प्रति। आनृण्यं कथं स्यात्? युद्धे कृष्णबलरामौ हत्वा एव राज्यभोगभुक्तानां निस्तारः स्यात्। चाणूर–मुष्टिकौ कस्मिन् युद्धविशेषे कुशलौ अस्ताम्? करणसन्ध–आबन्धयुद्धप्रहारेषु कुशलौ आस्ताम्। 'ललितगम्भीराकृतिः पूर्वजः' अत्र 'पूर्वजः' कः कथितः? बलरामः। 'अद्य मे भुजबलेन सिद्धिं गच्छ' इति कथनं कस्य कम्प्रति? चाणूरस्य दामोदरं प्रति। ''अद्य मे मुष्टिप्रहारैः गलितरुधिरगात्रः जीवितमुज्झसि'' इति कथनं कस्य कम्प्रति? मुष्टिकस्य बलरामं प्रति। 'गलितरुधिरगात्रः जीवितमुज्झसि' अस्य कः भावः? मम मुष्टिप्रहारैः तवशरीरात् रक्तधाराः प्रवाहिताः स्युः अतः रक्तशून्यं तव जीवनमपि गतं स्यात्।

**द्वितीयांशसारः**

कृष्णस्य अद्भुतकृत्यैः भीतः राजा कंसः विशिष्टमल्लौ चाणूरमुष्टिकौ प्रेरयति येन तौ मल्लयुद्धे कृष्णबलरामौ हत्वा तस्य ऋणमुक्तौ भवेताम्। ततः चाणूर–कृष्णयोः, मुष्टिक–बलरामयोः च परस्परं घोरं मल्लयुद्धं भवति। सर्वे पश्यन्ति।

कृष्ण के अद्भुतकार्यों से डरा हुआ कंस कुश्ती में निपुण चाणूर और मुष्टिक से कृष्ण और बलराम को मारकर राजा के प्रति ऋण से मुक्त होने के लिए कहता है। दोनों उसे कृष्ण और बलराम को मारने का पूर्ण विश्वास दिलाते हैं। युद्ध के लिए नगाड़े बजते हैं। दामोदर का चाणूर के साथ तथा बलराम का मुष्टिक के साथ युद्ध होता है।

## व्याकरणबिन्दवः

अत्रापि वयं पद–परिचयादीन् व्याकरणबिन्दून् बोधामः।

**(क) सन्धिविच्छेदः**

जगतोऽस्माकम् = जगतः + अस्माकम् (पूर्वरूपम्)
पूर्वजोऽस्य = पूर्वजः + अस्य (पूर्वरूपम्)
प्राप्तोऽस्मि = प्राप्तः + अस्मि (पूर्वरूपम्)

**(ख) पदपरिचयः**

उपसर्पेताम् – उप+सृप् विधिलिङ्, प्र. पु. द्वि.
प्रवेश्येताम् – प्र+ विश्+यक्, लोट, प्र. पु. द्वि.

| | | | | |
|---|---|---|---|---|
| एहि | – | इण्, | लोट्, | म. पु. ए. |
| तिष्ठ | – | स्था, | लोट्, | म. पु. ए. |
| सहस्व | – | सह्, | लोट् | म. पु. ए. |
| शृणोतु | – | श्रु, | लोट्, | प्र. पु. ए. |
| गच्छ | – | गम्, | लोट्, | म. पु. ए. |

**(ग) विग्रहः**

| | | | |
|---|---|---|---|
| चाणूरमुष्टिकौ | – | चाणूरः च मुष्टिकः च | (द्वन्द्वः) |
| महाराजः | – | महान् च असौ राजा | (कर्मधारयः) |
| सर्वप्रयत्नेन | – | सर्वः प्रयत्नः तेन | (कर्मधारयः) |
| गोपदारकौ | – | गोपस्य दारकौ | (षष्ठी तत्पुरुषः) |
| दामोदर बलरामौ | – | दामोदरः च बलरामः च | (द्वन्द्वः) |
| गलितरुधिरगात्रः | – | गलितं रुधिरं गात्रेभ्यः यस्य सः | (ब.व्री.) |
| ललितगम्भीराकृतिः | – | ललिता गम्भीरा च आकृतिः यस्य सः | (ब. व्री.) |
| मुष्टिप्रहारैः | – | मुष्टेः प्रहाराः तैः | (षष्ठी तत्पुरुषः) |

## पाठगतप्रश्नाः 10.2

1. प्रश्नान् उत्तरत

(क) 'युवाभ्यामानृण्यं कर्तव्यम्' इति कंसः कौ प्रति कथयति?

(ख) चाणूरमुष्टिकौ कस्मिन् युद्धविशेषे दक्षौ आस्ताम्?

(ग) बलरामः स्वरूपेण कीदृशः आसीत्?

(घ) 'तिष्ठ, मम वेगमिमं सहस्व' इति कः कं प्रति उक्तवान्?

2. इमानि वाक्यानि लोट्लकारे परिवर्तयत

यथा– बालः अतिथिं नमति। (लट् लकारे) = बालः अतिथिं नमतु।

(क) उमा कथां शृणोति = ––––––––––

(ख) त्वम् अपि तत्र तिष्ठसि = ––––––––––

(ग) आचार्यः उपदिशति = ––––––––––

(घ) त्वम् तत्र गच्छसि = ––––––––––

(ङ) यूयम् ढक्कां वादयथ = ––––––––––

3. रेखांङ्कितपदेषु समस्तपदानि रचयन्तु

(क) अत्र कौ <u>गोपस्य दारकौ</u>?

(ख) एषः <u>महान् च असौ राजा</u> तिष्ठति।

(ग) <u>ललिता गम्भीरा आकृतिः यस्य सः</u> बलरामः अस्ति।

(ध) <u>दामोदरः च बलरामः</u> च धनुःशालां गच्छतः।

---

## तृतीयः अंशः

**दामोदरः ........................................................ अनुगृहीतौ स्वः।**

नाटकस्य अन्तिमं चरणं पुनः पठामः यत्र कृष्णः चाणूरं बलरामः च मुष्टिकं मारयतः। ततः कंसस्य वधम् अपि भवति।

**व्याख्या**

मल्लयुद्धे चाणूरं कः हतवान्? मुष्टिकं च कः? चाणूरं दामोदरः मुष्टिकं च बलरामः।

दामोदरः कंसं कथम् अमारयत्? दामोदरः प्रासादम् आरुह्य कंसं च शिरसि गृहीत्वा भूमौ नीचैः अपातयत्। ततः कंसस्य शरीरस्य कीदृशी दशा अभवत्? 1. कंसस्य मुखात् रक्तम् अवहत्। 2. नेत्रे तु परिवृत्ते। 3. स्कन्धौ, कण्ठः, कटिः, जानुः बाहू, उरू, जङ्घे च छिन्नाः जाताः।

कंसस्य आभूषणानां का स्थितिः जाता? कंसस्य हारः त्रुटितः केयूरौ पतितौ, यज्ञोपवीतः अपि शरीरात् बहिः पतितः। तदा कंसस्य शरीरं किमिव पतितं जातम्? वज्रेण खण्डितशिखरः पर्वत इव कंसस्य शरीरं पतितं तिष्ठति।

ततः वसुदेवेन स्वपुत्राभ्यां कृते कीदृशः आशीर्वादः प्रदत्तः? ''अक्षयविजयिनौ भवेताम् भवन्तौ'' इति। कृष्णस्य सामर्थ्यं कीदृशम् आसीत्? कृष्णः संसारस्य सर्वान् क्षत्रियान् पराजेतुं समर्थः आसीत्।

**तृतीयांशसारः**

युद्धे कृष्णः चाणूरं बलरामः च मुष्टिकं हन्ति। ततः परं कृष्णः प्रासादम् आरुह्य मल्लयुद्धं पश्यन्तं दुरात्मानं कंसं, शिरसि शिखां गृहीत्वा, तं भूमौ पातयति। तेन सः रक्तमुखः भग्नाङ्गशरीरः प×चत्वं गतः। ततः तत्र तयोः पिता वसुदेवः आगत्य स्वपुत्रौ कृष्णं बलरामं च स्नेहं कृत्वा आशीर्वादं यच्छति। सः अद्य ''सत्पुत्रजन्मनः फलं प्राप्तम्'' इति सहर्षम् अनुभवति।

दामोदर चाणूर को तथा बलराम मुष्टिक को युद्ध में मार देते हैं। इसके बाद कृष्ण महल में बैठे, युद्ध देखते हुए कंस को, शिर की चोटी पकड़कर, उसे नीचे गिरा कर मार देते हैं। उसके बाद उनके पिता वसुदेव आते हैं और अपने दोनों पुत्रों को आशीर्वाद देते हैं। उन्हें सत्पुत्रों का पिता होने की सुखद अनुभूति होती है।

## व्याकरणबिन्दवः

अत्र वयं पुनः पदानां सन्धिच्छेदं पदपरिचयं, विग्रहं च बोधामः।

**सन्धिच्छेदाः**


| | | | |
|---|---|---|---|
| भग्नास्थिरेषः | = | भग्न | + अस्थिः + एषः |
| मयापि | = | मया | + अपि |
| कंसासुरम् | = | कंस | + असुरम् |
| करोरुजङ्घः | = | कर | + ऊरुजङ्घः |
| यथाद्रिः | = | यथा | + अद्रिः |
| बलरामोऽहम् | = | बलरामः | + अहम् |

**पद–परिचयः**

| | | | | |
|---|---|---|---|---|
| (क) | शिरसि | = | शिरस् शब्दः | सप्तमी, ए.व0। |
| | मया | = | अस्मद्, | तृतीया ए.व.। |
| | भवन्तः | = | भवत्, | प्रथमा ब.व.। |
| (ख) | नयामि | = | नी, लट्, | उत्तमपुरुषः, ए. व.। |
| | श्रृण्वन्तु | = | श्रु, लोट्, | प्रथमपुरुषः, ब.व.। |
| | भवेताम् | = | भू, विधिलिङ्., | प्र.पु. द्वि.व.। |
| (ग) | निहतः | = | नि+ हन्+क्त (पुं. प्र. वि.ए.) | |
| | निहत्य | = | नि+ हन्+ल्यप् | |
| | निगृह्य | = | नि+ग्रह्+ल्यप् | |
| | पातयित्वा | = | पत्+णिच्+क्त्वा | |
| | प्राप्तवान् | = | प्र + आप्+ क्तवतु (पुं. प्र. वि. ए.) | |
| | विलोक्य | = | वि+ लोक्+ल्यप् | |

**विग्रहः**

| | | | |
|---|---|---|---|
| भग्नास्थिः | – | भग्नम् अस्थि यस्य सः | (बहुव्रीहिः) |
| कंसासुरम् | – | कंसः एव असुरः तम् | (कर्म) |
| दुरात्मा | – | दुष्टः आत्मा यस्य सः | (ब.व्री.) |
| विस्तीर्णलोहितमुखः | – | विस्तीर्णं लोहितं मुखात् यस्य सः | (ब. व्री.) |
| परिवृत्तनेत्रः | – | परिवृत्ते नेत्रे यस्य सः | (ब.व्री) |
| वज्रप्रभग्नशिखरः | – | वज्रेण प्रभग्नं शिखरं यस्य सः | (ब. व्री.) |
| सस्नेहम् | – | स्नेहेन सह | (अव्ययी.) |
| सत्पुत्रजन्मफलम् | – | सत्पुत्रस्य जन्म (ष.त.) सत्पुत्रजन्मनः फलम् | (ष.त.) |





## पाठगतप्रश्नाः 10.3

1. प्रश्नान् उत्तरन्तु
   (क) चाणूरं कः हतवान्?
   (ख) दामोदरः कंसं कथम् अमारयत्?
   (ग) "अक्षयविजयिनौ भवेतां भवन्तौ" इति वचनं कः कौ प्रति वदति?
   (घ) सत्पुत्रजन्मफलं कः प्राप्तवान्?
2. विशेषण–विशेष्यमेलनं क्रियताम्

| क | ख |
|---|---|
| (क) दुरात्मा | (i) भवन्तौ |
| (ख) विच्छिन्नः | (ii) हारः |
| (ग) अक्षयविजयिनौ | (iii) कंसः |

3. विग्रहवाक्यानां समस्तपदानि रचयन्तु
   (क) दुष्टः आत्मा यस्य सः –––
   (ख) परिवृत्ते नेत्रे यस्य सः ––––
   (ग) पतितं लम्बसूत्रं यस्य सः ––––
   (घ) वज्रेण प्रभग्नं शिखरं यस्य सः –––––

## व्याकरणबोधः

**(क) अनुस्वारः** – 'म्' स्थाने अनुस्वारः ( ं ) इति नियमः। कदा?

यदा "पदस्य अन्ते 'म्' भवेत् पश्चात् च व्यंजनवर्णः भवेत् तदा 'म्' स्थानेऽनुस्वारः भवति। यथा– ग्रामम् प्रति गच्छ = ग्रामं प्रति गच्छ।

हरिम् + वन्दे = हरिं वन्दे, मधुरम् हसति, = मधुरं हसति

**(ख) परसवर्णः** 'अनुस्वार' स्थाने परसवर्णः भवति।

यदि अनुस्वारात् (–ं–) परं व्यंजनवर्णः भवेत्, तदा अनुस्वारः वर्गस्य पंचमाक्षरे परिवर्तते।

यथा– सम् + गमः = सङ्गमः

मृत्युम् + जयः = मृत्यु जयः

शुभम् + करः = शुभङ्करः

**अव्ययीभावः**

पूर्वपदार्थप्रधानः अव्ययीभावः। अव्ययपदेन सह समासः भवति। अव्ययीभावसमासः षोडशप्रकारेण भवति। अन्यप्रमुखानि उदाहरणानि प्रस्तुतानि सन्ति।



| अव्ययम् | समस्तपदम् | विग्रहः |
|---|---|---|
| 1. यथा | (i) यथाशक्ति | शक्तिम् अनतिक्रम्य |
| | (ii) यथाकालम् | कालम् अनतिक्रम्य |
| 2. प्रति– | (i) प्रत्येकम् | एकम् एकम् प्रति (वीप्सा–अर्थे) |
| | (ii) प्रतिदिनम् | दिनम् दिनम् प्रति |
| 3. उप (समीपार्थे) | उपवनम् | वनस्य समीपम् |
| 4. अनु (योग्यार्थे) | अनुरूपम् | रूपस्य योग्यम् |
| 5. सह (सहितार्थे) | सस्नेहम् | स्नेहेन सह |
| 6. निर् (अभावार्थे) | निर्जनम् | जनानाम् अभावः |
| 7. आङ्. (मर्यादा/अभिविधि) | आजन्म | जन्मनः आरभ्य |
| | आजीवनम् | जीवन पर्यन्तम् |

**द्वन्द्वः** 'चार्थे द्वन्द्वः'। 'च' अर्थे वर्तमानयोः द्वयोः शब्दयोः तदधिकशब्दानां वा द्वन्द्वः समासः भवति। द्वन्द्वः मुख्यतः द्विधा– इतरेतरः समाहारश्च।

**इतरेतरः**– द्वयोः पदयोः भवति, बहूनां पदानाम् अपि भवति। पदयोः पदानाम् वा एकस्मिन् क्रियापदे अन्वयः।

यथा– हरिः च हरः च = हरिहरौ

शिवः च केशवः च = शिवकेशवौ

माता च पिता च = मातापितरौ/पितरौ

चाणूरः मुष्टिकः च = चाणूरमुष्टिकौ

हेमन्तः च शिशिरः च वसन्तः च = हेमन्तशिशिरवसन्ताः

**समाहारद्वन्द्वः**– समाहारः = समूहः। विग्रहे 'समाहार' शब्दस्य प्रयोगः भवति।

यथा– पाणी च पादौ च एतेषां समाहारः = पाणिपादम्

अहिः च नकुलः च तयोः समाहारः= अहिनकुलम्

**द्विगुः**– सङ्ख्यावाचकपदस्य अन्यपदेन सह समासः भवति। विग्रहे 'समाहार' शब्दस्य प्रयोगः क्रियते। समासान्ते स्त्रीलि ˙ नपुंसकलि ˙ वा भवति।

यथा– त्रयाणाम् भवनानाम् समाहारः = त्रिभुवनम्

चतुर्णां युगानां समाहारः = चतुर्युगम्

त्रयणां लोकानां समाहारः = त्रिलोकी

प चानां वटानां समाहारः = प चवटी

नवानां रात्रीणां समाहारः = नवरात्रम्

## 10.4 किम् अधिगतम्

- दामोदरस्य बालचरितम् अत्यदभुतम् अस्ति।
- उग्रसेनस्य पुत्रः कंसः अतीव दुष्टः आसीत्।
- मधुराधिपः कंसः दामोदरं मारयितुं नैकान् यत्नान् अकरोत्।
- दामोदरः गजेन्द्रं हत्वा मदनिकां कुब्जिकां कुब्जरहिताम् अकरोत्
- दामोदरः धनुःशालायाम् धनुः द्विखण्डं कृत्वा चाणूरं हतवान्, मुष्टिकं च बलरामः हतवान्।
- दामोदरः प्रासादे स्थितं कंसं शिरसि निगृह्य पातयित्वा च अमारयत्।
- परसवर्णः तु वर्गीयपंचमाक्षरस्य नियमः।
- अव्ययीभावः पूर्वपदप्रधानः द्वन्द्वः उभयपदप्रधानः, द्विगुः च पूर्वपदसंख्याप्रधानः भवति।
- शतृ–शानच्प्रत्ययौ वर्तमानकालिककृत्प्रत्ययौ।

## 10.5 योग्यताविस्तारः

**(क) कविपरिचयः** महाकविः भासः कालिदासात् अपि पूर्ववर्ती कविः अस्ति। अस्य कालः ईसातः पूर्वं पंचमी षष्ठी वा शताब्दी इति डॉ. गणपतिः घोषयति। महाकवेः भासस्य त्रयोदश नाटकानि प्रसिद्धानि। सर्वप्रथमं टी. गणपतिः शास्त्री एव एतेषां पाण्डुलिपिं लब्धवान्। एतानि नाटकानि सन्ति–

1. स्वप्नवासवदत्तम् 2. प्रतिज्ञायौगन्धरायणम् 3. अविमारकम् 4. चारुदत्तम् 5. प्रतिमा 6. अभिषेकम् 7. पंचरात्रम् 8. दूतवाक्यम् 9. मध्यमव्यायोगः 10. दूतघटोत्कचम् 11. कर्णभारम् 12 ऊरुभङ्गम् 13. बालचरितम्

**(ख) ग्रन्थपरिचयः** 'बालचरितम्' पंचाङ्कमितं सुन्दरं नाटकम्। प्रस्तुतः पाठः अस्मादेव नाट्यग्रन्थात् उद्धृतः। अस्य कथानकः महाभारतम् आधृतः वर्तते। अस्मिन् नाटके श्रीकृष्णस्य जन्मनः आरभ्य कंसवधपर्यन्तम् कथावस्तु सरसं सुललितं च सुबद्धम् अस्ति।

**(ग) भावविस्तारः**

**राजा**

(क) प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।
नात्मप्रियं प्रियं राज्ञः प्रजानां तु प्रियं प्रियम्'' । (कौटिल्यः)

(ख) नृपस्य प्रियं प्रभो धर्मः प्रजानां परिपालनम्
दुष्टनिग्रहणं नित्यं न नीत्यान्तौ विना ह्युभे।। (शुक्रनीतिः)

(ग) रंजिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते। (महाभारते शान्तिपर्व)

(घ) मोहाद्राजा स्वराष्ट्रं य कर्षयत्यनवेक्षया।
सोऽचिराद् भ्रश्यते राजा जीविताच्च सबान्धवः।। (मनुस्मृतिः)

(ङ.) आपत्त्यात्मनि प्रायो दोषोऽन्यस्य चिकीर्षतः। (कथासरित्सागरम्)

(च) विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय
खलस्य साधोः विपरीतमेतत्
ज्ञानाय दानाय च रक्षणाय।।

(छ) अष्टादश पुराणेषु व्यासस्य वचनद्वयम्
परोपकारः पुण्याय पापाय परपीडनम्।।

**(घ) भाषाविस्तारः**

**'लोट्' लकारे प्रयुक्तानां वाक्यानां लट् लकारे परिवर्तनम्**

'लट्' लकारे क्रियापदानि (वर्तमानकालिके)

उदाहरणार्थ – 'गम्' धातुः

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथम पुरुषः | गच्छति | गच्छतः | गच्छन्ति |
| मध्यम पुरुषः | गच्छसि | गच्छथः | गच्छथ |
| उत्तम पुरुषः | गच्छामि | गच्छावः | गच्छामः |

'लोट्' लकारे क्रियापदानि (आज्ञार्थके)

| | | | |
|---|---|---|---|
| प्रथम पुरुषः | गच्छतु | गच्छताम् | गच्छन्तु |
| मध्यम पुरुषः | गच्छ | गच्छतम् | गच्छत |
| उत्तम पुरुषः | गच्छति | गच्छाव | गच्छाम |

**विशेषः** कर्तृपदानुसारम् एव क्रियापदं प्रयुज्यते। कर्तृपदं प्रथमपुरुषः भवति, अथवा मध्यमपुरुषः भवति अथवा उत्तमपुरुषः भवति तर्हि क्रियापदम् अपि तमेव पुरुषं वचनं च अनुसरति। अत्र वयम् पश्यामः।

**आज्ञा–पालनम्**

| 'लोट्' लकारे प्रयुक्तवाक्यानि | लट् लकारे प्रयुक्तवाक्यानि |
|---|---|
| 1. बालकः विद्यालयं गच्छतु। | बालकः विद्यालयं गच्छति। |
| 2. बालकौ विद्यालयं गच्छताम्। | बालकौ विद्यालयं गच्छतः। |
| 3. बालकाः गृहं गच्छन्तु। | बालकाः गृहं गच्छन्ति। |
| 4. त्वम् उद्यानम् गच्छ। | त्वम् उद्यानं गच्छसि। |

| | |
|---|---|
| 5. युवाम् नदीम् गच्छताम्। | युवाम् नदीम् गच्छथः। |
| 6. यूयम् तडागम् गच्छत। | यूयम् तडागं गच्छथ। |
| 7. अहम् वाटिकां गच्छानि। | अहम् वाटिकां गच्छामि। |
| 8. आवाम् विपणिं गच्छाव। | आवाम् विपणिं गच्छावः। |
| 9. वयम् देवालयं गच्छाम। | वयम् देवालयं गच्छामः। |

**एवमेव**

| **लोट् (आज्ञा)** | **लट् (वर्तमानकालः)** |
|---|---|
| 1. सूर्यः उदेतु। | सूर्यः उदेति। |
| 2. सर्वे सुखिनः भवन्तु। | सर्वे सुखिनः भवन्ति। |
| 3. छात्राः सत्यं वदन्तु। | छात्राः सत्यं वदन्ति। |
| 4. श्रुतिः प्रीतिः च गीतं गायताम्। | श्रुतिः प्रीतिः च गीतं गायतः। |
| 5. मेघाः जलं वर्षन्तु। | मेघाः जलं वर्षन्ति। |
| 6. त्वम् दुग्धं पिब। | त्वम् दुग्धं पिबसि। |
| 7. युवाम् प्रश्नं पृच्छतम्। | युवाम् प्रश्नं पृच्छथः। |
| 8. यूयम् स्वकर्त्तव्यम् पालयत। | यूयम् स्वकर्त्तव्यम् पालयथ। |
| 9. किं भोः, अहम् अन्तः प्रविशानि? | अहम् अन्तः प्रविशामि। |
| 10. किम् आवाम् नाटकं पश्याव? | अस्तु, आवां नाटकं पश्यावः। |
| 11. किम् वयम् स्वघटनां कथयाम? | आम्, वयम् स्वघटनां कथयामः। |

वयं पश्यामः यत् उपर्युक्तवाक्येषु प्रतिवाक्यं क्रियापदं कर्तृपदानुसारमेव पुरुषं वचनं च अनुसरति। लोट् लकारस्य वाक्यानां लट् लकारे परिवर्तनं तु तात्पर्यतः 'आज्ञायाः परिपालनमेव' भवति।

## 10.6 पाठान्तप्रश्नाः

1. एकेन वाक्येन उत्तरं दीयताम्

(क) राजा कंसः रङ्गगतं कम् घातयितुम् इच्छति?

(ख) दामोदरः कस्याः कुब्जं दूरीकृतवान्?

(ग) चाणूर–मुष्टिकौ कौ आस्ताम्?

(घ) वज्रप्रभग्नशिखरः पर्वत इव कः पतितः केन च पातितः?

(ङ) वसुदेवः कः आसीत्? सः स्वपुत्राभ्याम् किम् आशीर्वादम् अयच्छत्?

(च) अयं पाठः कस्माद् ग्रन्थात् उद्धृतः कश्च तस्य लेखकः?

2. कोष्ठकाद् उचितपदमादाय रिक्तस्थानपूर्तिं कुरुत।

(क) ––––––महामात्येन प्रेषितं गजेन्द्रं हतवान्। (बलरामः / दामोदरः)

(ख) मदनिका ––––स्थिता आसीत्। (राजकुलद्वारे/ अन्तःपुरे)

(ग) –––––––––मुष्टिकं हतवान्। (दामोदरः/ बलरामः)

3. त्रिषु चतुर्षु वा वाक्येषु उत्तरं लिखत–

(i) कंसः कः आसीत्? स चाणूर–मुष्टिकौ किमर्थम् आह्वयत्?

(ii) मदनिकायाः नाम 'कुब्जिका' इति कथम् अभवत्?

(iii) श्रीकृष्णस्य चरित्रम् वर्णयन्तु।

4. आशयं स्पष्टीकुर्वन्तु

(i) सत्पुत्र–जन्मफलमद्य प्राप्तवानस्मि

(ii) त्वामद्य यमाय निवेदयामि

5. प्रकृति–प्रत्यययोगेन वाक्यपूर्तिं कुरुत

(क) दामोदरः रङ्गशालां (प्र+विश्+शतृ) ––– एव गजेन्द्रं हतवान्।

(ख) नन्दगोपपुत्रः कुब्जिकां (दृश्+क्त्वा) ––– तस्याः हस्ताद् गन्धं गृह्णाति।

(ग) भटः निष्क्रम्य (प्र+विश्+ल्यप्) –––– च ज्ञापयति।

(घ) कंसः प्रासादम् (आ+रुह्+ल्यप्) ––– युद्धं पश्यति।

(ङ) एषः कंसः दामोदरेण (नि+ हन्+क्त) ––तिष्ठति।

6. रेखांकितपदानां विग्रहं प्रदर्शयत

(क) राजमार्गम् गच्छति गजेन्द्रः।

(ख) अमात्यः राज्ञः कर्णमूले किमपि कथितवान्।

(ग) दामोदर–बलरामौ वसुदेवं प्रणमतः।

(घ) जनकः पुत्रं सस्नेहं पश्यति।

(ङ) ललितगम्भीराकृतिः रामः।

(च) प×चवटी तु रम्या।

7. लट्लकारे प्रयुक्तक्रियापदानि लोट्लकारे परिवर्तयत

यथा– दामोदरः बलरामेण सह गच्छति। (लटि)

दामोदरः बलरामेण सह गच्छतु। (लोटि)

(क) भटः प्रविशति। (ख) सः धनुःशालां पश्यति।

(ग) त्वम् प्रासादे तिष्ठसि। (घ) सर्वे युद्धं कुर्वन्ति।

8. सन्धिविच्छेदः कार्यः

(क) यदाज्ञापयति (ख) भग्नास्थिः

(ग) दामोदरोऽहम् (घ) ज्ञायतां वृत्तान्तः

9. निर्दिष्टधातुभिः सह शतृ/शानच् प्रत्यययोगेन वाक्यपूर्तिं कुर्वन्तु

(क) गृहं ............................ छात्रः गुरुं नमति। (गम् + शतृ)

(ख) फलानि ......................... ते गच्छन्ति। (खाद् + शतृ)

(ग) वृद्धं ............................ बालः धन्यः। (सेव् + शानच्)

(घ) ताः ........................... भ्रमन्ति। (मुद् + शानच्)

## 10.7 उत्तराणि

**10.2 बोधप्रश्नाः**

1. 1. (क) 2. (ख) 3. (ग)

4. (क) दन्तं (ख) द्विखण्डं (ग) सङ्.ख्यपटहान् (घ) पतितो

5. (क) राजा (ख) भटः (ग) राजा (कंसः) (घ) दामोदरः (ङ.) वसुदेवः

**पाठगतप्रश्नाः**

**10.1** 1. (क) राजा (कंस) (ख) दामोदरः (ग) उत्पलापीडो नाम गन्धहस्ती

(घ) कुब्जिका,, राजकुलद्वारे (ङ) धनुः समादाय द्विखण्डम् अकरोत्

(च) कंसस्य विशिष्टौ मल्लौ

2. (क) + ii (ख) + i (ग) + iv (ङ) + iii

3. (क) समाकृष्य (ख) अनुलिप्य (ग) प्रहृत्य (घ) प्रविशत् (पुं–प्रविशन्)

(ङ) गत (च) श्रोतुम् (छ) हत्वा

4. (क) गजेन्द्रम् (ख) यदाज्ञापयति (ग) तेनैव (घ) शीघ्रं गच्छ

**10.2** 1. (क) चाणूरमुष्टिकौ प्रति (ख) करणसन्ध–आबन्धयुद्धप्रहारेषु

(ग) ललितगम्भीराकृतिः (घ) दामोदरः चाणूरं प्रति

2. (क) शृणोतु (ख) तिष्ठ (ग) उपदिशतु (घ) गच्छ (ङ.) वादयत

3. (क) गोपदारकौ (ख) महाराजः (ग) ललितगम्भीराकृतिः (घ) दामोदरबलरामौ

**10.3** 1. (क) दामोदरः (ख) दामोदरः प्रासादम् आरुह्य कंसं च शिरसि गृहीत्वा नीचैः अपातयत्। (ग) वसुदेवः, दामोदरबलरामौ प्रति (घ) वसुदेवः

2. (क) कंसः (ख) हारः (ग) भवन्तौ

3. (क) दुरात्मा (ख) परिवृत्तनेत्रः (ग) पतितलम्बसूत्रः (घ) वज्रप्रभग्नशिखरः

## 10.6 पाठान्तप्रश्नाः

1. (क) दामोदरम्

   (ख) मदनिकायाः

   (ग) कंसस्य विशिष्टौ मल्लौ

   (घ) कंसः, दामोदरेण

   (ङ) वसुदेवः, दामोदर–बलरामयोः पिता आसीत्। सः स्वपुत्राभ्यां अक्षयविजयिनौ भवेताम् इति आशीर्वादम् अयच्छत्।

   (च) 'बालचरितम्' इति ग्रन्थात्, महाकविः भासः

2. (क) दामोदरः (ख) राजकुलद्वारे (ग) बलरामः

3. स्वयमेव लिखन्तु

4. स्वयमेव लिखन्तु

5. (क) प्रविशन् (ख) दृष्ट्वा (ग) प्रविश्य (घ) आरुह्य (ड.) निहतः

6. (क) राज्ञः मार्गम् (ख) कर्णयोः मूले (ग) दामोदरः बलरामः च (घ) स्नेहेन सहितम् (ड.) ललिता गम्भीरा आकृतिः यस्य सः (च) प×चानां वटानां समाहारः

7. (क) प्रविशतु (ख) पश्यतु (ग) तिष्ठ (घ) कुर्वन्तु

8. (क) यत्+आज्ञापयति (ख) भग्न+अस्थिः (ग) दामोदरः+अहम्

   (घ) ज्ञायताम् वृत्तान्तः

9. (क) गच्छन् (ख) खादन्तः (ग) सेवमानः (घ) मोदमानाः

# 11

# अनुच्छेदलेखनम्

भाषा एव मानवजीवनस्य वैशिष्ट्यम्। पशूनामपि भाषा भवति परन्तु सा तु केवलं सांकेतिकरूपेण विद्यते। वयं मानवाः चिन्तयितुं किंचिद् नवीनं विचारयितुं कल्पयितुं च शक्नुमः। अस्माकं विचाराणाम् अभिव्यक्तिः द्विधा भवति भाषणेन लेखनेन वा। लेखने अपि अनेके विधयः भवन्ति—गद्यमयं, पद्यमयं नाट्यमयं च। 'गद्यं कवीनां निकषं वदन्ति' इति कथनानुसारं गद्यलेखनं सुकरं न भवति। गद्यरचनायां कथानिबन्धानुच्छेदादयः अनेकाः विधाः सन्ति। अस्मिन् पाठे वयं केवलम् अनुच्छेदलेखनविषयकं चिन्तनं कुर्मः। अनुच्छेदे वयं शीर्षकविषयकम् एकं बिन्दुम् एव आधारीकृत्य संक्षेपेण विचाराणाम् अभिव्यक्तिं कुर्मः। एवम् अनुच्छेदे कस्यापि एकस्य विचारस्य चिन्तनस्य भावादेश्च संक्षेपेण प्रवाहयुक्तं वर्णनं भवति।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- अनुच्छेदस्य उपांगानि वर्णयितुं समर्थः भविष्यति;
- शब्दानां वर्णविश्लेषणं कर्तुं शक्तः भविष्यति;
- पदैः वाक्यानि उपवाक्यानि च निर्मास्यति;
- अनुच्छेदस्य रूपरेखानिर्माणं कर्तुं योग्यतां प्राप्स्यति;
- अनुच्छेदान्तर्गतवाक्यानाम् अन्तःसम्बन्धं सम्यक् ज्ञातुं शक्तः भविष्यति;
- अनुच्छेदस्य समापनवाक्यं योजयितुं योग्यः भविष्यति;
- लघुनिबन्धम् आधारीकृत्य शीर्षकं लेखितुं सक्षमः भविष्यति।

टिप्पणी

## क्रियाकलापः

अत्र वाक्येषु केचन संकेताः दर्शिताः। तेषु यः संकेतः भाषया सम्बद्धः, तस्य अग्रे (✓) इति चिह्नेन चिह्नीकुर्वन्तु

| वाक्यम् | उत्तरम् |
|---|---|
| 1. गौः वत्सं जिघ्रति। | भाषा/ भावः |
| 2. काकः कॉव कॉव इति करोति। | भाषा/ संकेतः |
| 3. नेता भाषणं करोति। | भाषा/ संकेतः |
| 4. बालकः वंशीं वादयति। | भाषा/ स्वरः |
| 5. कारचालकः नादं करोति। | भाषा/ ध्वनिः |
| 6. बालिका गीतं गायति। | भाषा/ स्वरमात्रम् |
| 7. बालिका नृत्यति। | भाषा/ भावाभिव्यक्तिः |
| 8. राजा आदेशं ददाति। | भाषा/ ध्वनिः |

## 11.1 अधुना अवगच्छामः


### अनुच्छेद–लेखनम्

अस्माभिः दृष्टं यत् भाषया वयं विचाराणाम् अभिव्यक्तिं कुर्मः। भाषायाः कति उपांगानि भवन्ति इति अधुना विचारयामः।

### अनुच्छेदस्य उपांगानि

अधोलिखितं चित्रं पश्यन्तु

- वर्णः
- प्रातिपदिकम्
- पदम्
- वाक्यम्
- अनुच्छेदः




प्रारम्भः मध्यः समापनम् शीर्षकम् इति मिलित्वा अनुच्छेदः भवति। भाषायाः प्रारम्भः वर्णैः भवति। स्वरव्यंजनादयः वर्णाः।

वयम् पश्यामः यत् वर्णैः प्रातिपदिकानां रचना भवति यथा र+आ+म्+ अ = इति मिलित्वा 'राम' प्रातिपदिकं भवति। परन्तु प्+अ+ठ् = पठ् इति धातुः प्रातिपदिकम् न उच्यते। प्रत्येकं पदे मूलरूपेण यद् विराजते तत् प्रातिपदिकम्। प्रातिपदिकैः सह सुप् विभक्तीनां योगेन सुबन्तपदानां निर्माणं भवति, धातुभिः सहः तिङ् प्रत्ययानां योगेन तिङन्तपदानि जायन्ते। कथ्यते च 'सुप्तिङन्तं पदम्'। अत्र मञ्जूषायां केचन वर्णाः, कानिचित् प्रातिपदिकानि, कानिचित् च सुबन्तपदानि अन्यानि च तिङन्तपदानि मिश्रितानि सन्ति। वयम् एतानि पृथक् पृथक् चित्वा विभिन्नस्तम्भेषु लिखामः।

**मंजूषा**

हरि, तु, गम्, वयम्, गच्छामः, हस्, पठामः य्, सीता, राम, लतायै, अस्मभ्यम्, लिख्, सीते!, च्, च, युष्मद्, म्, मा, वद्, पठ, त्, विचरन्ति, पठ्, न्, न, फलानि, प्रातः

**स्तम्भेषु वर्गीकरणम्**

| क्रमांकः | वर्णः | प्रातिपदिकम् | धातुः | सुबन्तानि | तिङन्तानि | अव्ययानि |
|---|---|---|---|---|---|---|
| 1. | य् | हरि | गम् | वयम् | गच्छामः | च |
| | | | | लतायै | पठामः | मा |
| 2. | च् | सीता | | अस्मभ्यम् | | |
| 3. | म् | राम | लिख् | | विचरन्ति | न |
| 4. | त् | युष्मद् | वद् | सीते | हस् | तु |
| 5. | न् | | पठ् | फलानि | पठ् | प्रातः |

ध्यातव्यं यत् वर्णैः प्रातिपदिकानां, पदानां च रचना भवति। अतः वर्णानां मेलनं शब्दनिर्माणे प्रथमं सोपानं भवति।

**वर्णों से मिलकर शब्द बनते हैं। शब्दों में सुबन्त प्रत्यय लगाकर विभिन्न विभक्तियों में रूप चलते हैं। धातुओं में तिङन्त प्रत्यय जोड़कर विभिन्न क्रियापद बनाए जाते हैं। 'य्' वर्ण है, यत् सर्वनाम शब्द है, यः सर्वनाम है, 'या' धातु है, याति 'जाता है' क्रिया है।**

## पाठगतप्रश्नाः 11.1

1. अधोलिखितमञ्जूषायां दत्तानि पदानि, वर्णाः, सुबन्तानि, तिङन्तानि, अव्ययपदानि च पृथक् स्तम्भेषु लिखत

   बालिके, नदी, च, य्, यः, पठत, सवितुः भ्रातृ, सूर्याय, वद, वद्, स्, सः, तद्, क्, रोचते, अद्य, ह्यः, गौः, गो, बहिः, गच्छ, गच्छ्, जिघ्रति, ज्, परश्वः, घ्रा, भू, नम्, अ, उ, यत्, किम्, लिख्, नम, श्वः,

| क्रमांक: | वर्ण: | प्रतिपादिकम् | धातु: | सुबन्तानि | तिङन्तानि | अव्ययानि |
|---|---|---|---|---|---|---|
| 1 | –– | –– | –– | –– | –– | –– |
| 2 | –– | –– | –– | –– | –– | –– |
| 3. | –– | –– | –– | –– | –– | –– |
| 4. | –– | –– | –– | –– | –– | –– |
| 5. | –– | –– | –– | –– | –– | –– |
| 6. | –– | –– | –– | –– | –– | –– |

## 11.2 पदैः वाक्यनिर्माणम्

प्रथमे एकांशे अस्माभिः पठितं यत् वर्णैः प्रातिपदिकानां धातूनां च रचना भवति। वाक्ये प्रायः सुबन्तानि तथा तिङन्तानि पदानि भवन्ति। संज्ञासर्वनामविशेषणादीनां कृते सुबन्तानि पदानि प्रयुज्यन्ते। क्रियापदानां कृते तिङन्तानां पदानां प्रयोगः भवति। अव्ययपदानि अपि सुबन्तानि एव भवन्ति परन्तु तेषां विभक्तिलोपः जायते, तेषां रूपे किमपि परिवर्तनं न भवति। अधोलिखिते गतिविधौ वयम् सुबन्ततिङ्न्तपदयोगेन वाक्यरचनां करिष्यामः। क्रियापदानि पञ्चलकारेषु एव दत्तानि, तेषाम् अर्थसंगतिं दृष्ट्वा एव प्रयोगः करणीयः।

| कर्तृपदानि | | क्रियापदानि | |
|---|---|---|---|
| (क) | वयम् | (i) | गच्छन्तु |
| (ख) | बालकाः | (ii) | पठिष्यथः |
| (ग) | भवन्तः | (iii) | पठेः |
| (घ) | यूयम् | (iv) | अक्रीडन् |
| (ङ) | तौ पुरुषौ | (v) | नमामि |
| (च) | ते बालिके | (vi) | हसावः |
| (छ) | आवाम् | (vii) | तरतः |
| (ज) | युवाम् | (viii) | अलिखाम |
| (झ) | त्वम् | (ix) | गच्छत |
| (ट) | अहम् | (x) | धावतः |

ध्यानेन पश्यन्तु। वाक्ये क्रियापदं कर्तृपदानुसारम् एव भवति। कर्तृपदस्य पुरुषानुसारं, वचनानुसारम् एव क्रियापदं प्रयुज्यते। अनुच्छेदे वाक्यैः सह उपवाक्यानाम् अपि प्रयोगः भवति। मुख्यवाक्ये आश्रितानि वाक्यानि उपवाक्यानि उच्यन्ते। अनुच्छेदे परस्परं वाक्यानि सम्बद्धानि भवन्ति। अत्र क्रियाकलापे दश वाक्यानि समाहितानि। एतानि एवं सन्ति–

वयम् अलिखाम। बालकाः अक्रीडन्। भवन्तः गच्छन्तु। यूयम् गच्छत। तौ पुरुषौ तरतः। ते बालिके धावतः। आवाम् हसावः। युवाम् पठिष्यथः। त्वं पठेः। अहं नमामि।

एतानि वाक्यानि तु सार्थकानि परन्तु अनुच्छेदकृते परस्परं सम्बद्धानि न सन्ति। किं वयम् एतानि वाक्यानि मेलयित्वा अयम् अनुच्छेदः इति कथयितुं शक्नुमः? नैव। एतानि वाक्यानि तु असम्बद्धानि। एतानि वाक्यानि मिलित्वा किमपि स्पष्टीकर्तुं न शक्नुवन्ति। अतः अनुच्छेदे सर्वाणि वाक्यानि परस्परं सम्बद्धानि भवन्ति। अधोलिखितानि वाक्यानि पश्यत–

## क्रियाकलापः–2

वयं प्रातः उत्तिष्ठामः। स्नानं कुर्मः। ध्यानं कुर्मः, विद्यालयं गच्छामः। पाठान् पठामः। क्रीडाक्षेत्रे क्रीडामः। गीतानि गायामः। मध्याह्ने गृहम् आगच्छामः। भोजनं कुर्मः। विश्रामं कुर्मः। सायंकाले उद्याने भ्रमामः। ततः आगच्छामः। गृहकार्यं कुर्मः। पठितान् पाठान् पुनः पठामः। रात्रौ दशवादने शयनं कुर्मः।

उपरिलिखितेषु वाक्येषु मूलबिन्दुः कः?

सुष्ठु चिन्तितम्– एषा केषाञ्चन छात्राणां दिनचर्या। अत्र किं शीर्षकं भवितुं शक्नोति? सम्भवतः "अस्माकं दिनचर्या" इति।

**सारांशतः**

- अनुच्छेदे वाक्यानि भवन्ति।
- वाक्येषु क्रियापदं कर्त्रनुसारं भवति। क्रियापदं विना वाक्यं पूर्णं न भवति।
- वाक्यानि परस्परं सम्बद्धानि सन्ति।
- वाक्यानाम् आधारबिन्दुः एक एव, तद् एव शीर्षकम्।

अनुच्छेद वाक्यों से बनता है। वाक्यों में क्रियापद कर्ता के अनुसार होते हैं। वाक्यों के परस्पर जुड़े हुए होने से ही अनुच्छेद बनता है।

## क्रियाकलापः–3

अधोलिखितानां वाक्यानाम् आधारबिन्दुः कः?

प्रातःकालः अस्ति। आकाशे सूर्यः उदितः। खगाः कलरवं कुर्वन्ति। जनाः भ्रमणं कुर्वन्ति। बालकाः विद्यालयं गच्छन्ति। मार्गेषु यानानि धावन्ति। केचन यानस्थानकं प्रति गच्छन्ति। सर्वत्र व्यस्तता अस्ति। केचन वृद्धाः मन्दिरं गच्छन्ति। नूनम् ये उद्यमं कुर्वन्ति ते स्वस्थाः भवन्ति। अलसाः किमपि न प्राप्नुवन्ति। उक्तं हि, "उद्यमेनैव सिध्यन्ति कार्याणि न मनोरथैः"।

अत्र अनुच्छेदस्य आधारबिन्दुः कः? नूनम् उद्यमः। कथं ज्ञायते? प्रातःकाले उत्थाय सर्वे जनाः उद्यमे संलग्नाः। वस्तुतः उद्यमशीलाः एव ऐश्वर्यं लभन्ते। अलसाः तु किमपि न प्राप्नुवन्ति। अन्ते दत्ता सूक्तिः अपि इदम् एव तात्पर्यं सूचयति। अतः प्रायः अनुच्छेदस्य समाप्तौ काचित् सूक्तिः, सुभाषितं वा योज्यते।

**क्रमबद्धता**

अनुच्छेदे क्रमः अपि अत्यन्तम् आवश्यकः। यदि अनुच्छेदे क्रमबद्धता, तारतम्यता नास्ति तर्हि भावस्य अभिव्यक्तिः सम्यक् न भवति। अतः अस्माभिः ध्यातव्यं यत् अनुच्छेदे सार्थकता भवेत्, क्रमिकता भवेत्, अपि च वाक्यानि शुद्धानि भवेयुः। अन्ते च काचित् सूक्तिः सुभाषितं वा भवेत्।

अनुच्छेद में सम्बद्धता, क्रमबद्धता, तारतम्यता होनी आवश्यक है।

## पाठगतप्रश्नाः 11.2

1. अधोलिखिते अनुच्छेदे असम्बद्धवाक्यानि चित्वा लिखन्तु–

   सर्वेषाम् एव अहंकारः भवति। कस्यचित् स्वल्पः कस्यचित् मध्यमः। अहंकारः मानवम् अन्धं करोति। सः कथयति अहं तु सर्वेभ्यः महान्। सः चिन्तयति– अहं सर्वेभ्यः दीनः इति। सर्वे तस्य अहंकारं पश्यन्ति परन्तु सः कथयति अहं तु सर्वेभ्यः महान्। कोऽपि मया सदृशः विद्वान् नास्ति। सः सर्वदा सर्वेषां सेवां कर्तुं तत्परः भवति। अहंकारी निन्दां न श्रृणोति। सः सर्वदा प्रशंसाम् एव इच्छति। अन्ते स रावणवत् विनश्यति।
2. उपर्युक्ते अनुच्छेदे कः मुख्यबिन्दुः?
3. एतस्य अनुच्छेदस्य कृते शीर्षकं लिखन्तु।
4. अधोलिखितासु सूक्तिषु का सूक्तिः अन्ते योजयितुं शक्यते?

   (i) शरीराणि विनाशीनि न शरीरी विनश्यति। (अग्निपुराण– 14 / 2)

   (ii) उद्यमो मित्रवद् ग्राह्यः, प्रमादं शत्रुवत् त्यजेत्। (बुद्धचरितम् 26–73)

   (iii) हन्ति मानः महद् यशः (महाभारतम् अनुशासनपर्व 69.19)

   (iv) त्यक्त्वाऽभिमानं पुरुषो जानाति परमेश्वरम् (शिवपुराणम् 3.8.58)

   (v) क्रोधो हन्ता मनुष्याणां, क्रोधो भावयिता पुनः (महाभारतवनपर्व 29.1)

## 11.3 रूपरेखाम् अधिकृत्य अनुच्छेदलेखनम्

अनुच्छेदलेखनात् पूर्वं विषयमधिकृत्य रूपरेखानिर्माणम् अत्यधिकम् आवश्यकम्। कांश्चन विषयान् अधिकृत्य रूपरेखानिर्माणं कुर्मः।

**वसन्तः (रूपरेखा)**

षड् ऋतवः, ऋतुराजः, वृक्षाः, पुष्पाणि, भ्रमराः, लताः सौरभप्रसारः, जलाशयाः, कमलानि, नवीनानि पत्राणि, कोकिलाः, आम्रमञ्जर्यः, आकाशः निर्मलः भवति।

एतां रूपरेखाम् अनुसृत्य वयं लघुनिबन्धं लिखामः

**ऋतुराजः वसन्तः**

भारते षड् ऋतवः भवन्ति। वसन्तः, ग्रीष्मः, वर्षा, हेमन्तः, शरत्, शिशिरः। वसन्तः ऋतूनां राजा कथ्यते। वृक्षाः कुसुमैः पूर्णाः। पुष्पेपु भ्रमराः गुञ्जन्ति। लतासु नवीनानि पत्राणि आगच्छन्ति। सर्वत्र सुगन्धः प्रसरति। जलाशयेषु कमलानि विकसन्ति। आम्रवृक्षेषु मंजर्यः प्रस्फुटन्ति। कोकिलाः पंचमस्वरेण गायन्ति। आकाशः अपि निर्मलः। वयम् अपि आकाशवत् उदारमनाः स्वस्थचित्ताः भवेम, स्वकर्मणां शुभां कीर्तिं प्रसारयामः। तदैव वसन्तवत् अस्माकं जीवनमपि धन्यं भवेत्।

## चित्राधारितम् अनुच्छेदलेखनम्



चित्रम् आधारीकृत्य अपि अनुच्छेदलेखनं भवति। अत्र प्रदत्त चित्रं पश्चत–

प्रातःकोल पतिः पत्नी वार्तालापं कुरुतः। तयोः हस्तयोः चषकौ स्तः। पश्चात् दूरदर्शनम् अपि अस्ति । तौ समाचांर श्रृणुतः। हास्यप्रदां कामपि घटनां श्रुत्वा हसतः। आनन्दमयं वातावरणम्। पारिवारिकशान्तेः उदाहरणम्। वेदेषु उक्तम् समानमस्तु वो मनः।

## पाठगतप्रश्नाः 11.3

1. (क) एवमेव अधोलिखितान् विषयान् अधिकृत्य अनुच्छेदं लेखितुं रूपरचनायाः निर्माणं कुर्वन्तु

<u>परिश्रमः</u>

परिश्रमेण सुखप्राप्तिः, ......................................................................................

(ख) उक्तरूपरेखां पठित्वा अनुच्छेदं लिखन्तु

2. 'अस्माकं भारतम्' इति विश्यमधिकृत्य अनुच्छेदं लिखत।

3. चित्राधारितम् अनुच्छेदलेखनम्

अत्र प्रदत्तशब्दानां सहायतया अनुच्छेदं लिखत–

शीतः ऋतुः, द्वौ जनौ, पर्वतवासिनौ, शीतार्तौ, मध्ये अङ्गारिका (अंगीठी), हस्तौ तापयतः, अग्नेः ज्वालाः उष्णीषम् (पगड़ी) धारयतः।



### 3. अस्माकं देशः भारतम्

जन्मभूमिः, उत्तरे हिमालयः, तिसृषु दिशासु सागराः, अनेकाः नद्यः, मध्ये विन्ध्याचलः, महती संस्कृतिः, महान्तः कवयः, महान्तः ग्रन्थाः, विपुलं साहित्यम्, वीराङ्गनाः देशभक्ताः, सूक्तिः–जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

## 11.4 सौन्दर्यविधायकानि तत्त्वानि अनुच्छेदं लिखत

वाक्ये पदानां शुद्धता, उपयुक्तपदानां चयनं, तेषां सम्यक्संयोजनं च अनुच्छेदस्य सौन्दर्यविधायकानि तत्त्वानि। यदि कुत्रचिदपि अशुद्धिः वर्तते तर्हि निश्चप्रचं सौन्दर्यं नश्यति। अतः भाषायाः शुद्धता अपरिहार्या। प्रायः संयुक्तव्यंजनानां मेलने प्रातिपदिकानां शब्दानां वा लेखने वर्तनी गताःअशुद्धयः भवन्ति।

उदाहरणार्थं वयं कानिचित् वर्तनीगताशुद्धियुक्तानि वाक्यानि पठामः–

1. भवान् विवाहोत्सवे वरवधूभ्याम् आर्शिवादप्रदानाय गच्छति।
2. मया कालीदासस्य अभिग्यानशाकुन्तलं नाटकं पठितम्।
3. अद्य तस्याः मौनवृतम् अस्ति।
4. नारी ग्रहलक्ष्मी कथ्यते।
5. अहं नित्यं विष्णुसहस्त्रनामस्त्रोत्रस्य पाठं करोमि।
6. शिवेः करूणाभावः अनुकरणीयः।

सम्प्रति तासाम् अशुद्धीनां शोधनं कृत्वा लिखामः–

1. आशीर्वादप्रदानाय
2. कालिदासस्य अभिज्ञानशाकुन्तलम्।
3. मौनव्रतम्
4. गृहलक्ष्मीः
5. विष्णुसहस्रनामस्तोत्रस्य
6. करुणाभावः

भाषायाः शुद्धतायाः तात्पर्यं यत् भाषा व्याकरणसम्मता भवेत्। वाक्ये कारकक्रिया लिङ्गवचनादीनां समुचितः अन्वयः अनिवार्यः। द्वितीयांशे अस्माभिः पठितं यत् वाक्ये क्रियापदं कर्तृपदानुसारम् एव भवति। यथा मौनव्रतम् अस्ति। अहं करोमि। अत्र एतदपि स्मर्तव्यं यत् कर्मवाच्ये क्रिया कर्मपदानुसारं भवति। यथा–मया गीता पठ्यते। भाववाच्ये च क्रिया एकवचने एव भवति। यथा बालकैः सुप्यते। विशेषणस्य लिङ्गं वचनं विभक्तिश्च विशेष्यानुसारम् एव भवन्ति। यथा– खेलते बालकाय। गच्छत् यानम्.....। वाक्ये अशुद्धिपरिहाराय एते नियमाः सावधानेन पालनीयाः।

अनुच्छेदलेखने पदचयने अपि उपयुक्तानाम् एव पदानां चयनं करणीयम्। संस्कृतं सर्वाधिकं समृद्धम्। अत्र एकस्य अर्थस्य द्योतकाः बहवः शब्दाः वर्तन्ते। परन्तु प्रत्येकं शब्दे काचित् विशेषता विद्यते। यदि कश्चित् कथयति– ''पात्रे सलिलम् अस्ति।'' अत्र 'सलिलम्' इति पदस्य प्रयोगः अनुपयुक्तः। यतः पात्रे स्थितं जलं 'सलिलं' न भवति। सलिलं (लीलया सहितम्) तु नदीनां निर्झराणाम् एव जलं भवति।

अनुच्छेदलेखने प्रयत्नः विधेयः यत् शुद्धानाम् उपयुक्तानां च शब्दानाम् एव प्रयोगः क्रियते। यथा– 'शुष्कः वृक्षः तिष्ठति अग्रे'' इत्यस्य स्थाने 'नीरसः तरुः पुरतः भाति' अधिकं रोचते।

अधुना वयम् एकं सुन्दरम् अनुच्छेदं पठामः।

## मित्राणि शत्रवस्तथा

मानवजीवने मातापित्रोरनन्तरं सखा एव उल्लासप्रदः क्लेशपरिहारकश्च भवति। बाल्यादारभ्य एव मानवः मित्रसङ्गं करोति। समानस्वभावाः, विद्याभ्यासे क्रीडासु च सहकारिणः कार्यक्षेत्रे सहोद्योगिनश्च मित्राणि भवन्ति। गृहपरिसरे वर्तमानाः प्रतिवेशिनोऽपि मित्राणि भवन्ति। जीवननिर्वाहावसरे केचन रिपवः अपि जायन्ते। बाल्ये एव स्वभावभेदात् स्वार्थप्रसङ्गात् च केचन रिपवः भवन्ति। कार्यक्षेत्रे अपि स्पर्धाप्रसङ्गात् आसक्तिभेदात् केचन रिपवः जायन्ते। एतौ मित्रशत्रुभावौ समाजजीविनः मानवस्य अविभाज्यौ अङ्गौ। तथापि मित्रत्वस्य वर्धने शत्रुत्वस्य परिहारे निरन्तरं प्रयत्नः विधेयः। अतः सुष्ठूक्तं केनचित् कविना–

*''न कश्चित् कस्यचिन् मित्रं न कश्चित् कस्यचिद्रिपुः।*

*व्यवहारेण जायन्ते मित्राणि शत्रवस्तदा।।''*

1. अस्मिन् अनुच्छेदे मित्रताभावः शत्रुताभावश्च केन्द्रीभूतविचाररूपेण वर्तेते।
2. सर्वेषु वाक्येषु तारतम्यता विराजते।
3. अस्मिन् अनुच्छेदे कुत्रचिदपि वर्तनीगता अशुद्धिः न दृश्यते।
4. अत्र सर्वत्र क्रियापदं कर्तृपदानुसारम् एव। यथा– मानवः ................. करोति। मित्राणि भवन्ति।
5. विशेषणपदानां लिङ्गवचनविभक्त्यादयः विशेष्यानुसारमेव। यथा– सखा एव उल्लासप्रदः क्लेशापहारकश्च। वर्तमानाः प्रतिवेशिनः।
6. सर्वाणि वाक्यानि परस्परसम्बद्धानि सन्ति।
7. अस्मिन् उपयुक्तानां पदानां प्रयोगः कृतः यथा 'सखा' इत्यस्य विशेषणरूपेण 'उल्लासप्रदः क्लेशापहारकः इति। अत्र उपयुक्तानां मधुराणां पदानां प्रयोगः दर्शनीयः।
8. अन्ते एका सम्बद्धा सूक्तिः प्रदत्ता।



टिप्पणी

## पाठगतप्रश्नाः 11.4

1. प्रदत्तानां पदानां वर्णविश्लेषणं कृत्वा लिखन्तु–

यथा– मूर्तः – म् + ऊ + र् + त् + त् + अः

(क) अर्थः –

(ख) चक्रम् –

(ग) प्रकाशः –

(घ) विश्रामः –

(ङ) ब्रह्मविद्या –

(च) चिह्नम् –

(छ) किंचित् –

(ज) उद्धारः –

(झ) शृंखला –

2. उपयुक्तेन पदेन रिक्तस्थानानि पूरयन्तु–

(क) बालकाः गृहं .................................. । (गच्छति / गच्छन्ति)

(ख) मया रामायणं .................................. । (पठ्यते / पठ्येते)

(ग) .......................... हस्यते । (बालिकया / बालिका)

(घ) खेलतीभ्यां .................................. । (बालकाभ्याम् / बालिकाभ्याम्)

(ङ) पतत् .................................. । (फलम् / फलानि)

---

## 11.5 किम् अधिगतम्

- वर्णानां योगेन प्रातिपदिकानि भवन्ति ।
- प्रातिपादिकैः पदनिर्माणं क्रियते ।
- पदानि मिलित्वा वाक्यं रचयन्ति ।
- परस्परसम्बद्धानि वाक्यानि एव मिलित्वा अनुच्छेदं रचयन्ति ।
- अनुच्छेदे केन्द्रीभूतः विचारः भवेत् ।
- वाक्येषु तारतम्यता भवेत् ।
- अनुच्छेदस्य अन्ते काचित् सूक्तिः भवेत् ।
- अनुच्छेदस्य मुख्यबिन्दुम् अधिकृत्य शीर्षकं लिख्यते ।

## 11.5 योग्यताविस्तारः

**(क) विशेषण विशेष्य– अन्वितिः।**

यल्लिङ्गं यद्वचनं या च विभक्तिः विशेष्यस्य।

तल्लिङ्गं तद्वचनं सा च विभक्तिः विशेषणस्य।।

विशेषणस्य लिङ्गं वचनं विभक्तिः च विशेष्यानुसारं भवति यथा

(i) खेलते बालकाय, खेलद्भ्याम् बालकाभ्याम्।

(ii) खेलत्यै बालिकायै, खेलतीभ्याम् बालिकाभ्याम्।

(iii) गच्छत् यानम्, गच्छती याने।

**(ख) लिङ्गानुशासनम्**

केचन शब्दाः पुंल्लिङ्गे, भवन्ति यथा

(i) पाकः, त्यागः, भोगः,करः, हस्तः, विस्मयः इत्यादयः।

(ii) यज्ञः, विघ्नः, प्रश्नः इत्यादयः।

(iii) आधिः, व्याधिः, विधिः, जलधिः इत्यादयः।

(iv) विष्णुः, गुरुः, इक्षुः, भानुः, साधुः, मनुः, ऋतुः इत्यादयः।

(v) भ्रातृ, पितृ, देवृ, दातृ इत्यादयः।

(vi) स्तबकः, पाषाणः, फेनः, दीपः, वृक्षः, समयः, इत्यादयः।

(vii) अमरः, विबुधः, सुरः, आदित्यः, गीर्वाणः।

(viii) मनुष्यः, मनुजः, मानवः, नरः, दैत्यः, दानवः।

(ix) भूधरः, अद्रिः, पर्वतः, गिरिः, अचलः।

(x) अब्धिः, समुद्रः, सागरः, जलधिः, अर्णवः, रत्नाकरः इत्यादयः।

**(घ) स्त्रीलिङ्गे**

(i) अवनिः, भूमिः, ग्लानिः, गतिः, मतिः, स्मृतिः, लक्ष्मीः,

(ii) ऊनविंशतितः (19) प्रारभ्य नवनवतिपर्यन्तं सर्वे संख्यावाचकाः शब्दाः स्त्रीलिङ्गे एकवचने प्रयुज्यन्ते– विंशतिः बालिकाः (20 लड़कियाँ)

(iii) लघुता, महत्ता, गुरुता, मृदुता इत्यादयः

(iv) भूमिः, लता, नदी,वनिता इत्यादीनां पर्यायाः यथा

(क) भूमिः, अचला, वसुधा, वसुन्धरा, पृथ्वी, अवनिः

(ख) लता, वल्ली, वल्लरी, वीरुद्,

(ग) नदी, सरित्, तरंगिणी, तरिणी, आपगा,

(घ) वनिता, योषित्, योषा, नारी, महिला, वामा

(v) रुचिः, वीचिः, छविः, रात्रिः, कृषिः, ओषधिः,
अंगुलिः, आपद्, विपद्, शरत्, परिषद्,

(vi) तारा, ज्योत्स्ना, शलाका, नौः, धारा

**नित्यं स्त्रीलिङ्गे बहुवचने**

अप्, सुमनस्, समा, सिकता, वर्षा, अप्सरस् एते शब्दाः नित्यं स्त्रीलिंगे बहुवचने प्रयुज्यन्ते।

**(ङ) नपुंसकलिङ्गे**

(i) गमनम्, भवनम्, तरणम्, स्मरणम्, गीतम्

(ii) गुरुत्वम्, महत्त्वम्, सख्यम्, कार्ष्ण्यम्, धावल्यम्

(iii) कर्मन्, चर्मन्, वर्त्मन्, यशस्, पयस्, मनस्, तपस्

(iv) पत्रम्, छत्रम्, मित्रम्

(v) शतात् आरभ्य सर्वे संख्यावाचकाः शब्दाः– शतम्, सहस्रम्, लक्षम्, अयुतम्, नियुतम्।

(vi) फलानि– आम्राणि, आमलकानि,

(vii) जलवाचिनः– वारि, सलिलम्, पयस्, उदकम्, तोयम्, नीरम्, अम्बु

(viii) अङ्गानां नामानि– मुखम्, वदनम्, आननम्, नयनम्, चक्षुः, वक्त्रम्,

(ix) वनम् धनम्, द्रव्यम्, वित्तम्, हिरण्यम्, स्वर्णम्,

(x) कुसुमम्, पुष्पम्, प्रसूनम्

(xi) वियत् जगत्, नवनीतम्, अनृतम्, अमृतम्,
वित्तम्, रजतम्, पीठम्, अङ्गम्, बीजम्, धान्यम्, अपत्यम्, मूल्यम्

- केचन शब्दाः पुल्लिङ्गे, स्त्रीलिङ्गे उभयोः एव प्रयुज्यन्ते यथा मणिः, मसिः, मरीचिः सिन्धुः, रज्जुः,
- केचन शब्दाः पुल्लिङ्गे, नपुंसकलिङ्गे च भवन्ति– घृत, शृंग, उद्यम, कवच, औषध, दण्ड, खण्ड, द्वीप, विमान, इत्यादयः

## 11.7 पाठान्तप्रश्नाः

1. अधोलिखितानां शब्दानां वर्णविश्लेषणं कुर्वन्तु

   (i) समाहर्तुम् = ——————————

   (ii) प्रवृत्तः = ——————————

   (iii) क्रीडाक्षेत्रे = ——————————

   (iv) दुर्व्यवहारः = ——————————

   (v) यादृशम् = ——————————

2. सुबन्तानि तिङन्तानि अव्ययपदानि च पृथक् कृत्वा लिखन्तु

   किन्तु, धर्मगुरुभिः, राष्ट्रम्, संजायते, सन्ति, राजानः, प्रजापतिः, इति, अपि, काले, गुरुः, शास्त्राणि, न, अशान्तिः, अहो, भवति, उत्पादयन्ति,

3. अधोलिखितानि पदानि मेलयित्वा वाक्यानि रचयन्तु

   (i) राष्ट्रे च समाजे च, दुष्टैः भवति अशान्तिः।

   (ii) दुष्टानां, कृते, जनानाम्, अपि, नास्ति, भयम्, यमस्य।

   (iii) प्रधानमन्त्री, अस्माकं, निपुणः, अतीव।

   (iv) शिक्षिका, मम, पाठयति, व्याकरणं, विद्यालये।

   (v) बहूनि, सन्ति, उद्याने, पुष्पाणि, भ्रमराः गु×जन्ति, येषाम्, उपरि।

4. अधोलिखितान् विषयान् अधिकृत्य अनुच्छेदानां रूपरेखां रचयन्तु

   मम विद्यालयः, मम शिक्षिका, वर्षर्तुः

5. अधोलिखितरूपरेखायाः कः विषयः?

   जलम् एव जीवनम्, जलस्य स्रोतांसि–निर्झराः, नद्यः, कूपाः, तडागाः। उपयोगः–पानार्थम्, कृषिकृते, तद्विना जीवनमेव असम्भवम्। संरक्षणम् आवश्यकम्।

6. अधोलिखितानि दश वाक्यानि अनुच्छेदक्रमे न सन्ति तानि क्रमेण लिखित्वा अनुच्छेदं रचयन्तु।

   (क) दिसम्बरमासे समुद्रे महान् भूकम्पः जातः।

   (ख) यथा–यथा तरंगाः अग्रे गच्छन्ति तथा तथा तेषां वेगः वर्धते स्म।

   (ग) सर्वे जनाः मुक्तहस्तेन इदानीं सहायतां कुर्वन्ति।

   (घ) आश्चर्यम् मृतेषु कश्चिदपि पशुः न आसीत्।

   (ङ) पूर्वदिने रविवासरः आसीत्।

   (च) केचन प्रातः भ्रमणाय तत्र गताः आसन्।

   (छ) समुद्रतरङ्गैः संहारताण्डवम् आरब्धम्।

(ज) लक्षाधिकाः मानवाः समुद्रेण नीताः।

(झ) दक्षिणप्रदेशानां तीरेषु तरंगाणाम् आक्रमणम् अभवत्।

(ट) तीरवासिनः जनाः आनन्देन सुप्ताः आसन्।

7. उपर्युक्त–अनुच्छेदस्य कृते समुचितं शीर्षकं लिखन्तु।

8. उपर्युक्त–अनुच्छेदस्य कृते समुचितां सूक्तिं चित्वा योजयन्तु

(i) श्वः कार्यम् अद्य कुर्वीत। (अग्नि पु. 159.8)

(ii) व्ययाधिकं न कुर्वीत। (अग्नि पु. 65.5)

(iii) विवेकं हन्ति अहंकारः। (नारद पु 1. 7.30)

(iv) दया न जायते यस्य स रक्षः (राक्षसः) इति मे मतिः। (स्कन्दपुराणम् 7 338.20)

(v) अर्थवान् इह यो लोके परस्यार्थं प्रयच्छति। (शिवपुराणम् 1 95.17)

9. चित्रं दृष्ट्वा अनुच्छदं लिखत।



## 11.8 उत्तराणि

**पाठगतप्रश्ना**

**11.1** 1.

| | | |
|---|---|---|
| वर्णाः | – | य्, स्, क्, ज्, अ, उ, |
| प्रातिपदिकानि | – | (शब्दाः)– नदी, भ्रातृ, तद्..., गो, यत्, किम्, |
| धातवः | – | वद्, गच्छ्, घ्रा, भू, नम्, लिख् |
| सुबन्तानि | – | बालिके, यः, सवितुः, सूर्याय, सः, गौः |
| तिङन्तानि | – | पठत, वद, रोचते, गच्छ, जिघ्रति, नम |
| अव्ययानि | – | च, अद्य, ह्यः, बहिः, परश्वः, श्वः |

**11.2** 1. असम्बद्धवाक्यानि

(i) सः चिन्तयति अहं सर्वेभ्यः दीनः इति।

(ii) सः सर्वदा सर्वेषां सेवां कर्तुं तत्परः भवति।

2. अहंकारः विनाशकः

3. ज्ञानविघ्नः अहंकारः

4. (i) हन्ति मानः महद् यशः (महाभारतम्)
   (ii) त्यक्त्वा अभिमानं पुरुषो जानाति परमेश्वरम् (शिवपुराणम्)

**11.3** 1.क) परिश्रमेण सुखप्राप्तिः, अलसाः कष्टम् अनुभवन्ति, महापुरुषाः— रामः, कृष्णः, सर्वे परिश्रमशीलाः, सुप्तस्य सिंहस्य मुखे भोजनं न गच्छति। उद्यमविषयकसूक्तयः।

1.ख) स्वयं लिखत।

2. भारतम् अस्माकं जन्मभूमिः। अस्य उत्तरदिशायां हिमालयपर्वतः विराजते। तिसृषु दिशासु सागराः अस्य पदप्रक्षालनं कुर्वन्ति। अनेका नद्यः अत्र जनानां तृषां शाम्यन्ति। मध्ये विन्ध्याचलः विराजते। अस्य पुरातना दिव्या महती संस्कृतिः। अस्मिन् देशे महान्तः ऋषयः, कवयः अभवन्। वेदाः, उपनिषदः, पुराणानि, काव्यानि शोभन्ते। अस्य देशस्य वीरांगनाः देशभक्ताः स्वतन्त्रतायुद्धे भागं गृहीत्वा देशं स्वतन्त्रम् अकारयन्। अस्माकं देशः महान् अस्ति। जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

3. स्वयं लिखत।

**11.4** 1. (ii) अ + र् + थ् + अः
   (iii) च् + अ + क् + र् + अ + म्
   (iv) प् + र् + अ + क् + आ + श् + अः
   (v) व + इ + श् + र् + आ + म् + अः
   (vi) ब् + र् + अ + ह् + म् + अ + व् + इ + द् + य् + आ
   (vii) च् + इ + ह् + न् + अ + म्
   (viii) क् + इ + ञ् + च् + इ + त्
   (ix) उ + द् + ध् + आ + र् + अः
   (x) श् + ऋ + ङ् + ख् + अ + ल् + आ

2. (i) गच्छन्ति (ii) पठ्यते (iii) बालिकया (iv) बालिकाभ्याम् (v) फलम्

**11.7 पाठान्तप्रश्नाः**

1. (i) स् अ म् आ ह् अ र्, त्, उ, म्
   (ii) प् र् अ व् ऋ त् त् अः
   (iii) क् र् ई ड् आ, क् ष् ए त् र् ए
   (iv) द् उ र् व् य् अ व् अ ह् आ र अः
   (v) य् आ द् ऋ श् म्

2.

| सुबन्तानि | तिङन्तानि | अव्ययपदानि |
|---|---|---|
| धर्मगुरुभिः | संजायते | किन्तु |
| राष्ट्रम् | सन्ति | |

| | | |
|---|---|---|
| राजानः | भवति | न |
| प्रजापतिः | उत्पादयन्ति | इति |
| काले | | अपि |
| गुरुः | | अहो |
| शास्त्राणि | | |
| अशान्तिः | | |

3. (i) राष्ट्रे समाजे च दुष्टैः अशान्तिः भवति।
   (ii) दुष्टानां जनानां कृते यमस्य भयम् अपि नास्ति।
   (iii) अस्माकं प्रधानमन्त्री अतीव निपुणः।
   (iv) मम शिक्षिका विद्यालये व्याकरणं पाठयति।
   (v) उद्याने बहूनि पुष्पाणि सन्ति येषाम् उपरि भ्रमराः गुंजन्ति।
4. (i) विद्यालयः, भवनम्, प्राङ्गणम्, वाटिका, क्रीडाक्षेत्रम्, अध्यापकवर्गः, कक्षाः, छात्रसंख्याः, प्रयोगशालाः विशिष्टाः, गतिविधयः।
   (ii) शिक्षिका, विषयः, व्यक्तित्वम्, छात्रैः सह व्यवहारः, विशिष्टानि संस्मरणानि।
   (iii) षड् ऋतवः, ग्रीष्मर्तुः, वर्षर्तुः, मासाः, प्राकृतिकं वर्णनम्, स्वकीयाः अनुभवाः।
5. जलस्य उपयोगित्वम्/आपः सर्वस्य भेषजम्/जलस्य संरक्षणं किमर्थम्?
6. (क) दिसम्बरमासे समुद्रे महान् भूकम्पः जातः।
   (झ) दक्षिणप्रदेशानां तीरेषु तरंगाणाम् आक्रमणम् अभवत्।
   (ख) यथा यथा तरंगाः अग्रे गच्छन्ति, तथा तथा तेषां वेगः वर्धते स्म।
   (ङ) पूर्वदिने रविवारः आसीत्।
   (ट) तीरवासिनः जनाः आनन्देन सुप्ताः आसन्।
   (च) केचन प्रातः भ्रमणाय तत्र गताः आसन्।
   (छ) समुद्रतरंगैः संहारताण्डवम् आरब्धम्।
   (ज) लक्षाधिकाः मानवाः समुद्रेण नीताः।
   (घ) आश्चर्यं मृतेषु कश्चिदपि पशुः न आसीत्।
   (ग) सर्वे जनाः मुक्तहस्तेन सहायतां कुर्वन्ति।
7. समुद्रतरङ्गाणाम् आक्रमणम्, समुद्रे भूकम्पः, तरङ्गाणां वेगः
8. दया न जायते यस्य सः रक्षः इति स्मृतः।
9. स्वयं चित्रं दृष्ट्वा लिखत।

# 12

# संवादलेखनम्

चिन्तयत, वयं भाषायाः प्रयोगं कदा कुर्मः? नूनं यदा वयं किमपि वक्तुम् इच्छामः। वचनार्थम् अन्यस्य जनस्य आवश्यकता भवति अपि च सन्दर्भस्य अपि अपेक्षा जायते। यद्यपि वयं चिन्तने अपि भाषायाः प्रयोगं कुर्मः परन्तु संवादे तु अन्यः जनः अपेक्षितः भवति। वयं येन सह वार्तालापं कुर्मः तस्य आवश्यकतानुसारं परिस्थित्यनुसारं च भाषायां परिवर्तनं भवति। यदि अस्माकं गृहे कश्चित् महात्मा आगच्छति तदा अस्माकं व्यवहारः विनम्रः भवति। विराज्यताम्, आसनं स्वीकुरुत इत्यादि। परन्तु यदि कश्चिद् भिक्षुकः आगच्छति वयं किमपि द्वारे दत्त्वा गृहे प्रविशामः। केचन तु भिक्षुकं दृष्ट्वा अपशब्दान् अपि वदन्ति। अतः सन्दर्भानुसारं भाषायां परिवर्तनं भवति। अस्मिन् पाठे वयं संस्कृतभाषायां समुचितसंवादलेखनस्य अभ्यासं करिष्यामः।


## उद्देश्यानि

इमं पाठं पठित्वा भवान्

- संवादलेखनस्य कृते अपेक्षिततत्त्वानां परिचयं प्राप्स्यति;
- संवादे एकपक्षं पठित्वा द्वितीयं पक्षं पूरयितुं समर्थः भविष्यति;
- चित्रं दृष्ट्वा कल्पनया संवादलेखनं कर्तुं शक्ष्यति;
- संवादलेखने व्याकरणदृष्ट्या शुद्धभाषाप्रयोगं कर्तुं शक्तः भविष्यति;
- विभिन्नप्रदत्तसन्दर्भेषु संवादान् लेखितुं शक्तः भविष्यति।

## क्रियाकलापः

अधोलिखितं चित्रं पश्यतु। अत्र एकः फलविक्रेता फलानि विक्रीणाति।




12.1

भवान् फलानि क्रेतुं फलविक्रेतुः आपणं गच्छति। नूनं तत्र कश्चित् संवादः भविष्यति एव। अधोलिखिते संवादे वाक्यद्वयं समीचीनं नास्ति। तत् चित्वा तस्य समक्षम् असमीचीनम् (×) इति चिह्नेन प्रदर्शयत।


| संवादः | असमीचीनम् |
|---|---|
| 1. अयि भोः! एककिलोमितम् आम्राणि ददातु। | |
| 2. जम्बुफलानि कथं दीयन्ते? | |
| 3. आलुकानि तु समीचीनानि न सन्ति। | |
| 4. द्वे नारिकेलफले अपि ददातु। | |
| 5. प्रतिनारिकेलफलं पंचदशरूप्यकाणि ददातु भवान्। | |
| 6. सर्वमाहत्य कतिरूप्यकाणि ददामि? | |
| 7. केवलं सप्ततिः रूप्यकाणि ददातु। | |
| 8. एतानि शतं रूप्यकाणि स्वीकरोतु। | |
| 9. अवशिष्टां राशिं च प्रत्यर्पयतु। | |
| 10. किमपि अन्यत् फलं स्वीकरोतु। | |
| 11. फलापणे विविधानि फलानि सन्ति। | |

पठितानि एतानि वाक्यानि, किं ज्ञायते किं वाक्यद्वयम् असमीचीनम् अस्ति। शोभनम्। तृतीयं वाक्यम् असमीचीनम् यतः फलविक्रेतुः आपणे प्रायः आलुकानि न भवन्ति। अपि च एकादशं वाक्यम् अपि संवादार्थम् उपयुक्तम् नास्ति। कथम्? वयम् अत्र वर्णनं न कुर्मः, अतः परिस्थित्यनुसारम् एतत् वाक्यम् असमीचीनम् एव।

तर्हि, पश्यामः तावत् संवादलेखने केषांचित् तत्त्वानाम् अवधानम् विशेषतया अपेक्षितम्।







## 12.1 प्रथमः अंशः

संवादार्थम् अपेक्षितानि आवश्यकतत्त्वानि

(i) सन्दर्भः

(ii) पात्राणि

(iii) विषयवस्तु

(iv) परिवेशः/वातावरणम्

(v) पात्रानुसारं भाषासङ्गतिः

(vi) उपयुक्तसूक्तीनां/पद्यानां/उद्धरणानां ज्ञानम्

### (i) सन्दर्भः

भवन्तः जानन्ति एवं संवादार्थं सन्दर्भः महत्त्वपूर्णः वर्तते यथा रुग्णस्य चिकित्सकस्य मध्ये, आपणे ग्राहकस्य विक्रेतुः मध्ये, पत्रालये, चिकित्सालये, किशोरावस्थाम् अधिकृत्य छात्रयोः मध्ये इत्यादयः बहवः सन्दर्भाः भवितुं शक्नुवन्ति। सन्दर्भानुसारम् एव भाषायाः प्रयोगे वाक्यचयनं पदचयनं च करणीयम्।

### (ii) पात्राणि

ननु संवादः तु द्वयोः पात्रयोः मध्ये एव प्रवृत्तः भविष्यति। अतः छात्रैः/छात्राभिः सह शिक्षिकायाः अपि वार्तालापः भवितुं शक्नोति, अथवा त्रिषु जनेषु अपि कामपि समस्याम् अधिकृत्य संवादः भवितुं शक्नोति। गुरु–शिष्ययोर्मध्ये, पिता–पुत्रयोः मध्ये, भ्राता–भगिन्योः मध्ये अपि अथवा अपिरिचितेषु, मार्गेऽपि केनापि सह संवादः भवितुं शक्नोति। पात्रानुसारं भाषायाः प्रयोगः अपेक्षितः।

### (iii) विषय–वस्तु

पात्राणां संवादस्य विषयः कः इत्यापि विचारणीयः। केचन विषयाः एवं भवितुं शक्नुवन्ति– व्यायामस्य लाभाः, प्रातः भ्रमणस्य लाभः, अतिथेः सम्मानम्, परीक्षा, ऐतिहासिकयात्रा, शाकाहारः, गङ्गायाः प्रदूषणम् इत्यादयः।

(iv) संवादः कस्मिन् वातावरणे प्रचलति इत्यपि आवश्यकम्। युद्धे श्रीकृष्ण–अर्जुनयोः संवादः, अथवा प्रातः काले समुद्रतटे अथवा उद्याने अथवा गिरिशिखरे विवाहसमारोहे, विद्यालय–कक्ष्यायाम् प्रवृत्तेषु संवादेषु भिन्नता भविष्यत्येव।

(v) भाषावैविध्यम्–संवादे भाषा पात्रानुसारं परिवर्तते। संस्कृतनाटकेषु स्त्रीजनाः अथवा अशिक्षिताः प्राकृतभाषायाः प्रयोगमेव कुर्वन्ति। संवादे प्रयुक्तया भाषया शब्दावल्या च पात्रस्य चारित्रिकं वैशिष्ट्यं सिद्धं भवति।

### (vi) सुभाषितानां / सूक्तीनां / पद्यानां प्रयोगः

संवादे यदा पात्राणि स्वाभिप्रायं सिद्धं कर्तुं किमपि सुभाषितं श्लोकं पद्यं वा उदाहरणस्वरूपेण उच्चारयन्ति तदा तस्य पात्रस्य वाक्कौशलं वैदुष्यं स्मृतिः च स्पष्टीभवति।

(क) इदानीं वयम् उदाहरणरूपेण एकं संवादं पठामः।

सारिका — देविके! पश्य, मम नूतनं परिधानमपि लघु जातम्।

देविका — आम्, सारिके! मया सह अपि एषा समस्या वर्तते। षण्मासान्तरे एव मम वस्त्राणि लघूनि जायन्ते।

लतिका — पश्यत, पश्यत! मम तु पादरक्षेऽपि लघुनी जाते।

(आचार्या प्रविशति, छात्राः उत्तिष्ठन्ति)

सर्वाः छात्राः — आचार्ये! वयं नमामः।

आचार्या — चिरं जीवत। उपविशत। कस्मिन् विषये चिन्ता वर्तते?

छात्रा — आम् आचार्ये! अस्माकं परिधानं शीघ्रं लघुतरं जायते। चिन्तयामि कथम् एतत्?

आचार्या — किशोरावस्थायाम् एषा स्वाभाविकी एव प्रक्रिया। बालकानां शरीरेषु रोमाणि जायन्ते। शरीरं वर्धते। शरीराङ्गेषु परिवर्तनं जायते। स्वभावः परिवर्तते। नूतनाः अभिलाषाः भवन्ति। अतः चिन्ता न कार्या।



चित्र 12.2

पश्यन्तु अत्र कः सन्दर्भः? किशोरावस्थायां शरीरे भवितव्यानि परिवर्तनानि।

कति पात्राणि? तिस्रः छात्राः।

किं विषयवस्तु? यत् विषयम् अधिकृत्य (शरीरपरिवर्तनं, स्वरूपम् आदि) लिख्यते।

किं वातावरणम्? कक्षायाः

किं भाषावैविध्यम्? छात्राणां व्यवहारः उत्तिष्ठन्ति, प्रणमन्ति, सम्बोधनानां प्रयोगः।

(ख) एकम् अन्यत् उदाहरणं पश्यामः

युवकः अयि सुमुखि! किमर्थं पदातिः गच्छसि? मया सह 'बाइकयानस्य उपरि उपविश। त्वां यथेष्टं नेष्यामि।

स्मिता अरे! त्वम् पूर्वं स्वहस्तम् अपसारय। माम् प्रति ईदृशी सहानुभूतिः कथम्? न जानामि त्वाम्।

युवकः स्मिते! त्वम् अतीव सुन्दरी असि। हृदयेन त्वां वा×छामि। त्वदर्थे अहं किमपि कर्तुं शक्नोमि।

स्मिता एषः तव मनोविकारः। तव विवेकः गतः। कयापि बालिकया सह किम् उचितः एषः व्यवहारः?

(तदैव कश्चन युवकः सोमेशः आगच्छति)

सोमेशः का वार्ता विद्यते? अनेन किं कृतम्?

स्मिता एषः प्रतिदिनं माम् प्रति किमपि–किमपि कथयति। अद्यापि ....



चित्र 12.3

सोमेशः अरे! दुष्ट! त्वं कथं न लज्जसे? किं तव भगिनी नास्ति? तव मातापितरौ धन्यौ ईदृशेण पुत्रेण।

युवकः न, न, न .... अहं तु किमपि न कथयामि। अहं तु केवलम् एतस्याः साहाय्यं करोमि।

सोमेशः असत्यम्! पुलिसजनम् आह्वयामि। (चलदूरवाणीं कर्णे ददाति।)

युवकः अ अ अ क्षमस्व माम् क्षमस्व। पुनः कदापि एतां प्रति दृष्टिपातमपि न करिष्यामि।

सोमेशः स्मिते! त्वम् अपि ईदृशं दुष्टं प्रति दृढ़तया अधिक्षिपतु। मनोबलेन तस्य दुराग्रहं निराकरोतु। त्वम् अद्य सबला असि। 'कण्टकं कण्टकेनैव' इति सिद्धन्तः पालनीयः।

स्मिता सत्यम्, प्रतिरोद्धुं यतिष्ये। धन्यवादः तव। अरे! प्रेमरोगिन्। अभद्रम् आचरणं त्यज। अध्ययने परिश्रमे च तत्परः भव। अलम् कदाचारेण शिष्टः भव। **यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः** इति। गम्यताम्

युवकः धन्यवादः। भवत्या मम ज्ञाननेत्रे उन्मीलिते।

अत्र उपर्युक्त–संवादे भवद्भिः अन्यः एकः सन्दर्भः दृष्टः? आम्, सत्यम् अपरिचितयुवकेन महिलां प्रति अभद्रव्यवहारः।

अत्र भाषावैविध्यमपि दृश्यते। अमर्यादितव्यवहारात् परं स युवकः स्तब्धः भयभीतः च भवति। तदा स व्याकुलतया 'अ अ न न' इति वदति।

## पाठगतप्रश्नाः 12.1

1. संवादे अधोलिखिततत्त्वेषु किं तत्त्वं न परिगण्यते? तत् रेखाङ्कितं करोतु।
   भाषावैविध्यम्, स्वाभाविकता, पात्राणि, विस्तृतवर्णनानि, सन्दर्भः, अनुच्छेदाः, वातावरणम्
2. संवादद्वये प्रयुक्तानि पंच सम्बोधनपदानि चित्वा लिखत।
3. उपर्युक्तसंवादद्वये पात्रैः सह चारित्रिकं वैशिष्ट्यं मेलयत।

| 'अ' | 'ब' |
|---|---|
| (क) सारिका | (i) उच्छृंखलः मर्यादाहीनः |
| (ख) आचार्या | (ii) उत्तरदायित्वनिर्वाहे जागरूकः |
| (ग) स्मिता | (iii) किं कर्तव्यविमूढता |
| (घ) युवकः | (iv) विदुषी, मनोविज्ञानविशेषज्ञा |
| (ङ) सोमेशः | (v) शारीरिकवृद्धिम् अधिकृत्य चिन्ताकुला |

## 12.2 द्वितीयः अंशः

(1) संवादे वाक्यानां सन्दर्भं ज्ञात्वा एकपक्षस्य कृते रिक्तस्थानपूर्त्तिः।

अस्माभिः दृष्टं यत् संवादवाक्यानि परस्परसम्बद्धानि भवन्ति। अधोलिखितसंवादयोः एकः संवादः दिनेश–उमेशयोः मित्रयोः मध्ये अस्ति द्वितीयः– रुग्णस्य चिकित्सक्य च मध्ये प्रवर्तते। अत्र एकपक्षः प्रदत्तः। वयं द्वितीयं पक्षं पूरयितुं प्रयत्नं करिष्यामः।

### क्रियाकलापः

भवतः नाम दिनेशः। भवतः जन्मोत्सवः अस्ति। भवतः मित्रम् उमेशः। एतं कार्यक्रमम् उपलक्ष्य संवादं पूरयत।

दिनेशः अद्य मम जन्मोत्सवः अस्ति। त्वया अवश्यमेव आगन्तव्यम्।

उमेशः *कुत्र कदा च* जन्मोत्सवः भविष्यति?

दिनेशः गृहे एव सायं सप्तवादने।

उमेशः *किं लतिका अपि आगमिष्यति ?*

दिनेशः आम्, लतिका अपि आगमिष्यति।

उमेशः किम् *केककर्तनम् अपि भविष्यति ?*

दिनेशः केककर्तनम् न, हवनं कीर्तनं च भविष्यति। पश्चात् प्रीतिभोजः।

उमेशः शोभनम्।

दिनेशः जन्मदिने अहं किमपि *उपहारं न स्वीकरिष्यामि*।

उमेशः अरे! भवान् उपहारं न स्वीकरिष्यति। केवलं शुभकामनाः एव। प्रशंसनीयः विचारः।

इदानीम् अधोलिखितसंवाद पठत–

**रुग्ण–वैद्ययोः मध्ये संवादः**

रुग्णः वैद्यमहोदय! महती उदरवेदना अस्ति। हा! किं करोमि? शीघ्रम् औषधं ददातु।

वैद्यः (i) ..........................................................................

रुग्णः ह्यः रात्रौ आरब्धा।

वैद्यः (ii) ..........................................................................

रुग्णः प्रातःकाले मम मित्रं किमपि पेयं दत्तवान्। तत् पीत्वा एव उदरे भयंकरज्वालाः उत्पन्नाः।

वैद्यः (iii) हुं! ज्ञातम् ..........................................................................

रुग्णः एवम् किल? किं तत् मादकं द्रव्यमासीत्? इतः परं तस्य मित्रस्य संगतिमेव त्यक्ष्यामि।

वैद्यः (iv) ..........................................................................

रुग्णः आम्! इतः परं सात्त्विकपदार्थान् एव स्वीकरिष्यामि। सत्यमेव– ''संसर्गजा दोषगुणाः भवन्ति।''

वैद्यः (v) ..........................................................................

रुग्णः प्रतिदिनं गुलिकाद्वयं भोजनान्ते सेवनीयम् किम्? आम्, गृह्णामि।

## पाठगतप्रश्नाः 12.2

भवतां सम्भावितानि उत्तराणि अधः मंजूषायां लिखितानि परन्तु तत्र क्रमः नास्ति। समुचितं वाक्यं चित्वा संवादं पूरयत।

(क) त्वया किमपि मादकं द्रव्यं पीतं स्यात्।

(ख) औषधं ददामि। भोजनान्ते उष्णजलेन गुलिकाद्वयं सेवस्व।

(ग) कदा आरब्धा वेदना?

(घ) रात्रौ किं किं भक्षितम्?


(ङ) इदानीं केवलं सात्त्विकम् आहारम् एव स्वीकुरु। ''रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः।'' इति गीतायाम् उक्तम्।

---

## 12.3 तृतीयः अंशः

### चित्रं दृष्ट्वा संवादः

भवद्भिः दृष्टं यत् संवादे सन्दर्भस्य आवश्यकता भवति। एषः सन्दर्भः चित्ररूपेण अपि भवितुं शक्नोति। किमपि चित्रं वयं समाचारपत्रेषु पश्यामः। तत् दृष्ट्वा च आश्चर्यचकिताः भूत्वा वार्तालापं कुर्मः। एतस्मिन् परिवारे भ्राता भगिनी च अधः प्रदत्तं चित्रं दृष्ट्वा परस्परं वार्तालापं कुरुतः।



12.4


ऋषभः: ऋषिके! पश्य पश्य समाचारपत्रे एतत् चित्रम्।

ऋषिका: किं किम् अस्ति तत्र?

ऋषभः: पश्य, सर्वे जानन्ति अस्माकं जीवने वृक्षाणां महत्त्वम् तथापि भवनानां निर्माणार्थं सर्वे वृक्षाः पातिताः।

ऋषिका: अहो सत्यम्, अत्याहितम्। अयं तु महाविनाशः एव। सर्वे वृक्षाः कथं नृशंसतया पातिताः।

ऋषभः: आम्! एवं प्रतीयते यत् सर्वा भूमिः शवैः पूरिता।





ऋषिकाः सत्यम्। यदि वयम् पर्यावरणस्य विनाशं करिष्यामः तर्हि अस्माकं जीवनमेव दुष्करं भविष्यति।

ऋषभः आम्! मया पठितम्– वृक्षा सत्पुरुषाः इव सर्वं जनेभ्यः प्रयच्छन्ति, छाया च, फलानि च, काष्ठं च। अपि च पक्षिणां तु आश्रयः एव वृक्षेषु भवति।

ऋषिकाः आम्। अस्मिन् चित्रे एकोऽपि खगः नैव दृश्यते।

ऋषभः न जाने कदा मानवः प्रकृतेः संरक्षणं स्वं परमकर्तव्यम् इति ज्ञास्यति। मया तु श्रुतं विषवृक्षोऽपि न छेद्यः।

एवमेव भवन्तः समाचारपत्रेभ्यः चित्राणि संगृह्य वार्तालापं लेखितुं शक्नुवन्ति।

## क्रियाकलापः

अधोलिखितसंवादे एकपक्षं पूरयत

प्रकाशः अम्ब! मम विद्यालये छात्राः भ्रमणाय गच्छन्ति।

माता (i) ..........................................................................

प्रकाशः अधिकं धनं नापेक्षितम्। एकस्य कृते 150 रूप्यकाणि।

माता (ii) ..........................................................................

प्रकाशः प्रथमं विद्यालयतः पक्षिधामं गमिष्यामः। ततः अल्पाहारं कृत्वा अक्षरधामं गमिष्यामः।

माता (iii) ..........................................................................

प्रकाशः मम कक्षयायाः सर्वे एव छात्राः गमिष्यन्ति।

माता (iv) ..........................................................................

प्रकाशः श्वः एव सर्वे धनं दास्यन्ति।

माता (v) ..........................................................................

प्रकाशः धन्यवादः। भवत्या पंचाशत् रूप्यकाणि अधिकानि एव दत्तानि।

अत्र मातापक्षस्य संवादवाक्यानि अक्रमेण दत्तानि सन्ति। तानि भवान् क्रमेण लिखतु। विचारयतु यत् भवता लिखितः क्रमः कथम् उचितः अस्ति?

(क) कदा धनं दातव्यम्?

(ख) स्वीकरोतु। एतत् द्विशतम्।


(ग) कियत् धनम् अपेक्षितम्?

(घ) कति छात्राः गमिष्यन्ति?

(ङ) कुत्र कुत्र गमिष्यथ?

## पाठगत प्रश्नाः 12.3

1. अधोलिखितं चित्रं दृष्ट्वा द्वयोः मित्रयोः 'रवि–केशवयोः' संभावितं वार्तालापं प×च–षड् वाक्येषु लिखत। मंजूषायां सहायकपदानि दत्तानि



चित्र 12.5

रविः ..................................................

केशवः ..................................................

**मंजूषा**

आकाशः, मेघाः, वृक्षाः, सरोवरः, उभयतः, नीरवता, शान्तिः, जले प्रतिबिम्ब, पृष्ठे भवनम्, वृक्षे पुष्पाणि।

## 12.4 चतुर्थः अंशः

**संवादे शुद्धभाषाप्रयोगः**

अस्माभिः केचन संवादाः पठिताः, लेखनस्य अभ्यासः च कृतः परन्तु भाषाम् अधिकृत्य केचन बिन्दवः ध्यातव्याः एव।

- संवादे प्रत्येकं कथनं परस्परं सम्बद्धं, तर्कपूर्णं च भवेत्।
- भाषा शुद्धा भवेत्, क्रियापदानि कर्तृपदानुसाराणि भवेयुः।
- विशेषणेषु सा एव विभक्तिः भवेत् या विशेष्येण सह प्रयुज्यते यथा रम्यम् उद्यानम्, रम्या वाटिका, रम्यः सरोवरः इत्यादयः।
- भाषा पात्रानुसारं भवेत्।

## क्रियाकलापः

अधोलिखितसंवादे काश्चन भाषागताः अशुद्धयः रेखाङ्किताः सन्ति। तासां स्थाने शुद्धभाषाप्रयोगः करणीयः।

माता पुत्र! भवान् सर्वदा एव (i) क्रीडसि, कथम् उत्तीर्णं (ii) भविष्यसि?

पुत्रः (iii) अम्बा! किमर्थम् एवं (iv) वदति? अहं सर्वदा एव न (v) क्रीडति? सायं क्रीडामि, रात्रौ पठामि।

माता दर्शय गतमासस्य परीक्षाफलम्। अहं पश्यामि तव प्रगतिः पठने (vi) कीदृशः अस्ति।

पुत्रः आम्! इदानीम् एव दर्शयिष्यामि। (आनीय) पश्यतु अहम् एव प्रथमस्थानं (vii) प्राप्तवती।

माता भवतु पुत्र! इतः परं मम चिन्ता (viii) अपगतः।

## अधुना बोधामः

इदानीं पश्यामः अत्र शुद्धपदानि कानि भविष्यन्ति?

(i) क्रीडसि, क्रीडति भवान् इति शब्दस्य योगे प्रथमपुरुषस्य क्रिया प्रयुज्यते। एवमेव

(ii) भविष्यति न तु भविष्यसि।

(iii) अम्बा, अम्ब सम्बोधने 'अम्ब' शब्दस्य प्रयोगः भवति।

(iv) वदति शुद्धं भवेत् यदि कर्तृपदं 'भवती' अस्ति।

(v) क्रीडति, क्रीडामि यतः कर्तृपदं अस्ति 'अहम्'।

(vi) कीदृशः न, कीदृशी, प्रगतिपदस्य विशेषणम्।

(vii) प्राप्तवती, प्राप्तवान् यतः पुत्रः 'कर्ता' पुल्लिंगे अस्ति।

(viii) अपगतः न अपगता यतः चिन्तापदं स्त्रीलिंगे अस्ति।

## पाठगतप्रश्नाः 12.4

अधोलिखितसंवादे रेखांकितपदानां स्थाने शुद्धपदानि लिखत।

पुत्रः तात! अद्य प्रदर्शिनीं द्रष्टुं किं नगरं प्रति गच्छाम?

पिता प्रदर्शिनी कुत्र आयोजितः (i)?

पुत्रः 'प्रगतिमैदान' इति स्थाने खलु प्रदर्शिनी अस्ति।

पिताः शोभनम्। अहं सायंकाले शीघ्रम्, आगमिष्यति (ii) ततः गमिष्यामः।

मंजुला (iii) <u>पिता</u>! अहं तु <u>नूतना</u> (iv) परिधानं क्रेष्यामि।

माता आम्। अहमपि <u>नवीनं</u> (v) शाटिकां क्रेष्यामि।

पिता (vi) <u>पुत्रः</u>! किं प्रदर्शिनी परिधानानाम् अस्ति।

पुत्रः नहि नहि पितः! सा तु पुस्तकानाम् अस्ति। वयं <u>नूतनं</u> (vii) ज्ञानवर्धकानि पुस्तकानि <u>क्रेष्यन्ति</u> (viii)।

## 12.5 किम अधिगतम्

- भाषा मूलतः संवादरूपेण विकसति।
- संवादे पात्राणि भवन्ति।
- संवादः सन्दर्भानुसारं भवति।
- संवादे भाषा पात्राणां योग्यतानुसारं भवति।
- संवादे शुद्धभाषायाः प्रयोगः आवश्यकः।
- संवादे कथितानां वाक्यानां सहायतया पात्राणां चरित्रचित्रणं भवन्ति।

## 12.6 योग्यताविस्तारः

**संवादः** विचाराणाम् अभिव्यक्त्यै, भाव–प्रकाशनाय, तर्क–वितर्काभ्यां ज्ञानवर्धनाय प्रमुखः सहजः माध्यमः अस्ति। महाकाव्येषु, लोककथासु लोकजीवने, प्रत्येकं क्षेत्रे विविधं संवादं पश्यामः। अत्र लोककथाधृतम् ज्ञानवर्धकम् एव संवादम् बोधन्तु।

(मणिबल्लभः मणिपुरनगरस्य शासकः आसीत्। सः धार्मिकः नीतिमान् बुद्धिमान् चासीत् परन्तु सः महान् गर्विष्ठः। एकदा सः पार्वतीपुरं नामकं ग्रामं गतः। तत्र कश्चन मतिमान् मेषपालः मिलितः। तेन सह ज्ञानवर्धकः रोचकः च एवं संवादः जातः)

मणिवल्लभः भोः मेषपाल! जगति सर्वस्मात् कान्तियुक्तं किम्?

मेषपालः राजन्! सूर्यस्य प्रकाशः एव सर्वस्मात् कान्तियुक्तम्।

मणिवल्लभः श्रेष्ठं जलं किम्?

मेषपालः जलेषु श्रेष्ठं तु गङ्गाजलम् एव।

मणिवल्लभः सर्वेषु पुष्पेषु उत्तमं किम्?

मेषपालः कमलपुष्पम्

मणिवल्लभः कस्य निद्रा समीचीना?

मेषपालः श्रान्तस्य मनुष्यस्य निद्रा समीचीना।

राजा बाढम्। अरे! त्वं तु उच्चैः हससि? परिहासस्य किं कारणम्?

मेषपालः राजन्! मया उक्तानि सर्वाणि उत्तराणि असमीचीनानि एव।

राजा तर्हि समीचीनानि उत्तराणि वदतु।

मेषपालः हे राजन्! श्रृणोतु, वस्तुतः जगति नेत्रयोः कान्तिः एव सर्वस्मात् उत्तमा। तत् जलं श्रेष्ठं यत् शुष्कप्रदेशे प्राप्यते। कार्पासस्य पुष्पमेव सर्वस्मात् उत्तमम्। नीरोगस्य मनुष्यस्य निद्रा एव समीचीना।

राजा अरे! भवान् तु मत्तः अपि बुद्धिमान्। धन्यवादः।

## 12.7 पाठान्तप्रश्नाः

1. अधोलिखितविषयकं संवादं लिखत (दशवाक्येषु एव)
   माता–पुत्रीमध्ये बालिकानां कृते निरादरस्य भावनाम् अधिकृत्य संवादः।
2. भ्रातुः भगिन्याः मध्ये ग्रीष्मावकाशे पर्वतीयप्रदेशं प्रति गन्तुम् तत्परताम् अधिकृत्य संवादः।
3. समाचारपत्रे बसदुर्घटनायाः चित्रमाधृत्य प्रभा–विभा सख्योः मध्ये जातः संवादः।
3. संवादस्य प्रमुखतत्त्वानि कानि इति स्पष्टयत।
4. भवतः मित्रं अशोकः धूम्रपानं करोति। भवान् शिवेशः, तस्य धूम्रपानं दूरीकर्तुं मित्रेण सह कीदृशं संवादं करिष्यति? इति लिखत।

## 12.8 उत्तराणि

**पाठगतप्रश्नाः**

**12.1** 1. विस्तृतवर्णनानि, अनुच्छेदाः

2. देविके, सारिके, आचार्ये, भ्रातः, भगिनि

3. क + (v), ख + (iv), ग + (iii), घ + (i), ङ + (ii)



टिप्पणी

**12.2** (i) ग, (ii), घ, (iii), क, (iv), ङ, (v), ख

**12.3** 1. कल्पनया मंजूषापदसहायतया संवादलेखनम् कुरुत

**12.4** 1. (i) आयोजिता

(ii) आगमिष्यामि

(iii) पितः

(iv) नूतनं

(v) नवीनाम्

(vi) पुत्र

(vii) नूतनानि

(viii) क्रेष्यामः

**12.7 पाठान्तप्रश्नाः**

स्वकल्पनया संवादलेखनम्

# उच्चतरमाध्यमिकस्तरे
# संस्कृतपाठ्यक्रमः

## 1.0 औचित्यम्

संस्कृतं नाम विश्वस्य प्राचीनतमा भाषा। एषा भाषा अधिकांशभारतीयभाषाणाम् यूरोपीयभाषाणां च जननीरूपेण अथवा सम्पोषिकारूपेण विराजते। एषा ननु मूल ोतः एव भारतीयसंस्कृतेः, धर्मस्य, दर्शनस्य, अध्यात्मज्ञानस्य, इतिहासस्य, पुराणानाम्, भूगोलस्य, राजनीतेः अपि च विज्ञानस्य। संस्कृतभाषा नवीनशब्दानां निर्माणार्थम् अपूर्वां क्षमतां धारयति यस्याः उपयोगः अन्याभिः भारतीयभाषाभिः अपि क्रियते। राष्ट्रीयभावनात्मकैक्याय अन्ताराष्ट्रियभ्रातृत्वभावनायाः सुदृढीकरणाय अस्याः महत्त्वपूर्णं योगदानमस्ति। संस्कृतवाङ्मये मानवीयमूल्यानां संरक्षणार्थं संवर्धनार्थं सम्यग्विकासार्थञ्च अत्र अमूल्यसामग्री विद्यते। 'वसुधैव कुटुम्बकम्' 'यत्र विश्वं भवत्येकनीडम्' इत्यादीनि आदर्शवाक्यानि आदिकालतः अद्यपर्यन्तम् विश्वस्य सम्मुखे विश्वव्यापिनः ऐक्यस्य कीर्तिमानं स्थापयन्ति। इयं भाषा एव वैश्वीकरणस्य संकल्पनां सर्वप्रथमं प्रस्तौति। संस्कृत भाषाभागीरथी प्राचीनकालतः अद्यावधि सततरूपेण प्रवहमाना वर्तते। वर्तमाने कालेऽपि बहुभिः जनैः दैनिकजीवने अस्याः भाषायाः प्रयोगः क्रियते। छात्राः संस्कृतभाषायां निहितज्ञानेन विज्ञानेन च परिचिताः भूत्वा आत्मगौरवस्य अनुभवं कुर्युः इति कारणतः उच्चतरविद्यालयीयपाठ्यक्रमे संस्कृतभाषायाः अध्ययनार्थम् अवसरः कल्प्यते।

उच्चतरमाध्यमिकस्तरे संस्कृतभाषां पठित्वा छात्राः विश्वविद्यालयस्तरे प्रवर्तमानेषु पाठ्यक्रमेषु अध्ययनार्थम् अवसरं प्राप्तुं समर्थाः भविष्यन्ति, भारतीयस्य आध्यात्मिकसाहित्यस्य पारायणे, वैज्ञानिकचिन्तने शक्ताः भविष्यन्ति। संस्कृतवाङ्मये निहितविशिष्टज्ञानसम्पदा परिचिताः भूत्वा गौरवम् अनुभविष्यन्ति। एषः पाठ्यक्रमः नैतिकादर्शानां स्थापनायाम् अपि च सम्पूर्णव्यक्तित्वविकासार्थं च साहाय्यकः भविष्यति इति आशास्यते। संस्कृताध्ययनं निस्संशयं व्यवसायप्राप्तौ अपि सहायकं भवत्येव। विशेषतः अधोलिखिताः अवसराः अपि उपलब्धाः भवन्ति–

- विधिशास्त्रे, दर्शनशास्त्रे, पुरातत्त्वशास्त्रे अपि च समानान्तरवैज्ञानिकशास्त्रेषु अध्ययनसौविध्यम्;
- जर्मनरशियनफ्रैंचादिवैदेशिकभाषासु प्रचलितपाठ्यक्रमेषु प्रवेशः;
- संस्कृतभाषायाः अध्ययनेन दूरदर्शन/आकाशवाण्यादि–सञ्चारमाध्यमेषु समाचार–सम्पादकपदे, समाचारवाचकपदे नियुक्त्यर्थं चयने वरीयता;
- संस्कृतवाड्.मयविषयकप्रश्नानां समाधाने सौकर्यदक्षता च।

## 2.0 पूर्वापेक्षा

अस्मिन् पाठ्यक्रमे प्रवेशात् पूर्वं छात्रः सरलसंस्कृतवाक्यानां श्रवणे भाषणे च कृताभ्यासः अस्ति। संस्कृतसाहित्यात् सङ्कलितं सरलगद्यांशं पद्यांशं च पठित्वा अवबोधने समर्थः, सरल–संस्कृतवाक्यानां रचनार्थं च सज्जः अस्ति। आकाशवाणीतः दूरदर्शनतः च प्रायशः प्रसारिताः संस्कृतकार्यक्रमाः विशेषतः संस्कृतवार्ताः (समाचाराः) चापि तेन श्रुताः अवबोधिता इत्यपि अपेक्ष्यते। विविधसन्दर्भेषु संस्कृतश्लोकाः (सुभाषितानि) च तेन श्रुताः पठिताः च, तेषाम् अर्थावबोधने अपि स सक्षमः इति आशास्यते।

## 3.0 उद्देश्यम्

अस्मिन् स्तरे संस्कृतभाषायाः शिक्षणस्य उद्देश्यानि सन्ति–

### सामान्य–उद्देश्यानि

- संस्कृतभाषायाः संस्कृतवाङ्मयस्य च विषये रुचिवर्धनम्ः;
- संस्कृतसाहित्यस्य विविधविधानां परिचयः;
- संस्कृतभाषाकौशलेषु दक्षताविकासः;

- राष्ट्रियस्तरे सामाजिक–सांस्कृतिक–वैज्ञानिकाध्यात्मिकसंचेतनाविकासः;
- आचारशुद्धिमाध्यमेन छात्राणां चारित्रिकविकासः।

## विशिष्ट–उद्देश्यानि

### श्रवणं भाषण च

- छात्राः दैनन्दिनव्यवहारे शिष्टाचारपालने संस्कृतस्य प्रयोगं कुर्युः;
- सरलसंस्कृते प्रश्नं प्रष्टुं समर्थाः भवेयुः
- सरलसंस्कृतप्रश्नानां मौखिकरूपेण उत्तरदाने समर्थाः भवेयुः;
- वर्णानां शुद्धम् उच्चारणं कर्तुं समर्थाः भवेयुः;
- सरलसंस्कृतवाक्येषु भावप्रकाशने शक्ताः भवेयुः।

### पठनम्

- प्रदत्तगद्यांशस्य, पद्यांशस्य नाट्यांशस्य च मौनवाचनं, सस्वरवाचनम् अथ च भावपूर्णवाचनम्;
- पठितांशाद् अतिरिक्तं पाठं, सरलसंस्कृतं (गद्यांशं पद्यांशं वा) पठित्वा तस्य भावावबोधनम्,
- सरलश्लोकानाम् अन्वयक्षमता;
- क्रमरहितवाक्यानि पठित्वा मौखिकरूपेण क्रमनिर्धारणम्।

### लेखनम्

- युक्तिपूर्वकं वाक्यानां संयोजनम्;
- घटनाक्रमानुसारं लघुनिबन्धलेखनम् संवादलेखनम्;
- प्रदत्तपरिस्थित्यनुसारं पत्रलेखनम्;
- अभिनन्दन–निमंत्रण–वर्धापनपत्राणां लेखनम्, प्राचार्यं प्रति च प्रार्थनापत्रलेखनम्;
- प्रदत्तसंवादे रिक्तस्थानपूर्त्तिः;
- सरलसंस्कृते कथनमाधृत्य प्रश्ननिर्माणम्।

## अनुप्रयुक्तव्याकरणम्

- देवनागरीलिपिज्ञानम्, संयुक्तव्यञ्जनलेखनम्, स्वरव्यञ्जनसंयोजनम्, शब्दानां वर्णविन्यासः;
- प्रातिपदिकानां सविभक्तिकप्रयोगेण वाक्यनिर्माणम्
- वर्णसंयोजनम्, वर्णविश्लेषणम्
- कर्त्तृपदेन सह समुचितक्रियाप्रयोगः
- विशेष्यानुसारं विशेषणप्रयोगः
- कृदन्त–तद्धितान्तपदैः वाक्यनिर्माणम्
- प्रदत्त–अव्ययानां शुद्धप्रयोगः
- समस्तपदानां विग्रहः
- सन्धियुक्तपदानां सन्धिविच्छेदः
- उपपद–विभक्तिप्रयोगः

## 4.0 पाठ्यक्रम–परिचय

राष्ट्रियमुक्तविद्यालयीयसंस्थाने प्रवेशार्थिनां रुच्यनुसारम् आवश्यकतानुसारञ्च एषः संस्कृतभाषापाठ्यक्रमः। एषः पाठ्यक्रमः द्विधा विभक्तः–केन्द्रिकपाठ्यक्रमः वैकल्पिकपाठ्यक्रमश्च। केन्द्रिक–पाठ्यक्रमः सर्वैः छात्रैः समानरूपेण पठनीयः। वैकल्पिकखण्डे विकल्पद्वयं भविष्यति। तत्र कस्यचित् एकस्य विकल्पस्य अध्ययनम् अपेक्षितं वर्तते।

| | | |
|---|---|---|
| I. | केन्द्रिक–पाठ्यक्रमः | 85 |
| | **श्रवणम् भाषणम्** | **श्रेणीबद्ध मूल्यांकनम्** |
| | पठनम् | 50 |
| | लेखनम् | 20 |
| | अनुप्रयुक्त व्याकरणम् | 15 |
| **II.** | **वैकल्पिक पाठ्यक्रमः** | **15** |
| | (क) संस्कृत संस्कृतिश्च | |
| | (ख) प्रयोजनमूलक संस्कृतम् | |
| | **कुलयोगः** | **100** |

## 5.0 पाठ्यक्रमस्य विवरणम्

### I. केन्द्रिक–पाठ्यक्रमः

केंद्रिकपाठ्यक्रमे संस्कृतभाषायाम् अभिरुचिवर्धनाय भाषाध्ययनकौशलनां विकासाय, संस्कृत– साहित्यस्य विविधताया परिचयार्थं च सामग्री भविष्यति। अस्मिन् पाठ्यक्रमे चत्वारः खण्डाः सन्ति।

**प्रथमः खण्डः**

**श्रवणम्–भाषणम्** — श्रेणीबद्धमूल्यांकनम

अवधि : 30 होराः

**औचित्यम्**

'भाष्' धातोः निष्पन्नः एष शब्दः 'भाषा' इति। यावद् भाषायाम् न भाष्यते तावद् भाषायाः सम्यग् ज्ञानं न भविष्यति। भाषायाः सर्वप्रथमं कौशलं श्रवणम्। यावद् भाषा न श्रूयते तावद् भाषणक्षमता अपि न लभ्यते। अतः सम्पर्ककक्षासु आचार्येण सह अपि च परस्परम् छात्रैः संस्कृतभाषायां सामान्यवार्तालापः अपेक्ष्यते। आकाशवाण्याः दूरदर्शनात् प्रसारितकार्यक्रमान् श्रुत्वा दृष्ट्वा च छात्राः सम्यग्रूपेण तान् अवगच्छेयुः इति कारणादपि संस्कृतभाषायां श्रवण–भाषण–अभ्यासः अपेक्षितः।

**शिक्षण–बिन्दवः**

संस्कृत–भाषायाः विशिष्टध्वनीनाम् उच्चारण–अभ्यासः, प्रदत्तपरिस्थित्यनुसारं संवादाः यथा– अतिथेः स्वागतम्, चिकित्सक–रुग्णमध्ये वार्तालापः, गुरु–शिष्यमध्ये शिष्टाचारवाक्यानि, सम्पर्ककक्षासु व्यवहारोपयोगिवाक्यानि, इत्यादयः।

**शिक्षण–पद्धतिः**

पाठैः सह यथास्थानं श्रवणभाषणसम्बद्धसामग्री अपि सङ्कलिता अस्ति यस्य अभ्यासः ध्वनिमुद्रिकासहायतया अपेक्षितः। ताः सम्यक् श्रुत्वा भाषावबोधनं कृत्वा च दैनिकव्यवहारे यथावसरं प्रयोगः करणीयः।

**द्वितीयः खण्डः**

**पठनम्**

अङ्काः 40 अवधि : 70 होराः

**औचित्यम्**

पठनेन वयं ज्ञानस्य उपार्जनं कुर्मः। पठनेन भावानां परिशुद्धिः जायते चिन्तनमननक्षमता सर्जनात्मकशक्तिश्चापि वर्धते। तदनु आचरणेन अस्माकं संस्काराः दृढीभवन्ति। अस्माभिः रामादिवद् वर्तितव्यं न तु रावणादिवत्–इति विवेकः उत्पद्यते। संस्कृतवाङ्मयस्य परिचयेन आत्मगौरवानुभूतिः जायते। पठनेन जिज्ञासा वर्धते पुनः अधिकाधिका पठनप्रवृत्तिः च जायते।

**शिक्षण–बिन्दवः**

पाठचयनार्थं प्रस्ताविता–सामग्री प्रमुखतयाः गद्यं–पद्यं–नाटकं चेति त्रिधा भविष्यति। तत्र वेदोपनिषदाम्, रामायण–महाभारतादिमहाकाव्यानां, लौकिकसंस्कृतसाहित्यस्य प्रमुख–अंशानां च परिचयः प्रदीयते। संस्कृतभाषायाम् अद्यापि साहित्यरचना भवति इति अनुभावयितुम् समकालीनसंस्कृतलेखकानां कृतिभ्यः अपि पद्यांशाः प्रस्ताविताः। तत्र राष्ट्रियपाठ्यचर्यायाः केंद्रिकबिन्दूनां यथा जनसंख्याशिक्षणम्, पर्यावरणरक्षणम्, बालिका–शिक्षा, नारी सशक्तीकरणम्, जीवन–कौशलानि, राष्ट्रप्रेम, मानवमूल्यादीनां समावेशः क्रियते। एषा पाठ्यसामग्री शिक्षार्थिभ्यः मुद्रितरूपेण प्रदीयते, शुद्ध–उच्चारणशिक्षणाय, वस्तु–अवबोधनाय च सर्वेषां मूलपाठानां ध्वन्यंकनं श्रव्य–मुद्रिका (ऑडियो टेप) प्रस्तूयते। श्रवण–पठनादि कौशलानाम् अभिवृद्धये च पाठैः सह यथास्थानं अतिरिक्तपाठ्यसामग्री श्रव्यसामग्री अपि दीयते।

- **गद्यपाठाः**

अङ्काः 20 अवधि : 30 होराः

अस्मिन् पाठ्यक्रमे नव–गद्यपाठाः भविष्यन्ति। तेषां सङ्कलनम् अधेलिखितानुसारम् अपेक्षितम् .......

- कथापाठाः 3 (उपनिषत्कथा, जातक–कथा, नीतिकथा)
- निबन्धात्मकपाठाः 3 (उपनिषत् साहित्यात् गद्यांशः, पर्यावरणविषयकः, संस्कृतवाङ्मयस्य परिचायकाः)
- जीवनपरिचयाः 2 (प्राचीनवैज्ञानिकः, आधुनिका कापि सुप्रसिद्धा महिला)
- आत्मकथा 1 (बाणभट्टस्य)

  –– अपठित–अवबोधनाय अतिरिक्तसामग्री

- **पद्यपाठाः**

अङ्काः 10

अस्मिन् पाठ्यक्रमे अष्टपाठाः अपेक्षिताः। तेषाम् सङ्कलनाधारः–

- वैदिकसाहित्यात् (वेद–उपनिषदादिभ्यः) – स्वस्तिपन्थामनुचरेम 1
- नीतिग्रन्थेभ्यः नीतिनवनीतम् 1
- स्वस्थवृत्तम् (चरकसंहितातः) 1
- पद्यात्मक कथा (महाभारतात्) 1
- ऋतुवर्णनम् वर्षा (रामायणतः) 1

  – पद्यपाठेषु––हिमालयवर्णनम् इति पाठेन सह अपठितावबोधनसामग्री प्रस्तोष्यते। प्रहेलिका इति पाठेन सह प्रहेलिकापृच्छने समाधाने च निदर्शनम्।

- प्रहेलिकाः 1
- हिमालयवर्णनम् (कुमारसम्भवात्) 1

• **नाट्यांशाः**

अङ्काः 10 अवधि : 20 होराः

अस्मिन् पाठ्यक्रमे – चत्वारः पाठाः योजिताः। तेषाम् सङ्कलनाधारः–

- कालिदासस्य कश्चन नाट्यांशः 1
- भासनाटकम् (कश्चन अंशः) 1
- मृच्छकटिकात् नाट्यांशः 1
- आधुनिकसन्दर्भे नाट्यांशः 1
- ऐतिहासिक–उपाख्यान–आधारितं नाट्यरूपान्तरम्

• **अपठितम्**

अङ्काः 10 अवधि : 30 होराः

- गद्यावबोधनम् – 5
- पद्यावबोधनम् – 5

निर्धारितां पाठ्यसामग्रीं पठित्वा पठनावबोधनकौशले एतावती दक्षता प्रजायेत यत् शिक्षार्थी कामपि अपठितां सामग्रीं (गद्यांशं पद्यांशं वा) पठित्वा तस्याः भावबोधने सक्षमः स्यात्। तस्याभ्यासः विविधैः पाठैः सह एव क्रियते, परं मूल्यांकने न तेषां प्रयोगः विधेयः। तत्र तु स्तरानुसारं अपठितांशम् एव दीयते।

## शिक्षण–पद्धतिः

(गद्यं–पद्यं–नाटकमपठितञ्च)

प्रदत्तां पाठ्य–सामग्रीं गद्यं–पद्यं–नाटकम् अपठितम् मौनपाठविधिना, सस्वरपाठविधिना च स्वयं पठेत्। तदनु ध्वनिमुद्रिकां च श्रुत्वा यथावसरं स्वपठनं परिष्कुर्यात्। पुनः पुनः पठनेन पठितां सामग्रीम् अवबुध्येत्। तत्र प्रदत्तम् अभ्यासकार्यं च कुर्यात्। सम्पर्ककक्षायाः आचार्यम् उपगम्य पठितं विषयं प्रति स्वशङ्कानिराकरणं कुर्यात्।

पाठ्यपुस्तकम् अतिरिक्त विविधम् उपलब्धं पत्र पत्रिकादिकं संस्कृत साहित्यम् अपि संगृह्य पठेत्।

समुदाये ये केचन संस्कृतशिक्षकाः विद्वांसः, संस्कृतज्ञाः स्युः तेषां साहाय्यम् उच्चारणसंशोधने, पठनकौशलवर्धने, ज्ञानवर्धने, च प्राप्तुं शक्यते।

## तृतीयः खण्डः

## अनुप्रयुक्तं व्याकरणम्

अङ्काः 15 40 : होराः

### औचित्यम्

व्याकरणं भाषाम् अन्वेति। व्याकरणस्य सिद्धान्तानाम् स्वतंत्रशास्त्ररूपेण शिक्षणम् अत्र उद्दिष्टं नास्ति। पाठ्यसामग्रीम् अधिकृत्य ये ये व्याकरणनियमाः सिद्धान्ताः वा अपेक्षिताः तेषां विवेचनं तत्र पाठे एव क्रियते। एवं हि शिक्षार्थिनः सरलतया भाषायां व्याकरणनियमानां, सिद्धान्तानां च व्यावहारिकप्रयोगं कर्त्तुम् अपि जानन्ति।

### शिक्षण–बिन्दवः

**सन्धिः** – पाठे प्रयुक्तानाम् अधोलिखितसन्धियुक्तपदानां सन्धिच्छेदो वा, सन्धिकरणम्

(i) स्वरसन्धिः – यण्, गुण, वृद्धि, दीर्घ, पूर्वरूपम् अयादिः।

(ii) व्यंजनसन्धिः – जश्त्वम् चर्त्वम्, श्चुत्वम्, ष्टुत्वम्, अनुस्वारः, णत्वविधानम्।

(iii) विसर्गसन्धिः– सत्वम् उत्वम् रत्वम्, लोपः।

**शब्दरूपाणि** – पाठे प्रयुक्तानाम् अधोलिखितानाम् अपि च तत्सदृशशब्दानां रूपपरिचयः

**स्वरांताः** – बालक, फलम्, लता, मुनि, पति, मति, नदी, साधु, मधु, पितृ, अक्षि, गो।

**व्यंजनांताः** – राजन्, विद्वस्, चंद्रमस्, गच्छत्, मनस्, गुणिन्, आत्मन्, धनवत्, (मतुप् प्रत्ययांत)

**सर्वनामानि** – सर्व, यत्, तत्, किम्, इदम्, अदस्, (सर्वेषु लिङ्गेषु) अस्मद्, युष्मद् भवत्

**संख्यावाचकाः शब्दाः** 1 –100 (एकतः शतं पर्यन्तम्)

**संख्यावाचक** – शब्दानां रूपाणि

**धातुरूपाणि** –अधोलिखितधातूतां लटि, लृटि, लोटि, विधिलिङि च वाक्येषु प्रयोगाभ्यासः

**भ्वादिगणतः** – भू, पठ् पा (पिब्), दृश् (पश्य), नी, भज् लभ् सेव्, याच्।

**अदादिगणतः** – अस्, ब्रू, हन्।

**जुहोत्यादिगणतः** – दा, धा,।

**दिवादिगणतः** – नृत, नश्, त्रस्, विद्।

**स्वादिगणतः** – शक्, आप्।

**तुदादिगणतः** – इष् मुच्, प्रच्छ्, विश्।

**तनादिगणतः** – कृ

**क्र्यादिगणतः** – क्री

**चुरादिगणतः** – चुर, भक्ष्, कथ्, गण्।

**वाच्यम्–वाच्यपरिवर्तनम्** – कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम्।

**उपसर्गाः–प्रादयः उपसर्गाः** (पाठ्यपुस्तके प्रयुक्ताः)

**प्रत्ययाः** – अधोलिखितप्रत्यययुक्तशब्दानां भाषायां प्रयोगः

**स्त्रीप्रत्ययाः** – टाप् (आ), ङीप्/ङीष् (ई)

**कृत्प्रत्ययाः** – शतृ, शानच्, क्त, क्तवतु, क्त्वा, ल्यप्, तुमुन्, तव्यत्, अनीयर्, यत्, तृच्, ण्वुल्।

**तद्धितप्रत्ययाः** – तरप्, तमप्, इयसुन्, इन्, मतुप्, ठक् (इक्), त्व, तल्।

**विभक्तयः** – कारकविभक्तयः – प्रथमातः सप्तमीपर्यन्तम्

**उपपदविभक्तयः** – निर्धारितपाठेषु प्रयुक्तानाम् उपपदविभक्तीनां प्रयोगः

**समासाः** – पाठेषु यथासन्दर्भं समस्तपदानाम् अभिज्ञानं विग्रहकरणञ्च।

अव्ययीभावः, बहुव्रीहिः तत्पुरुषः, कर्मधारयः, द्विगुः, द्वन्द्वः,।

**अव्ययानि** – पाठ्यपुस्तके निर्धारितपाठेषु प्रयुक्तानाम् अव्ययपदानां अन्यवाक्येषु प्रयोगः यथा – पुनः, उच्चैः, नीचैः, शनैः, अधः, चिरम्, नूनम्, पुरा, खलु, मुहुः, भूयः, ह्यः, श्वः, अद्य, अधुना, तूष्णीम् कुत्र, उपरि, मा, न, च, अभितः, परितः, सह

## चतुर्थः खण्डः

### लेखनम्

अङ्काः 20 | 40 होराः

### औचित्यम्

लेखनम् अभिव्यञ्जनात्मकं कौशलम्। अस्य माध्यमेन अस्माकं भावानां विचाराणां च अभिव्यक्तिः भवेत्।

लेखनेन एव शब्दानां साधुप्रयोगसामर्थ्यं संवर्धते। विविधविधासु लेखनेन सर्जनात्मकशक्तिविकासः अपि भवेत्। दैनन्दिनव्यवहारे यथापेक्षितं सन्देशप्रेषणार्थं सूचनाप्रदानार्थं च लेखनमावश्यकम्।

छात्रः सरलविषयेषु स्वविचारान् युक्तियुक्तक्रमेण प्रस्तोतुं शक्ष्यति। विरामचिह्नानां सम्यक् प्रयोगं कर्तुं शक्ष्यति।

### शिक्षणबिन्दवः

प्रदत्तपदावलिमाध्यमेन कथा–अनुच्छेदादीनां लेखनम्। प्रदत्तेषु वाक्येषु रिक्तस्थानपूर्तिः, संवादपूर्तिःवा। कथासु नाटकेषु वा प्रमुखपात्राणां चरित्रचित्रणम् पठितसामग्रीमनु समानान्तरसूक्तिसंग्रहः प्रदत्तविषयेषु सरलनिबन्धलेखनम्।

- पत्रलेखनम् 5
- लघुनिबन्धलेखनम् 10
- संवादलेखनम् 5

### शिक्षण–पद्धतिः

निर्देशितलेखनम्

1. चित्राणि अधिकृत्य शीर्षकलेखनम्
2. प्रदत्तविशेष्यैः सह उपयुक्तविशेषणयोजनम्
3. प्रदत्तशब्दैः अनुच्छेदलेखनम्
4. विभिन्नपरिस्थितिषु संवादलेखनम्
5. क्रमरहितवाक्यानाम् सार्थकं क्रमायोजनम्
6. अशुद्धवाक्यानां सम्पादनम्
7. प्रदत्त–उपमेयानाम् उपमानलेखनम्
8. विविधसन्दर्भेषु औपचारिक–अनौपचारिकपत्रलेखनम्
9. विभिन्नसूक्तीः अधिकृत्य भावार्थलेखनम्
10. प्रदत्त–अनुच्छेदस्य सारांशलेखनम्
11. प्रदत्तश्लोकानां गद्यांशानां च शीर्षकलेखनम्
12. कथनानि अधिकृत्य प्रश्ननिर्माणम्।

## 5.2 वैकल्पिकपाठ्यक्रमः

अङ्काः 15 | 30 होराः

भारतीया संस्कृतिः मूलतः संस्कृताश्रिता। अस्माकं जीवनपद्धतिः, परम्पराः, जीवनदर्शनम्, आचारविचाराः, साहित्यम् च संस्कृतवाङ्मयेन प्रभावितं दृश्यते। संस्कृतभाषायां विलक्षणा शब्दनिर्माणशक्तिः। न केवलम् आधुनिकभारतीयभाषासु अपितु वैदेशिकभाषासु अपि संस्कृतस्य प्रभावः संलक्ष्यते। शिक्षार्थिभ्यः अस्य परिचयं दातुं विकल्पद्वयं प्रस्तूयते–

(i) संस्कृतं संस्कृतिश्च

(ii) प्रयोजनमूलकसंस्कृतम्

छात्राः स्वरुचिम् आवश्यकतां च अनुसृत्य कमपि विकल्पं ग्रहीतुं शक्नुवन्ति।

### (i) संस्कृतं संस्कृतिश्च

**औचित्यम्**

भारतीयसंस्कृतेः मूलाधारः संस्कृतमस्ति। प्रायः सर्वाः भारतीयभाषाः यादृशीषु भिन्नासु लिपिषु लिख्यन्ते तासां मूलं संस्कृतलेखनस्य ब्राह्मीलिपिः एव वर्तते। आधुनिकलिपीनां वर्णाकृतयः स्वरव्यञ्जनानुक्रमः संस्कृतवर्णमालानुप्राणिताः सन्ति। भारतीयभाषाणां साहित्येषु अपि एवमेव संस्कृतसाहित्यप्रभावः दृश्यते। भारतीये संगीते, नृत्ये, नाट्ये चित्रकलायां शिल्पकलायां, मूर्तिकलायाम् अपि संस्कृतभाषायाः वाङ्मयस्य च प्रभावः स्पष्टरूपेण परिलक्ष्यते। अत एव मनीषिणः संस्कृतं भारतीयसंस्कृतेः आधार इति वदन्ति। इमाम् उदात्तपरम्पराम् अवबोधयितुं संस्कृतभाषाज्ञानं परमावश्यकम्।

**उद्देश्यम्**

- पूर्वज्ञानदृढीकरणम्
- संस्कृतस्य विविधानां विधानाम् अवबोधनम्
- आधुनिकभारतीयभाषासु तासां साहित्येषु संस्कृतावदानज्ञानम्

**शिक्षणबिन्दवः**

- **प्रस्तावना**

  i) प्राचीनतमा संस्कृतिः

  ii) प्राचीनतमा भाषा

  iii) प्राचीनतमं साहित्यम् (वेदानाम् उपनिषदाम् च।)

  iv) विश्वं प्रति भारतस्य अवदानम्

- **संस्कृतं तथा अन्याः भारतीयाः भाषाः**

  i) आर्यभाषाणाम् जननी

  ii) द्रविडभाषासु प्रभावः–शब्दावलिस्तरे, लिपिस्तरे

  iii) समकालीनभारतीय साहित्ये प्रभावः

  iv) संविधाने संस्कृतम्

- **भारतीयज्ञानविज्ञानपरम्परा**

  i) गणितम् (0, दशमलवः, ग, वैदिकगणितम्, ज्यौतिषम्, रसायनम्, आयुर्वेदम्, शिल्पशास्त्रादीनि)

  ii) संक्षिप्तपरिचयः – वराहमिहिरः, आर्यभट्टः, चरकः, सुश्रुतः,.........।

- **भारतीया मूल्यपरम्परा**

  i) भारतीयजीवनपद्धतिः

  ii) संस्काराः

  iii) जीवनदर्शनम्

  iv) 'धर्म' शब्दस्य तात्पर्यम्, दशलक्षणानि

**शिक्षणपद्धतिः**

वैकल्पिकपाठ्यांशस्य प्रस्तुतिः स्वनिर्देशितशिक्षण अथवा अभिक्रमिकस्वाध्यायपद्धत्यनुसारं करिष्यते।

## (ii) प्रयोजनमूलकं संस्कृतम्

**औचित्यम्**

अद्यतनीये भारते अनेकाः पत्रपत्रिकाः बहूनि पुस्तकानि च संस्कृतभाषायां प्रकाश्यन्ते। कस्यचिदपि लेखस्य प्रकाशनात् पूर्वं मुद्रणविषयक–अशुद्धीनां निराकरणं भाषासम्पादनं च नितान्तम् आवश्यकम्। अत एव प्रकाशनविभागेषु अशुद्धिसंशोधकस्य पदं भवति। शिक्षार्थिनः तस्य कौशलं जानन्तु तदर्थं सज्जाः च भवन्तु इति अपेक्षा।

**शिक्षण पद्धतिः**

अभिक्रमिकस्वाध्यायपद्धत्यनुसारम् अस्य पाठ्यक्रमस्य प्रस्तुतिः भविष्यति। मुक्तशिक्षास्वाध्याय शैलीमाध्यमेन प्रस्तुतिः करिष्यते। प्रूफरीडिंग चिह्नानां परिचयः प्रायोगिककार्यरूपेण कारयिष्यते।

## परियोजनाकार्यम्

संस्कृतभाषायाः अभ्यासानन्तरं तया भाषया छात्रेण किञ्च परियोजनाकार्यं करणीयम्। तेन कार्येण छात्राः अधीतायाः भाषायाः प्रयोगं कर्तुं, भाषाप्रयोगस्य आनन्दानुभूतिं कर्तुं च शक्नुयुः, अहं संस्कृतभाषया किञ्चित् कर्तुं शक्नुयाम् इति आत्मविश्वासं प्राप्नुयात्। किञ्च भाषायाः प्रयोजनेषु अन्यतमं भवति तया भाषया कार्यसम्पादनम् इति, अतः तदपि फलं साधितं भवति परियोजनाकार्येण।

परियोजनाकार्यम् इत्यनेन छात्राः स्वतन्त्रतया संस्कृतभाषया शैक्षिकम्, अध्ययनात्मकं, संग्रहात्मकं, सर्जनात्मकं वा कार्य कुर्युः इति अपेक्षा। यथा संस्कृतस्य सूक्तीनां सङ्कलनम् सुभाषितानां संग्रहः, संस्थानां मन्त्रालयानां च ध्ययेवाक्यसङ्ग्रहः, विविधसन्दर्भेषु प्रेष्यमाणानां शुभाशय–शुभकामना–वाक्यानां सङ्ग्रहः, लौकिकन्यायानां संङ्ग्रहः इत्यादयः। परियोजनाकार्यनिष्पादनार्थं मार्गदर्शकसिद्धान्ताः यथास्थानं प्रदीयन्ते।

यथावश्यकं पाठान्ते अपि परियोजनाकार्यं सूचितं भवेत्।

## 6.0 अध्ययनयोजना

संस्कृतस्य पाठ्यक्रमेण सह निम्नलिखितसामग्री सम्मिलिता भवेत्।

1. 3 मुद्रितानि पुस्तकानि।
2. श्रव्यसामग्री {ध्वनिमुद्रिका (कैसेट) सान्द्रमुद्रिका – (सी.डी. रोम) रूपेण} आकाशवाणीज्ञानवाणी च कार्यक्रम प्रसारण उच्चारणश्रवणयोः प्रबलनाय उपयोगिनी सामग्री भवेत्।
3. 30 सम्पर्ककक्षाः।

एनं पाठ्यक्रमं विद्यार्थी न्यूनातिन्यूनम् एकेन वर्षेण तथा च अधिकाधिकं पञ्चवर्षैः पूर्णं कर्तुं शक्नोति।

## 7.0 परीक्षा–योजना

1. श्रवणभाषणकौशलपरीक्षणं सम्पर्ककक्षासु आयोजितानां गतिविधीनां माध्यमेन भविष्यति।
2. अन्तिमपरीक्षायाम् एकं प्रश्नपत्रं शताङ्कानां भविष्यति। अस्मिन् प्रश्नपत्रे 85 अङ्कानाम् केन्द्रिकपाठ्यक्रमपरीक्षणं भविष्यति। 15 अङ्कानां वैकल्पिकपाठ्यक्रमे विकल्पद्वयं भविष्यति। छात्रैः केवलम् एकस्य एव अंशस्य प्रश्नानां समाधानं करणीयम्।
3. सम्पर्ककक्षासु त्रीणि शिक्षक–अंकितमूल्याङ्कनपत्राणि भविष्यन्ति। तेषु एकं परियोजनारूपेण छात्रैः अनिर्वायतया सम्पादनीयम्। परियोजनायाः अपि च श्रवणभाषणकौशलयोः मूल्याङ्कनं मौखिकपरीक्षामाध्यमेन अध्ययनकेन्द्रेषु सम्पर्ककक्षासु एव श्रेणीगत (ग्रेडिंग) प्रणाल्या भविष्यति। उपार्जिताश्रेणी अङ्कतालिकायां प्रदर्शयिष्यते।

## 8.0 अंकवितरण

| | पाठ्यांशाः | अङ्काः | समयावधिः |
|---|---|---|---|
| I. | केन्द्रिक–पाठ्यक्रमः | **85** | 210 होराः |
| | **श्रवणम–भाषणञ्च** | **श्रेणीबद्धमूल्यांकनम्** | **30** |
| | **पठनम्** | **100** | |
| | **पठितम्** | **40** | **70** |
| | गद्यपाठाः | 20 | 30 |
| | पद्यपाठाः | 10 | 20 |
| | नाट्यांशाः | 10 | 20 |
| | **अपठितम्** | **10** | **30** |
| | गद्यावबोधनम् | 5 | 15 |
| | पद्यावबोधनम् | 5 | 15 |
| | **लेखनम्** | **20** | **40** |
| | पत्रलेखनम् | 05 | 10 |
| | लघुनिबन्धलेखनम् | 10 | 20 |
| | संवादलेखनम् | 05 | 10 |
| **अनुप्रयुक्त–व्याकरणम्** | | **15** | **40** |
| **II.** | **वैकल्पिक–पाठ्यक्रमः** | **15** | **30** |
| | घटकद्वयात् कोप्येकः | | |
| | i) संस्कृतं संस्कृतिश्च | | |
| | ii) प्रयोजनमूलकसंस्कृतम् | | |
| | **योगः** | **100** | **240 होराः** |

# आदर्श–संस्कृत–प्रश्नपत्रम्

**निर्देशाः**

1. *अनुक्रमा : प्रश्नपत्रस्य प्रथमपृष्ठे अवश्यमेव लेखनीयः*
2. *निरीक्ष्यताम् यत् प्रश्नपत्रस्य पृष्ठसंख्या प्रश्नानां संख्या च प्रथमपृष्ठस्य शीर्षे मुद्रितसंख्यानुसारमेव अस्ति। प्रश्नाः क्रमानुसारमेव सन्ति।*
3. *वस्तुनिष्ठप्रश्नसहितं सम्पूर्णप्रश्नपत्रस्य उत्तराणि निर्धारितसमये एव लेखनीयानि।*
4. *उत्तरपुस्तिकायां परिचयचिह्नम् अथवा कुत्रापि निर्दिष्टस्थानेतरस्थलेषु अनुक्रमा लेखनं सर्वथा वर्जितम् अस्ति।*
5. *स्व–उत्तरपुस्तिकायां प्रश्नपत्रस्य कूट (कोड) संख्या अवश्यं लेखनीया।*
6. *इदं प्रश्नपत्रं त्रिषु खण्डेषु विभाजितम्– खण्डः 'क', खण्डः 'ख' तथा खण्डः 'ग'।*
7. *खण्डः 'क' अनिवार्यः।*
8. *खण्डः 'ख' अथवा खण्डः 'ग' एव समाधेयः।*
9. *सर्वेषां प्रश्नानामुत्तराणि संस्कृतेन एव लेखनीयानि।*

## खण्ड : 'क' केंद्रिकपाठ्यक्रमः

1. अधोलिखितेषु पाठेषु कस्यचिदेकस्य कथासारं लिखत। 6 × 1 6

   (क) अतिलोभः न कर्तव्यः

   (ख) परार्थे आत्मोत्सर्गः

   (ग) पर्यावरणस्य रक्षणम्

2. 'अहो! राजते खलु कन्याकुमारी' इति पाठाधारितम् अंशं पठित्वा प्रश्नान् उत्तरत। 4 × 1 4

   स्मारकस्य पार्श्वे एव तिरुवल्लुवर–प्रतिमा अपि विराजते। अयं 'तिरुक्कुरल' इति नामकस्य ग्रन्थस्य प्रणेता। एतस्य भवनस्य पुरतः अस्ति श्रीपादशिला। भगवती कन्याकुमारी तत्रैव एकपदेन स्थित्वा तपः आचरितवती।

   (i) तिरुवल्लुवरः कस्य ग्रन्थस्य प्रणेता?

   (ii) स्मारकभवनस्य पुरतः किम् स्थानम् अस्ति?

   (iii) कन्याकुमारी कुत्र तपः आचरितवती?

   (iv) अत्र समीपार्थकम् किं पदं प्रयुक्तम्?

3. 'अनन्तः ज्ञानसागरः' इति पाठम् आधृत्य प्रश्नानाम् उचितम् उत्तरं चित्वा लिखत। 4 × 1 4

   (i) आयुर्वेदस्य ज्ञानं कस्मिन् ग्रन्थेऽस्ति? (चरकसंहिता ग्रन्थे / लीलावत्याम्)

   (ii) लौहसंस्करणेन लवणनिर्माणं कस्मिन् शास्त्रे वर्णितम्? (धर्मशास्त्रे / लौहशास्त्रे)

   (iii) देहलीस्थः लौहस्तम्भः कस्याः विद्यायाः चमत्कारः? (ज्योतिष्विद्यायाः / भारतीयवास्तुविद्यायाः)

   (iv) विमानेभ्यः सौर–ऊर्जायाः प्रयोगः कस्मिन् शास्त्रे कल्पितः? (विमानशास्त्रे / वास्तुशास्त्रे)

4. अधोलिखितेषु वाक्येषु रेखा तपदम् आधृत्य प्रश्ननिर्माणं कुरुत। 4 × 1 4

(क) धर्मात् न प्रमदितव्यम् ।

(ख) वेदम् अनूच्य आचार्यः अन्तेवासिनम् अनुशास्ति।

(ग) 'नासाकेन्द्रे' कल्पनाचावलामहोदयायाः नियुक्तिः जाता।

(घ) कल्पनायाः वैमानिक्यां विशिष्टा रुचिः आसीत्।

5. यथानिर्दिष्टं प्रश्नान् उत्तरत 1/2× 4 2

(क) वत्से सरस्वति विषादं मा गाः।

इदं वाक्यं कः काम् प्रति कथयति ?

(ख) 'सखि! संहर रोषम्, असंस्कृतमतयोऽपि मुनयः माननीयाः'।

अत्र का काम् प्रति कथयति ?

6. अधोलिखितं पद्यं पठित्वा तस्य भावं स्पष्टयत 2

(क) यः स्वाध्यायमधीतेऽब्दं विधिना नियतः शुचिः।

तस्य नित्यं क्षरत्येष पयो दधि घृतं मधु।।

(ख) अधोलिखितश्लोकं पठित्वा प्रश्नान् उत्तरत 1+1 2

वहन्ति वर्षन्ति नदन्ति भान्ति

ध्यायन्ति नृत्यन्ति समाश्वसन्ति।

नद्यो घना मत्तगजा वनान्ताः

प्रियाविहीनाः शिखिनः प्लवंगाः।।

(i) वर्षर्तौ के नृत्यन्ति ? के नदन्ति च ?

(ii) प्रियाविहीनाः किं कुर्वन्ति ? समाश्वसन्ति च के ?

7. प्रदत्तसंदर्भानुसारम् एकपदेन उत्तरत। 1× 1 2

(क) कः पूज्यो विद्वि : स्वभावतः सर्वदा विनीतो यः।

अत्र विद्वभिः कः पूज्यः?

(ख) पूर्वापरौ तोयनिधीवगाह्य

स्थितः पृथिव्या इव मानदण्डः।

अत्र पृथिव्याः मानदण्डः कः कथितः ?

8. अधोलिखितश्लोकद्वयस्य प्रदत्तान्वययोः उचितपदैः रिक्तस्थानानि पूरयत 1+1 2

(क) अन्यथा ह्युषिताः पूर्वं परद्रव्याभिहारिणः।

अशक्ताः कि चिदादातुं द्रव्यं गोमायुयन्त्रिताः।।

**अन्वयः**— पूर्वम् अन्यथा हि (i)———————— परद्रव्याभिहारिणः,

गोमायुयन्त्रिताः कि चित् द्रव्यम् (ii) —————— अशक्ताः।

(ख) नित्यं रथेन गच्छामि, अश्वाः वहन्ति मे रथम्।

सम्राडस्मि नरो नास्मि, नासुरोऽस्मि निशाचरः।।

**अन्वयः** नित्यम् रथेन गच्छामि, अश्वाः मे रथम्
वहन्ति, सम्राट् (i)———————— नरः न अस्मि,
(ii) ——————— अस्मि, निशाचरः न।

9. उपयुक्तभावस्य प्रयोगः चयनं वा क्रियताम् 1+1 2

(क) जायते सौकुमार्यं च बलं स्थैर्यं च पादयोः।
<u>दृष्टिः प्रसादं लभते</u>, मरुतश्चोपशाम्यति।
अत्र रेखाि तपदानां स्थाने उपयुक्तभावं चित्वा लिखत
(i) दूरदर्शिता शोभते (ii) सतां दृष्टिः मोदते, (iii) तैलमर्दनेन नेत्रज्योतिः वर्धते।

(ख) 'गोस्तु मात्रा न विद्यते' अस्य उचितः भावः कः ?
(i) गौः माता इव भवति (ii) गोः तुलना केनापि कर्तुं न शक्या (iii) गौः पर्याप्तं दुग्धं यच्छति।

10. 'काले फलति सौभाग्यम्' नाटके लब्धदत्तस्य चारित्रिकगुणान् अधिकृत्य षड्वाक्यानि लिखत।

**अथवा**

'पतन्ति परपीडकाः' इति नाटके श्रीकृष्णेन कृतानां लीलानां वर्णनम् षड्वाक्येषु कुरुत। 1 × 6 6

11. (क) निश्वासोऽस्य न शि तः, सुविशदः तुल्यान्तरं वर्तते,
दृष्टिः गाढनिमीलिता न विकला नाभ्यन्तरे च चला।
गात्रं स्रस्तशरीरसन्धिशिथिलं शय्या प्रमाणाधिकम्।
दीप चापि न मर्षयेदभिमुखं स्याल्लक्षसुप्तं यदि।
इति पद्यं पठित्वा प्रगाढसुप्तस्य जनस्य चत्वारि लक्षणानि लिखत 1 × 2 2

(ख) अधोलिखितनाट्यांशं पठित्वा प्रदत्तप्रश्नान् उत्तरत –

राजा : मन्त्रिवर! अमूनि मांसानि शोणितानि च लोकस्य हितार्थमेव धृतानि। अद्य यदि तेषाम् उपयोगः अतिथिकृते भवेत् तत् तु मम सौभाग्यम् अस्ति। अतः अहं स्वशरीरेण आतिथ्यं कर्तुमिच्छामि।

मन्त्री : नार्हति देवः प्रदानहर्षातिशयात् अनुरक्तानां प्रजानां हिताहितम् अनवेक्षितुम्। अपि च प चानाम् एतेषां कृते जगत् अनर्थीकर्तव्यम् इति कोऽयं धर्ममार्गो देवस्य।

राजा : वैद्याः आहूयन्ताम् प चसिराः मोचयितुम्।

**प्रश्नाः**

(i) राजा केषां कृते स्वशरीरस्य मांसं दातुमिच्छति ?

(ii) मन्त्री राज्ञः मांसदाने कस्य अहितं पश्यति ? 1 × 2 2

12. (क) अधोलिखितं गद्याशं पठित्वा प्रदत्तप्रश्नान् उत्तरत

सर्वस्य अपि जनस्य जीवने किमपि उद्देश्यं भवेत्। जडवस्तूनाम् अपि प्रयोजनं भवति किं पुनः मनुष्यस्य। व्यजनस्य प्रयोजनं वायुदानम्, घट्याः प्रयोजनं समयदर्शनम्। एवमेव मनुष्यस्य जीवनं तदैव सार्थकं भवति यदा सः परोपकारं करोति। गृहे, कार्यालये, विद्यालये, समाजे वा मिलित्वा सहयोगेन जनसेवा देशसेवा च कर्तव्या। उत्तमकार्यम्

उत्तमपद्धत्या करणीयम्। ईश्वरः मम माध्यमेन उत्तमं कर्म कारयेत् इत्येव सर्वदा प्रार्थनीयम्।

**प्रश्नाः**

I. व्यजनस्य घट्याश्च किं किं प्रयोजनम्? 1

II. पूर्णवाक्येन उत्तरत

(i) सर्वदा किं प्रार्थनीयम्? 2

(ii) कुत्र कुत्र सहयोगः अपेक्षितः? 2

(ख) विद्या विवादाय धनं मदाय,

शक्तिः परेषां परिपीडनाय।

खलस्य साधोः विपरीतमेतत्

ज्ञानाय दानाय च रक्षणाय।।

**प्रश्नाः**

I. (i) दुष्टस्य विद्या किमर्थं भवति ?

(ii) साधोः विद्या किमर्थं भवति ? 2

II. कस्य शक्तिः अन्येषां पीडनाय एव ? 1

III. अस्मिन् पद्ये प्रयुक्तानि चत्वारि चतुर्थ्यन्तपदानि चित्वा लिखत 2

13. अधोलिखितस `तसूचीम् आधारीकृत्य किशोराणां दायित्वम् इति विषयम् अधिकृत्य संस्कृतभाषया दशवाक्येषु एकम् अनुच्छेदं लिखत 1 × 10 10

| |
|---|
| सन्मित्रैः सह स तिः, कुमित्रैः सह आत्मनः सुरक्षा, मद्यपानादिदोषाणां निराकरणम्, मादकद्रव्याणां सेवनात् आत्मनः संरक्षणम्, 'एड्स' इत्यादिरोगाणां विषये चिकित्सकेभ्यः समुचितं मार्गदर्शनम्, स्वत्वविकासः, उज्ज्वलभविष्ये उत्साहः, 'क्रोधमद–ईर्ष्या–लोभ' इत्यादि दोषाणां दूरीकरणाय सद्ग्रन्थानां पठनम्, समाजसेवा, सहपाठिनां सहायता, आत्मगौरवः। |

14. भवान् सौम्यः। भवतां मित्रेण एकं पुस्तकं क्रीतम्। तस्मिन् पुस्तके बहूनि पृष्ठानि मध्ये न सन्ति। पुस्तकविक्रेता पुस्तकं परिवर्तयितुं नेच्छति। तं उपभोक्तानियमानां विषये परिचितं कारयितुं पत्रं लिखत। 2 × 3 6

**संकेतः** उपभोक्ता–अधिकारसंरक्षणनियमानुसारं भवताम् अधिकारः, समितिं प्रति प्रार्थनापत्रं, विक्रेता पुस्तकं परिवर्तयिष्यति अथवा मूल्यं प्रदास्यति। उपभोक्तैः – जागरूकैः भवितव्यम्।

15. अधोलिखितान् प्रश्नान् उत्तरत

पर्यावरणस्य परिभाषां लिखित्वा ध्वनिप्रदूषणात् संरक्षणार्थं भवान् स्वसमुदाये किं कार्यद्वयं करिष्यति इति लिखत।

4 × 1 4

16. अधोलिखितवाक्ये रेखाि तपदयोः सन्धिच्छेदं कृत्वा वाक्यं पुनः लिखत ½+½ 1

<u>मानो</u> हि <u>महतां</u> धनम्

17. (क) अधोलिखितपंक्तौ रेखाि तपदे का विभक्तिः, किम् च मूलपदम् ?

अपूर्वोऽयं मया दृष्टः कान्तः <u>कमललोचने</u> 2

(ख) अधोलिखितवाक्येषु क्रियापदं लट् लकारे परिवर्त्य लिखत $\frac{1}{2} \times 4 = 2$

(i) एकस्य हस्तात् वर्तिका <u>अपतत्</u>।

(ii) सः रूप्यमयीं भूमिम् <u>अलभत</u>।

(iii) भवनस्य पुरतः श्रीपादशिला <u>आसीत्</u>।

(iv) कन्याकुमारी तपः <u>आचरत्</u>। 1×4 4

18. यथानिर्देशं कुरुत –

(i) द्वीपं परितः सागराणां शोभा अवर्णनीया। (अव्ययपदं चिनुत)

(ii) अत्र विशिष्टं ध्यानमन्दिरम् अस्ति। (विग्रहं कुरुत)

(iii) अत्र सर्वे मौनं तिष्ठन्ति (वाच्यपरिवर्तनम् कुरुत)

(iv) अथ एकदा ब्राह्मणस्य वारः समयातः (उपसर्गं चित्वा लिखत)

19. कोष्ठकात् उचितपदं चित्वा कयोश्चित् द्वयोः वाक्ययोः रिक्तस्थानानि पूरयत – 1×4 4

(i) वयं ———————— प्रतिदिनम् आहारार्थम् एकं मानवं दास्यामः। (तुभ्यम / त्वाम्)

(ii) ते——————— प्रति अगच्छन्। (हिमालयस्य / हिमालयम्!)

(iii) तैः व्याकरणं———————। (पठितवान् / पठितम्)

20. (i) 'क्त्वां' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत – 1+1 2

(क) सः भूमिं पश्यति, (ख) सः भूमि खनति।

(ii) क्तवतु प्रत्ययं प्रयुज्य वाक्यं पुनः लिखत –

ते अग्रे अगच्छन्। 1+1 2

## वैकल्पिकपाठ्यक्रमः

## खण्डः ख–संस्कृतं संस्कृतिश्च 15

21. (i) आधुनिके संस्कृतसाहित्ये नाटकद्वयस्य काव्यद्वयस्य च नामानि लिखत – 1+1 2

(ii) अधोलिखितसंख्यानां कृते संस्कृतपदानि लिखत –

$10^3$, $10^4$, $10^9$, $10^{11}$ $\frac{1}{2}$ ×4 2

(iii) पुरुषार्थचतुष्टयेन किम् अभिप्रेतम् ? $\frac{1}{2}$ ×4 2

22. (i) संस्कृतभाषायाः लिपेः नाम किम् ? तस्याः लिपेः किं वैशिष्ट्यम् ? उदाहरणद्वयं दीयताम्। 1+½+½ 2

(ii) आंग्लभाषया तुलना क्रियताम्। 2

(iii) जातकसाहित्ये कस्य महापुरुषस्य पूर्वजन्मकथाः वर्णिताः 2

**अथवा**

चतुर्णां संस्काराणां नामानि लिखत

23. अधोलिखितभाषाः अधिकृत्य कालक्रमानुसारं प्रवाहचित्रं रचयत 2

पालिः, संस्कृतम्, हिंदी, वैदिकसंस्कृतम

**अथवा**

ग्रहचतुष्टयस्य चित्रं दर्शयत

24. अधोलिखितेषु कः वैज्ञानिकः विमानविज्ञानेन सम्बद्धः? 1

भास्कराचार्यः, बौधायनः, भोजः, सुश्रुतः, भरद्वाजः

**अथवा**

कस्यचित् भारतीय गणितज्ञस्य नाम लिखत।

## खण्डः ग—वैकल्पिकः

## प्रयोजनमूलकं संस्कृतम्

21. (क) कासाचित् चतसृणां पत्रिकाणां नामानि लिखत। 2

(ख) भवान् पत्रिकां प्रकाशयितुम् इच्छति। तदर्थं प्रमुखं बिन्दुचतुष्टयं लिखत। 2

(ग) प्रायः मुद्रणे अशुद्धयः भवन्ति। कासाचित् चतसृणाम् अशुद्धीनां निराकरणं भवान् कथं करिष्यति? 2

22. (क) वैदिकभाषायां लौकिकभाषायां भेदद्वयं स्पष्टीकुरुत। 2

(ख) कस्यां विधायां अधिकाधिकप्रचलितभाषायाः प्रयोगः अपेक्ष्यते ? नाटके / उपन्यासे / काव्ये वा युक्तिपूर्वकम् उदाहरणसहितं च लिखत 2

23. (क) आकाशवाणीतः दूरदर्शनात् च कदा कदा संस्कृतवार्ताः प्रसार्यन्ते ? 2

(ख) दूरदर्शने प्रसारितः कः संस्कृतकार्यक्रमः भवि : श्रुतः? कस्यां प्रणाल्यां तस्य प्रसारणम् अभवत्? 2

24. संस्कृतं पठित्वा भवतां जीवने किं वैशिष्ट्यम् आगतम् इति बिंदुद्वयं लिखत। 1

# प्रश्नपत्रस्य प्रारूपम्

विषयः संस्कृतम् स्तर : उच्चतरमाध्यमिकस्तरः होरात्रयम्

प्रश्नपत्रः एकम् अंकाः 100

**उद्देश्यानुसारम् अंकविभाजनम्**

| **विषयाः** | **अंकाः** | **प्रतिशतम् योगः** |
|---|---|---|
| ज्ञानम् | 20 | 20% |
| बोधः | 45 | 45% |
| अनुप्रयोगः/अभिव्यक्तिः | 35 | 35% |

**प्रश्नप्रकारानुसारम् अ विभाजनम्**

| **विषयाः** | **प्रश्नसंख्या** | **अंक योगः** |
|---|---|---|
| दीर्घ–उत्तरीयप्रश्नाः | 5 | 34 |
| लघु–उत्तरीयप्रश्नाः | 7 | 36 |
| अतिलघुउत्तरीयप्रश्नाः | 12 | 30 |

**विषयानुरूपम् अंक विभाजनम्**

| **अंशः/एकांशः** | **अंकाः** | |
|---|---|---|
| **केंद्रिक पाठ्यक्रमः** | **85** | |
| **गद्यम्** | | |
| सारांश लेखनम् | 6 | 20 |
| बोधप्रश्नाः | 4 | |
| प्रश्ननिर्माणम् | 4 | |
| भावपल्लवनम् | 4 | |
| कः कं प्रति कथयति | 2 | |
| **पद्यम्** | | |
| पद्यांशस्य भावार्थः | 2 | 10 |
| बोधप्रश्नाः | 4 | |
| एकपदेन उत्तराणि | 2 | |
| अन्वयलेखनम् | 2 | |
| **नाटयांशाः** | | |
| चरित्रचित्रणम् | 6 | 10 |
| बोधप्रश्नाः | 2 | |
| पंक्ति–अनुसारं चरित्रचित्रणम् | 2 | |

**लेखनम**

| | | | |
|---|---|---|---|
| अनुच्छेदलेखनम् | | 10 | 20 |
| पत्रलेखनम् | | 6 | |
| सृजनात्मकलेखनम् | | 4 | |

**वैकल्पिकपत्राणि**

**(क) संस्कृतं संस्कृतिश्च**

| | | | |
|---|---|---|---|
| साहित्यपरिचयः | | 6 | 15 |
| बोधप्रश्नाः | 4+1 | 5 | |
| सारिणीनिर्माणम्/प्रवाहचित्रम् | | 4 | |

**अथवा**

**(ख) प्रयोजनमूलकसंस्कृतम्**

| | | |
|---|---|---|
| प्रयोजनपरिचयः | 6 | 15 |
| बोधप्रश्नाः | 5 | |
| अनुभवैः सह सम्बन्धः | 4 | |

# अ योजना
# गद्यपद्यभागयोः उत्तराणि
# मूल्यांकनबिन्दवः

**प्रश्न सं.** **समयावधिः 3 होराः**

**अ ाः 20**

1. कथासारः/पाठसारः छात्रेण स्वयं लेखनीयः 06 (K.L.A.)

2. (i) 'तिरक्कुरल' इति ग्रन्थस्य प्रणेता। 4×1=4 (US.SA)
   (ii) 'श्रीपादशिला' नामकं स्थानम्।
   (iii) कन्याकुमारी 'श्रीपादशिला' नामके स्थाने तपः आचरितवती।
   (iv) पार्श्वे

3. 'अनन्तः ज्ञानसागरः' इति पाठम् अधिकृत्य ज्ञानसागरस्य चतुर्णां तत्त्वानां चयनं कृत्वा वाक्येषु उत्तरलेखनम्। 4×1=4 (US.S)
   (i) चरकसंहिताग्रन्थे आयुर्वेदस्य ज्ञानम् अस्ति।
   (ii) लोहशास्त्रे लोहसंस्करणेन लवणनिर्माणं वर्णितम्।
   (iii) देहलीस्थः लौहस्तम्भः भारतीयवास्तुविद्यायाः चमत्कारः अस्ति।
   (iv) विमानशास्त्रे विमानेभ्यः सौर–ऊर्जायाः प्रयोगः कल्पितः।

4. रेखाि तपदम् आधृत्य प्रश्ननिर्माणम् 4×1=4 (Ap.S)
   (क) कस्मात् (ख) कम् (ग) कुत्र (घ) कस्याम्

5. कः/कम्/काम् इति प्रश्नयोः उत्तराणि ½ ×4=2 (US.SA)
   (क) पितामहः– सरस्वतीम्
   (ख) सरस्वती– सावित्रीम्

6. (क) यः पवित्रः भूत्वा नित्यं स्वाध्यायं करोति, सः सदा दुग्धघृतादिसर्वैः पदार्थैः युक्तः भवति। 2 (US.S)
   (ख) (i) वर्षर्तौ शिखिनः नृत्यन्ति, मत्तगजाः च नदन्ति। ½ ×4=2 US (VA)
   (ii) प्रियाविहीनाः ध्यायन्ति, प्लव ाः च समाश्वसन्ति।

7. एकपदेन उत्तरम्–पाठगतसंदर्भानुसारम् 1+1=2 (US.VS)
   (क) सर्वदाविनीतः
   (ख) हिमालयः

8. प्रदत्तान्वययोः रिक्तस्थानपूर्तिः 1+1=2 (US.VS)
   (क) (i) उषिताः (ii) आदातुम्
   (ख) (i) अस्मि (ii) असुरः

9. उपयुक्तभावप्रयोगः/चयनं वा 1+1=2 (WS.SA)
   (क) (iii) तैलमर्दनेन नेत्रज्योतिः वर्धते।
   (ख) (ii) गोः तुलना केनापि कर्तुं न शक्या

| प्रश्न सं. | | अ ाः |
|---|---|---|
| 10. | लब्धदत्तस्य चारित्रिकगुणाः सन्ति – विनम्रता, धैर्यम्, लोभराहित्यम् सत्यवादिता इत्यादयः तान् आधारीकृत्य षड्वाक्यानि। | 1×6=6 |
| | **अथवा** | |
| | चाणूरमर्दनम्, कुब्जायाः रोगहरणम् गजमर्दनम् इत्यादिलीलासु कामपि लीलाम् अधिकृत्य वर्णनम् (षड् वाक्येषु) | |
| 11. | (क) निःशि तः, निश्वासः, तुल्यान्तरम् गाढनिमीलितादृष्टिः, अविकला, शिथिल गात्रम् दीपनिर्वापनम् इत्यादिलक्षणेषु चत्वारि लक्षणानि। | ½×4=2 |
| | (ख) (i) यक्षाणां कृते (ii) जनतायाः, प्रजायाः | 1×2=2 |
| 12. | अ) I. वायुदानम्, समयदर्शनम्। | 1 |
| | II. ईश्वरः मम माध्यमेन उत्तमं कार्यं कारयेत् इति प्रार्थनीयम्। | 2 |
| | III. गृहे, कार्यालये, विद्यालये, समाजे, सर्वत्र | 2 |
| | आ) I. (i) विवादाय, (ii) ज्ञानाय | 2 |
| | II. खलस्य | 1 |
| | III. मदाय, परिपीडनाय, ज्ञानाय, दानाय, रक्षणाय, केवलं चत्वारि लेखनीयानि। | 2 |
| 13. | म जूषादत्तपदानां साहाय्येन दशवाक्यनिर्माणम् | 10 |
| 14. | पत्रलेखनम् औपचारिककार्यम्, विषयवस्तुलेखनम् | 6 |
| 15. | अनुभवात् कार्यद्वयं लेखनीयम् | 4 |
| 16. | (i) मानः, महताम् | 1 |
| 17 | (क) (i) तृतीया (ii) सम्बोधनम् | 2 |
| | (ख) (i) पतिष्यति (ii) लभते (iii) अस्ति (iv) आचरति | 4 |
| 18. | (i) परितः (ii) ध्यानस्य मन्दिरम् (iii) सर्वैः मौनं स्थीयते (iv) सम् + आ | 4 |
| 19. | (i) तुभ्यम् (ii) हिमालयम् (iii) पठितम् | 2 |
| 20. | 'क्त्वा' प्रत्ययं प्रयुज्य वाक्यद्वयं योजयत – (i) सः भूमिं दृष्ट्वा खनति, (ii) गतवन्तः | 2 |

## वैकल्पिकपाठ्यक्रमः

## खण्ड 'ख'

## संस्कृतं संस्कृतिश्च 15

| प्रश्न सं. | | अ ाः |
|---|---|---|
| 21. | (i) नाटकद्वयस्य काव्यद्वयस्य नामानि | 2 |
| | (ii) सहस्रम्, अयुतम्, समुद्रम्, अन्तम् | 2 |

(iii) धर्म–अर्थ–काम–मोक्षः 2

22. देवनागरी, यथा लिख्यते तथा पठ्यते

(i) आंग्लभाषया तुलना 2

(ii) महात्माबुद्धस्य 2

**अथवा**

गर्भाधानम्, नामकरणम्, उपनयनं, विवाहः

23. वैदिकसंस्कृतम् 2

पालि

संस्कृतम्

हिंदी

**अथवा**

ग्रहचतुष्टयस्य चित्रम्

24. भरद्वाजः 1

## खण्डः 'ग'

## प्रयोजनमूलकं संस्कृतम् 15

21. (क) सूचीं दृष्ट्वा नामानि लिखत। 2

(ख) सम्पादकमण्डलनिर्माणम् धनव्यवस्था, लेखसंग्रहः विज्ञापनानि इत्यादि। 2

(ग) अशुद्धीनाम् निराकरणम् निरस्तीकरणम्। 2

22. स्वरप्रक्रिया, भाषाप्रयोगबाहुल्यम् 2

नाटके, नाटकात्, उद्धरणं दीयताम्। 2

23. समयं दृष्ट्वा लिखत। 2

24. निज–अनुभवात् लिखत। 2

25. आत्मगौरवः, वार्ताप्रसारणज्ञानम्, लेखनाभ्यासः चरित्रनिर्माणम् (किमपि) एकम्। 1